**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यबिरुदावलीविराजमानश्रीनरसिंहभारतीकरकमलसञ्जातपण्डितपुण्डरीकमण्डलीमार्तण्डसकलविद्याविशारदश्रीसच्चिदानन्दभारतीस्वामिनिर्मापिते विद्वद्बालकश्रीलक्ष्मणशास्त्रिविरचिते गुरुवंशे महाकाव्येऽष्टमः सर्गः ।

**Colophon :**

व्या.—इति श्रीगुरुवंशव्याख्यायां भावबोधिन्यां अष्टमः सर्गः ।

**End :**

द्रष्टुं समागतजनाः किल शारदाम्बां
विश्राणनेन वसनादिमनोरथानाम् ।
श्रीमन्मुनीशमहितेन मुदं प्रपन्नाः
प्रत्युज्जगुर्मुहुरमुष्य यशोमहत्त्वम् ॥

राजाधिराजगुरुरेष महान् स सच्चि-
दानन्दभारतिमुनिर्धवृधे यशोभिः ।
आनन्दयन् बहुवरान् बहुवाञ्छितार्थैः
पक्षे सिते विधुरिव द्युसदः कलाभिः ॥

॥ शुभं भूयात् ॥

---

R. No. 7209.

Paper, 10⅓ × 7¾ inches. Foll. 220. Lines, 18 on a page. Devanagari. Extent, 5,000 granthas.

Transcribed in 1939–40 from a manuscript obtained from the Sarasvatīmahāl Library, Tanjore.

हरिवंशसारचरितव्याख्या by अप्पयदीक्षित ।

HARIVAMŚASĀRACARITA VYĀKHYĀ by Appayadīkṣita.

A commentary on Harivamśasāracarita of Govindamantri by the famous Appayadīkṣita. It is stated in the Tanjore Library catalogue that Govindamantri is different from the famous Govindadīkṣita, the prime minister of Tanjore Kings, Chevvappa (1549–1572 A.D.) Acyuta (1577–1614 A.D.) and Raghunātha (1614 A.D.) and that he is attached to Koṇḍaviḍu family of chieftains.

Complete in 23 sargas.

**Beginning :**

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णबोधः
श्रेय(स्त)मे दिशतु शाश्वतिकं मुकुन्दः ॥

आसेतुबन्धतटमाचतुषारशैल-
माचार्यदीक्षित इति प्रथिताभिधानः ।
अद्वैतचिन्मयमहाम्बुधिमग्नभाव-
मस्मत्पितामहमशेषगुरुं प्रपद्ये ॥

यं ब्रह्म निश्चितधियः प्रवदन्ति साक्षा-
दादर्शनादखिलदर्शनपानगाजः ।
तं सर्ववेदसमशेषबुधाद्रिराजं
श्रीरङ्गराजमखिनं पितरं प्रपद्ये ॥

वाचा सोदरया सुधामधुरया नैकप्रबन्धावले-
स्सालङ्काररसध्वनिप्रणयिनां षट्दर्शिनीदर्शिनाम् ।
व्याकुर्वे सुधियां मुदेऽप्पयमखी **गोविन्दमन्त्रीरितं**
काव्यं **श्रीहरिवंशसारचरितं** नानाविधालङ्क्रियम् ॥

इह खलु गोविन्दमन्त्रीति विख्यातमहिमाभिख्यो महाकविः श्रीहरिवंशेन प्रपञ्चिता . . . . . कथां सहृदयहृदयाह्लादकारिण्या कान्तासम्मितया काव्यसरण्या संजिघृक्षुः वस्तुनिर्देशरूप . . . . . . . . ।

* * * * *

**Colophon :**

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिरङ्गराजाध्वरिसूनोरप्पय्यदीक्षितस्य कृतौ हरिवंशसारचरितव्याख्यायां प्रथमः सर्गः

**End :**

. . . . . . . धिया शत्रूणां शासनं निग्रहं बाणमोक्षावधिबाणासुरमोक्षपर्यन्तं पूरयित्वा निरवशेष . . . . . . . दुष्टनिग्रहसाधुपरिपालनाभ्यां धर्मसंस्थापनमवताराान्निर्वर्तितमिति आनन्दसमृद्धिं बिभ्रत् त्रैलोक्यरक्षामकुरुत स्मारित प्र . . . . . . . . . . . . . . प्रयोजना हि मानोऽस्तीति सूचयितुमात्मनेपदम् ॥ ६० ॥

**Colophon :**

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ हरिवंशसारचरितव्याख्यायां त्रयोविंशतिः सर्गः । हरिवंशसारचरितव्याख्यानं सम्पूर्णम् ॥

R. No. 7210.

Paper, 11⅝ × 9½ inches. Foll. 198. Lines, 20 on a page. Davanagari. Extent, 6,000 granthas.

Transcribed in 1939–40 from a manuscript obtained from S. Subrahmaṇya Śāstrigal of Prāntiyankarai, Tanjore District.

भाट्टदीपिकाव्याख्या प्रभावली by शम्भुभट्ट ।
BHAṬṬADĪPIKĀ VYĀKHYĀ PRABHĀVALĪ by Śambhu Bhaṭṭa.

Same work as those described under R. Nos. 859 and 1373 which contain a different portion.

Contains the 4th and 5th adhyāyas complete.

Beginning :

श्रीशम्भुभट्टीये चतुर्थाध्यायप्रारम्भः ।

अज्ञानतिमिरध्वंसि सत्यज्ञानप्रकाशकम् ।
सर्वाभीष्टप्रदं नौमि श्रीरूपं सुन्दरं महः ॥

यो वेदशास्त्रार्णवपारदृश्वा
यज्ञादिकर्माचरणेऽतिदक्षः ।
सदाशिवाराधनशुद्धचित्तः
तं बालकृष्णं पितरं नमामि ॥

श्रीखण्डदेवं प्रणिपत्य सद्गुरुम्
मीमांसकस्वान्तसरोजभास्करम् ।
अत्यन्तसंक्षिप्तपदार्थतत्कृतौ
प्रभावलीटिप्पणमातनोम्यहम् ॥

* * * * *

सू.—अथातः क्रत्वर्थपुरुषार्थयोः जिज्ञासा ।

अत्र 'प्रसिद्धशेषशेषित्वे प्रयुक्तिरधुनोच्यते' इति शास्त्रदीपिकाग्रन्थादन्तर्भावितणिजर्थविवक्षया क्तिप्रत्ययान्तेन प्रयुक्तिशब्देन प्रयोजकत्वमध्यायार्थ इति भ्रमं व्यावर्तयन्नाह – प्रयोजकत्वनिरूपितप्रयोज्यत्वमिहेति ।

**End :**

सू.—तथा सोमविकाराः ।

एका वावेति—एका वावेति वाक्येनाग्निष्टोमे प्राथम्यरूपांगविधानाभावपूर्वकं तदुत्तरत्वमात्रविधानस्य पूर्वमुपपादितत्वात् औपदेशिकेनाग्निष्टोमोत्तरत्वेन आतिदेशिकाधानाव्यवहितोत्तरत्वस्य बाधादित्यर्थः । अध्यायार्थमुपसंहरति इति सिद्धमिति ।

**Colophon :**

इति श्रीपूर्वोत्तरमीमांसापारावारपारीणधुरीणश्रीमत्खण्डदेवान्तेवासिकविमण्डनशम्भुभट्टविरचितायां भाट्टदीपिकाप्रभावल्यां पञ्चमाध्यायस्य चतुर्थः पादः ।

॥ अध्यायश्च समाप्तः ॥

---

## R. No. 7211.

Paper, 11⅓ × 9½ inches. Foll. 37. Lines, 20 on a page. Devanagari. Extent, 1,600 granthas.

Transcribed in 1939-40 from a manuscript obtained from S. Subrahmanya Sastry of Prantyangarai, Tanjore District.

भाट्टदीपिकाव्याख्या—प्रभावली by शम्भुभट्ट ।

BHĀṬṬADĪPIKĀ VYĀKHYĀ—PRABHĀVALĪ by Śambhu Bhaṭṭa.

Same work as that described under R. No. 859 which contains different portion.

Contains the seventh adhyāya, first and second pāda complete, third pāda incomplete. Breaks off in the course of 19th Sūtra.

**Beginning :**

भाट्टदीपिकाप्रभावल्यां सप्तमाध्यायः प्रारभ्यते ।

अज्ञानतिमिरध्वंसि सत्यज्ञानप्रकाशकम् ।
सर्वाभीष्टप्रदं नौमि श्रीरूपं सुन्दरं महः ॥

* * * * *

यद्यप्यत्र गुरोः कृतावपि मयाप्युद्भाव्यते काचना-
संभूतिस्तदपि प्रचारचतुरे नैषा पुरोभागिता ।
किन्तु क्ष्मातिलकाः कुशाग्रधिषणाः सिद्धान्तबद्धादरा
मद्वाक्यं परिहृत्य तत्कृतिमलङ्कुर्वन्त्विदं मे मतिः ॥

सू—श्रुतिप्रमाणत्वाच्छेषाणाम् ।

अत्र भाष्यकारेण पूर्वेणाध्यायषट्केन प्रत्यक्षविहितधर्माणां कर्मणां दर्शपूर्णमासादीनामितिकर्तव्यता चिन्तिता । उत्तरेणेदानीमविहितेतिकर्तव्यताकेषु ऐन्द्राग्नादिषु चिन्तयितुमिष्यत इत्येवं षट्कद्वयसङ्गतिप्रदर्शनार्थमुक्तमापाततस्तावदयुक्तम् । द्रव्यैकत्वे कर्मभेदात् प्रतिकर्म क्रियेरन् इत्यधिकरणे तृतीयपञ्चमपादे सर्वपृष्ठायामप्रत्यक्षधर्मकायामपि किं स्विष्टकृते सकृदुत्तरार्धादवदेयं उत कर्मभेदात् प्रतिकर्मभेदेनावदेयमिति विचारकरणात् । तथा तत्रैवाष्टमपादे सन्निधानविशेषात् असम्भवे तदङ्गानामित्यधिकरणे हविनवनीतमाज्यं भवतीति उताहृत्याप्रत्यक्षधर्मके श्येने विचारकरणाच्च श्येने उत्तरषट्केऽपि प्रत्यक्षधर्मकेषु दर्शपूर्णमासादिषु भूयसो विचारस्य करिष्यमाणत्वाच्च । अतस्तत्रत्ये प्रत्यक्षविहिताप्रत्यक्षाविहितधर्मपदे उपदेशातिदेशपरे न यथाश्रुते इत्यभिप्रेत्य पूर्वषट्कोत्तरषट्कयोर्हेतुहेतुमद्भावावसरसङ्गती दर्शयति—उपदेशे अवगते इति—अयमर्थः ।

**Colophon :**

इति भाट्टदीपिकाप्रभावल्यां सप्तमस्य प्रथमः पादः ।

**Colophon :**

इति श्रीपूर्वोत्तरमीमांसापारीणधुरीणश्रीशम्भुभट्टविरचिते सप्तमस्य द्वितीयः पादः ।

**End :**

अतोऽवान्तरप्रकरणादेव प्राप्तोत्तरवेदिप्रतिषेधकतया नित्यानुवादत्वे सिद्धे पर्वद्वयानुवादबलादवान्तरप्रकरणेन वरुणप्रघासाङ्गमुत्तरवेदिः तद्बाधेन साकमेधाङ्गमपीति बोधने न किञ्चिद्बाधकं द्वयोः प्रणयन्तीति प्राकृतप्रणयनपुनर्विधिस्तु वरुणप्रघाससाकमेधाङ्गभूतोत्तरवेद्यधिकरणाग्निनिधाने प्रणीताग्निविषयत्वबोधनद्वारा कपालतापार्थाग्निनिधाने उत्तरवेदिनिवारणमेव प्रयोजनम् । एवं च सिद्धान्तारम्भग्रन्थे मध्यमविषय एव वायमनुवाद इत्युक्तौ द्वयोः प्रणयन्तीत्यत्र द्वयोरिति पदमात्रमेवानुवाद इत्येव पूज्यपादानां तात्पर्यं द्रष्टव्यमिति दिक् ॥

R. No. 7212.

Paper, $11\frac{1}{8} \times 9\frac{1}{2}$ inches. Foll. 83. Lines, 20 on a page. Devanagari. Extent, 2,000 granthas.

Restored in 1939-40 from the manuscript described under R. No. 2083.

हरिश्चन्द्रचम्पूः by गुरुरामकवि ।

HARIŚCANDRACAMPŪḤ by Gururāmakavi.

For remarks please see the description of the original manuscript and the introduction of the drama, Ratneśvaraprasādana published in the Bālamanoramā Press, Madraṣ, under Madras Government Oriental Manuscripts Series No. 5.

Complete.

---

(R. Nos. 7213 and 7213 (*a*) one bundle.)

Palm leaf. $12\frac{3}{4}$ and $12\frac{5}{8} \times 1\frac{1}{2}$ and $1\frac{3}{8}$ inches. Foll. 4. Lines, 8—11 on a page. Grantha. Much injured.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7213.

वरलक्ष्मीव्रतकल्पः ।

VARALAKṢMĪVRATAKALPAḤ.

Foll. 1—3 (*a*). Lines, 8 and 9 on a page. Extent, 50 granthas.

The other work herein is—Vināyakavratakalpa, fol. 3 (*a*).

Same work as that described under D. No. 8470.

Wants the beginning.

**Beginning :**

. . . . . . . . . . . . . सुप्रीता भव सर्वदा ।

सर्वमङ्गलमाङ्गल्ये विष्णु . . । . . . . . . . . .

. . . . . . . . . : . ।

माणिक्यनीलवैडूर्यपुष्परागादिभिर्युतम् ।

स्वर्णसिंहासनं चारुगृहाण हरि(वल्लभे) ॥

. . . । पाद्यं गृहाण देवेशि मया दत्तं सुरेश्वरि ॥ पाद्यम् ॥

**End :**

. . . . . . . . न्ती साध्वीं तुष्टुवुस्तत्र योषितः ।
तदारभ्य व्रतं पुण्यं मर्त्यलोके प्रशस्यते । वरलक्ष्मी . . . . .
. . च्युयात् ।

**Colophon :**

इति भविष्योत्तरपुराणे उमामहेश्वरसंवादे वरलक्ष्मीव्रतकल्पः समाप्तः ।

---

R. No. 7213 (*a*).

विनायकव्रतकल्पः ।

VINĀYAKAVRATAKALPAḤ.

Foll. 3 and 4. Lines, 10 and 11 on a page. Extent, 60 granthas.

Begins on fol. 3 (*a*) of the manuscript described under R. No. 7213.

Same work as that described under D. No. 8499.

Wants the end and one stanza in the beginning.

**Beginning :**

[वन्दे] गजाननं देवं तप्तकाञ्चनसन्निभम् ।
चतुर्भुजं महाकायं सर्वाभरणभूषितम् ॥

दन्ताक्षमालापरशुपूर्णमोदकधारिणम् ।
. . . . . . . विनायकम् ॥

**Colophon :**

। इति पूजाविधानं सम्पूर्णम् ।

**End :**

(विना)यकेशपुत्रेति सर्वसिद्धिप्रदायक ।
एकदन्तेभवक्त्रेति तथा मूषिकवाहन ॥

कुमारगुरवे तुभ्यं पूजनीयं प्रयत्नतः ।
सर्वे म . . . . . . . ॥

अथैकविंशतिं गृह्य मोदकान् घृतपाचितान् ।
स्थापयित्वा गणाध्यक्षसमीपे कुरुनन्दन ॥

दश विप्राय दातव्या स्वयं चा . . . . ।
. . . . . . . नृपोत्तम ॥
ब्राह्मणान् भोजयेत् पश्चात् . . . :

R. No. 7214.

Palm leaf. 14¼—14½ × 1¾—2 1/16 inches. Foll. 78. Lines, 9—14 on a page. Fair. Grantha. Extent, 2,800 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

सौन्दर्यलहरी—लक्ष्मीधरव्याख्यासहिता ।

SAUNDARYALAHARĪ with the commentary of Lakṣmīdhara.

Same work as that described under D. No. 10866 wherein see for beginning.

Breaks off in the course of 80th stanza.

**End :**

कषन्तौ निकषन्तौ । दोर्मूले कक्षप्रान्तदेशौ । कनककलशाभौ कनककलशयोः हेमकुम्भयोरिव आभा सौभाग्यं ययोस्तौ । कलयता रचयता । निर्माणेन । तव भवत्याः । त्रातुं रक्षितुं । वलग्नमिति शेषः । यद्वा प्रथमान्तस्य वलग्नस्य कर्मत्वेनान्वयः । भङ्गात् स्तनभरजनितात् । अलमिति अलंशब्दः वारणार्थः । भङ्गो मा भूदित्यर्थः । वलग्नं मध्यप्रदेशं । तनुभुवा मन्मथेन । त्रिधा त्रिप्रकारेण । नद्धं बद्धम् । देवि दीव्यन्ति भगवति । त्रिवलि तिस्रो वलयो विभागा यस्य तत् ।

(R. Nos. 7215—7217 one bundle.)

Palm leaf. 10½ × 1¾ inches. Foll. 36, Lines, 8—11 on a page. Grantha. Slightly injured.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7215.

शिवलिङ्गलक्षणम् ।

ŚIVALIṄGALAKṢAṆAM.

Foll. 1—2 (*a*). Lines, 8 to 10 on a page. Extent, 30 granthas.

The other works herein are—

Sālagrāmalakṣaṇam, fol. 2 (*b*), Sālagrāmalakṣaṇasaṅgraha, fol. 9 (*a*). Ātmamānasikapūjā, fol. 33 (*a*).

Similar to the work described under D. No. 5527.

Complete.

Tri. Cat.—7

**Beginning :**

शिवभक्तिसुधोदये :—

सलक्षणेषु लिङ्गेषु नर्मदादिभवेषु यः ।
पूजनीयः स गौरीशः श्रेयसेऽस्तु मम प्रभुः ॥

सूक्ष्मागमे—

महानदीसमुद्भूतं सिद्धक्षेत्रादिसम्भवम् ।
पाषाणं परया भक्त्या लिङ्गवत् पूजयेत् सदा ॥

श्वेतं रक्तं तथा पीतं कृष्णं विप्रादिपूजितम् ।
स्वभावात् कृष्णवर्णन्तु सर्वजातिषु सिद्धिदम् ॥

**End :**

लघु वा कापिलं लिङ्गं गृहीत्वैवार्चयेत् क्वचित् ।
तीक्ष्णाङ्गं वक्रशीर्षं च शृङ्गलिङ्गञ्च वर्जयेत् ॥

अतिस्थूलं त्वतिकृशं स्वल्पं श्वभ्रघनान्वितम् ।
गृही विवर्जयेत् तादृक् तं मुमुक्षोर्यतेर्हितम् ॥

पूजितव्यं गृहस्थेन सदा च भ्रमरोपमम् ।
बाणलिङ्गं यदा हस्ते तदा सौषुप्तिकं वदेत् ॥

**Colophon :**

इति शिवभक्तिसुधोदये शिवलिङ्गोत्पत्तिलक्षणम् ।

लिङ्गनाभिसमपीठविस्तरं विस्तरस्य शरवेदतुङ्गकम् ? ।
तुङ्गकार्धकृतगोमुखान्तरं गोमुखार्धकृतपीठनालकम् ॥

। इति पञ्चसूत्रलक्षणम् ।

---

R. No. 7215 (*a*).

सालग्रामलक्षणम् ।

**SĀLAGRĀMALAKṢAṆAM.**

Foll. 2 (b)—8 (a). Lines, 9—11 on a page. Extent, 150 granthas.

Begins on fol. 2 (b) of the manuscript described under R. 7215.

Same work as that described under D. No. 5809. But this manuscript contains only the portion taken from Varāhapurāṇa. For beginning and end please see that number under the Colophon., viz.,

इति गारुडपुराणे सालग्रामलक्षणम् ।

Complete.

Fol. 8 (b) is left blank.

---

R. No. 7216.

सालग्रामलक्षणसङ्ग्रहः by पद्मनाभ ।

SĀLAGRĀMALAKṢAṆASANGRAHAḤ by Padmanābha.

Foll. 9 (a)—32 (b). Extent, 600 granthas.

Begins on fol. 9 (a) of the manuscript described under R. No. 7215.

This work deals with the classifications and the definitions of Sālagrāmamūrtis. This has been compiled by one Padmanābha.

Complete.

**Beginning :**

गुरुं गणाधिपं वाणीं कृष्णं च परदेवताम् ।
नत्वा वक्ष्ये सङ्ग्रहेण पुण्यं श्रीमूर्तिलक्षणम् ॥

ब्राह्मादिषु पुराणेषु व्यासेनोक्तं महात्मना ।
एकत्र सुखबोधाय मया सङ्गृह्यतेऽधुना ॥

विष्णुना गरुडायोक्तं ब्रह्मणा नारदाय च ।
सालग्रामशिलाभेदं ग्राह्याग्राह्यफलं तथा ॥

द्वारमानं तथा क्षेत्रं मूर्तीनां लक्षणं तथा ।
मत्स्यादिसर्वमूर्तीनां सङ्ख्या पूजा फलं तथा ॥

इत्यादि सर्वमत्रैव वक्ष्यामः साधुतुष्टये ।
गण्डक्याश्चोत्तरे तीरे गिरिराजस्य दक्षिणे ॥

क्षेत्रं वै विष्णुसान्निध्यात् सर्वक्षेत्रोत्तमोत्तमम् ।
योजनद्वादशमितं बहुतीर्थसमाकुलम् ।

**End :**

नाणतूणीरचापाढ्यं कल्पवृक्षसुचिह्नितम् ।
समसूक्ष्मलसच्चक्रं पद्मवक्त्रं सुशोभनम् ॥
छत्रचामररेखाढ्यं पार्श्वचक्रसमन्वितम् ;
कूर्मचक्रमधोभागे पङ्कजेन समन्वितम् ॥
सिंहासने समासीनं रामं परिजनैः सह ।
पट्टाभिराममूर्तिं तत् राज्यलक्ष्मीप्रदं नृणाम् ॥
पूर्वोक्तचिह्नहीनश्चेत् बहुचक्रसमन्वितः ।
पातालनरसिंहो वा बहुरूपोऽथवा भवेत् ॥
बहुचक्रं बहुद्वारं बहुवर्णं बहूदरम् ।
पातालनरसिंहाख्यं भिक्षूणाममृतप्रदम् ।
अत ऊर्ध्वमनन्तः स्यात् सर्वकामफलप्रदः ।
एकचक्रं समारभ्य यावद्द्वादशचक्रकम् ॥
लक्षणं पद्मनाभेन मूलशास्त्रानुसारतः ।
मत्स्याद्याः केशवाद्याश्च हैहयान्ताश्च मूर्तयः ॥
सलक्षणाः सङ्गृहीताः सर्वलोकशुभप्रदाः ॥

**Colophon :**

॥ सालग्रामलक्षणसङ्ग्रहः समाप्तः ॥
। श्रीगिरिसुन्दरीसमेतस्वामिने नमः ।

---

R. No. 7217.

आत्ममानसिकपूजा ।

ĀTMAMĀNASIKAPŪJĀ.

Foll. 33 (*a*)—36 (*b*). Extent, 70 granthas.

Begins on fol. 33 (*a*) of the manuscript described under R. No. 7215.

Same work as that described under D. No. 8610 but with an addition of two stanzas immediate before the colophon.

Complete.

Additional stanzas found herein :—

एवं वेदान्तकल्पोक्तमात्मलिङ्गप्रपूजनम् ।
कुर्वन्ना(म)रणं वापि क्षणं वा सुसमाहितः ॥

सर्वदुर्वासनाजालं पादपांसुमिव त्यजेत् ।
विधूयाज्ञानदुःखौघं मोक्षानन्दं समश्नुते ॥

---

R. No. 7218.

Palm leaf. 15⅜—15½ × 1¼ and 1⅜ inches. Foll. 88. Lines, 6—8 on a page. Grantha. Injured. Extent, 2,400 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

गदाधरीयव्याख्या— कृष्णभट्टीया ।

GADĀDHARĪYA VYĀKHYĀ—KṚṢṆABHAṬṬĪYĀ.

Same work as that described under D. No. 4073. But this manuscript contains a different portion.

Wants 10 or 15 pages in the beginning. Otherwise Pakṣatā complete.

**Beginning :**

सिद्धान्तलक्षण इति—अत्रापि कार्यतावच्छेदकं पूर्वनिरुक्तमेव । आत्मेति—आत्माकाशान्यतरेत्यर्थः । विभुत्वस्यैक्याभावात् न निवेशः । विनापि द्वित्वादिकमपेक्षाबुद्ध्युपगमेऽपि तस्या न क्षणत्रयावस्थायित्वम् । द्वित्वादिनाशत्वापेक्षाबुद्धिनाशत्वयोरननुगमेन तत्तद्व्यक्तित्वेन हेतुतापर्यसाने लाघवेनापेक्षाबुद्ध्युत्तरचतुर्थक्षणस्यैव द्वित्वादिनाशकत्वोपगमादित्याशयेनाङ्गीकुर्वाणैरिति । स्वसमानाधिकरणस्वानन्तरोत्पन्नविशेषगुणात्मकेति ;

**End :**

एवमपि सिद्धिप्रतिबन्धकत्वकल्पनापेक्षया तथाविधप्रत्यक्षसामग्र्यनुमितिसामग्र्यभावयोरकारणत्वाच्च लाघवात् । परन्तु नेयं पक्षता विषयामिश्रितानुमित्साकाले पक्षताकाले पक्षताव्यवहारानुपपत्तेरिति ।

**Colophon :**

आरठोपाध्यायकृष्णभट्टविरचिता पक्षताटिप्पणी समाप्ता ॥

(R. Nos. 7219 and 7220 one bundle.)

Palm leaf. $14\frac{15}{16}$ and $15 \times 1\frac{1}{2}$ inches. Foll. 51. Lines, 9—11 on a page. Grantha. Slightly injured.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7219.

अवयवक्रोडपत्रम् ।

AVAYAVAKRODAPATRAM.

Foll. 1—14 (*a*). Lines, 8 and 9 on a page. Extent, 450 granthas.

The other work herein is Tattvacintāmaṇyālokaṭippaṇī, fol. 15 (*a*).

Similar to the work described under D. No. 4261.

Contains Pañcamaviṣayatāvicāra only.

**Beginning :**

अनुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्वेन पञ्चमविषयता-
निष्ठाय . . . . . . . . . . ददच्छेदकतापर्याप्त्यधि-
करणधर्मवत्वेन वा अनुगमे साध्यविषयताया हेतुव्यापकत्व . . .
. . . . . विषयतेत्यादिक्रमेणाधिकरणविषयतानिरूपितत्वोभय-
विशिष्टसाध्यतावच्छेदकावच्छिन्न . . . . . . . . . . .
च्छेदकतया तादृशपर्याप्त्यधिकरणं तादृशनिरूपितत्वद्वयविशिष्टसाध्यविषय-
तात्वमेव . . . . . . स्योदाहरणजन्यबोधे सत्वेन उदाहरणेऽति-
व्याप्तिः । अतः चतुर्थविषयतानिरूपित . . . . . . . .
. . . . . . ।

**End :**

न चैवं प्रमेयत्वव्यापकवाच्यत्ववत् द्रव्यत्वाभाववद्द्रव्यत्वाभावः सास्नाभाववान् गोत्वाभावादित्यादौ व्युत्क्रमेण पक्षतावच्छेदककोटिप्रविष्टविषयतामादायाव्याप्तिर्दुर्वारैवेति वाच्यम् । एतद्दोषवारणाय पूर्वोक्तहेतुकोटिप्रविष्टपदार्थीयविषयतामादाय च उक्तदोषवारणाय पक्षतावच्छेदकताविशेषणत्वेन सामञ्जस्यात् । परन्तु एवं सति दीधितिकाराणां साध्यतावच्छेदकहेतुतावच्छेदकत्वयोः व्यावृत्तिदानं पक्षान्तर एव सङ्गमनीयम् । न च लिङ्गाविषयकत्वघटितलक्षणापेक्षया गौरवमेव एतल्लक्षणे दोष इति

वाच्यम् । लिङ्गाविषयकत्वघटितलक्षणे लिङ्गांशानिवेशस्यानुमितिसमानविषयकत्वसार्थक्यार्थतया प्रक्षालनाद्धीति न्यायग्रस्तत्वात् । लिङ्गपदस्य लिङ्गत्वार्थक एव मणिकृतोऽपि स्वरसः । अत एव तेनोदाहरणादिव्युदास इत्युक्तं सङ्गच्छते । अन्यथालिङ्गाविषयकत्वविशेषणेन हेतोरपि वारणात् व्यतिरेक्युदाहरणादेरवारणात् न्यूनताधिक्यापत्तेरित्यलं पल्लवितेनेति सुधियो विभावयन्तु ।

। श्रीगणेशाय नमः ।

---

R. No. 7220.

तत्त्वचिन्तामण्यालोकटिप्पणी ।

TATTVACINTĀMAṆYĀLOKA ṬIPPAṆĪ.

Foll. 15 (*a*)—51 (*b*). Lines, 9—11 on a page. Extent, 1,200 granthas.

Begins on fol. 15 (*a*) of the manuscript described under the previous number.

A commentary on the Āloka of Jayadeva which itself is a commentary on the famous Tattvacintāmaṇi and has been described under R. No. 1539. The author is not known.

Contains Vidhivāda only incomplete in the Śabdapariccheda.

**Beginning :**

अभिधासङ्कल्पादीनां समुच्चितानां प्रवर्तकत्वमेकस्यैव मतमिति भ्रमनिराकरणाय मतभेदं स्पष्टयति तत्राभिधेत्यादिना । अभिधाज्ञानस्य प्रवर्तकत्वे तदशक्तस्य लिङादेः कथं प्रवर्तकतेति शङ्कां निराकरिष्णुना तस्या लिङ्पदवाच्यत्वमभिहितम् । प्रवृत्तिहेतुरिति प्रवर्तकशब्दरूपकर्तृव्यापार इत्यर्थः । तथा च स्वर्गकामो यजेत अहरहस्सन्ध्यामुपासीतेत्यादिवाक्यानां क्रियायामिष्टसाधनत्वाबोधकत्वेऽपि तत्र प्रवर्तकत्वमक्षतम् । कर्त्रन्तरव्यापाराधीनप्रवृत्ताविष्टसाधनताज्ञानस्याहेतुकत्वात् ।

**End :**

प्रवर्तकप्रवृत्तिविषयमुख्यविशेष्यकानुमानान्तरपूर्वकालीनमित्यर्थः । प्रवर्तकेति साक्षात् प्रवर्तकेत्यर्थः । यथाश्रुतस्याप्रवर्तकतायां बीजमाह– प्रवृत्तिविषयविशेष्यकेति—तन्मुख्यविशेष्यकेत्यर्थः । प्रवर्तकत्वादिति—उक्तानुमाने च प्रवृत्तिविषयक्रियायाः पक्षभूतात्मविशेषणतया मुख्यविशेष्यताविरहादिति शेषः । उक्तानुमाने सति इत्यनुमानमिति योजना । उक्तानुमानोत्तरकालीनमित्यनुमानमित्यर्थः । हेतुताप्रतियोगिककार्यताधिकरणत्वादिति —कारणतानिरूपकत्वादित्यर्थः । न चासिद्धिरिति पक्षे उक्तहेतोरनुमानमित्यर्थः । प्रथमानुमानेन कृतिनिरूपितजन्यताव? सन्ध्यावन्दनकत्वानुमाने तदग्रहात् ।

---

(R. Nos. 7221 and 7222 one bundle.)

Palm leaf. 16⅝ and 17½ × 1¼—1⅛ inches. Foll. 204. Lines, 7—9 on a page. Grantha. Slightly injured.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7221.

शास्त्रदीपिका by पार्थसारथिमिश्र ।

ŚĀSTRADĪPIKĀ by Pārthasārathimiśra.

Foll. 1—20. Lines, 7 and 8 on a page. Extent, 600 granthas.

The other work herein is :—Śāstradīpikāvyākhyā—mayūkhamālikā.

Same work as that described under D. No. 4491 wherein neither beginning nor end has been given.

Contains the 7th and 8th Adhyayas complete.

**Beginning :**

श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात् । सू ।

उपदेशविचारे समाप्ते अधुना तदधीनसिद्धिमदतिदेशाविचारः आरभ्यते । . . . . प्रस्तोष्यते । तदुपोद्घातत्वेन आदाविदं विचार्यते । ये धर्माः दर्शपूर्णमासयोः ज्योतिष्टोमप्रकरणे च समाम्नाताः प्रयाजादयो दीक्षणीयादयश्च । ते स . . . किं सर्वयागार्थत्वेनोपदिश्यते उत यथाप्रकरणं व्यवतिष्ठत इति । यदि सर्वयागार्थाः

ततः सौर्यश्येनानामपि उपदेशत एवाङ्गलाभात् नातिदेशापे . . . ' . . . . . . क्ष . . . . अतिदेशाविचारो नारब्धव्यो भवति ।

**End :**

प्रासङ्गिकं समाप्य दर्वीहोमाः किं पूर्ववन्तः उत अपूर्वा इति विचार्यते । तत्राश्रुतेतिकर्तव्यताकत्वात् अव्यक्तत्वाच्च सौमिकाविध्यन्तः प्रवर्तेत । यागहोमत्वेनात्यन्तविसदृशत्वाद्धोमानामेवाग्निहोत्रनारिष्टादीनां धर्मवत्तासद्भावात् न तदतिक्रमेण सोमयागाश्रयणं युक्तम् । अस्तु तत्प्रकृतिकत्वमेव । नैवं नारिष्टाङ्गयुतानामिध्मीदीनां त्र्यम्बकहोमेष्वभाव-दर्शनाल्लिङ्गान्तराणि दर्शितानि दर्वीहोमपूर्वत्वं सूचयन्ति ।

तस्मादपूर्वाः । संक्षेपविस्तारकस्सापवादः सदृक्तानुमानात् तथा नामधेयात् । अधीताच्च वाक्यात् प्रसिद्धोऽतिदेशः करिष्यामहे तम-परमूहचिन्ताम् ।

**Colophon :**

इति पार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायामष्टमस्याध्यायस्य चतुर्थः पादः ।

। समाप्तश्चाध्यायः ।

---

R. No. 7222.

शास्त्रदीपिकाव्याख्या—मयूखमालिका by सोमनाथ ।

ŚĀSTRADĪPIKĀVYĀKHYĀ—MAYŪKHAMĀLIKĀ by Somanātha.

Foll. 21—204. Lines, 7—9 on a page. Extent, 6,000 granthas.

Begins on fol. 21 (*a*) of the manuscript described under the previous number.

Same work as that described under D. No. 4505 wherein neither the beginning nor the end has been mentioned.

Contains adhyayas 3 to 6 complete.

**Beginning :**

सू—अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा ।

हेतुहेतुमद्भावसङ्गत्या शेषलक्षणानन्तरं प्रयुक्तिलक्षणमारभ्यत इति प्रतिजानीते प्रसिद्ध इति । पूर्वस्मिन् अध्याये पदार्थानां शेषशेषिभावे सिद्धे सत्ययं पदार्थोऽनेनानुष्ठाप्यते । अयमनेनेत्येवमस्मिन् अध्यायेऽनुष्ठानापरपर्याया प्रयुक्तिरुच्यत इत्यर्थः । प्रसिद्धे शेषशेषित्व इत्यनन विवक्षितस्य हेतुहेतुमद्भावस्य शङ्काया अनुपपत्तिं मत्वा समर्थयते—शेषशेषिणैवेति । तामेवाशङ्कां दर्शयन् तदुत्तरत्वेनोत्तरार्धं व्याचष्टे—यद्यपीत्यादिना ।

**End :**

सामान्यमिति पशुशब्दस्य पशुत्वसामान्यार्थत्वं तन्त्ररत्ने प्रपञ्चितमिति भावः । नित्यमिति यवानां प्रातिस्विकविधिविधेयत्वात् तत्प्रकाशनासामर्थ्येन तत्र प्रकरणावगतनित्यत्वं परित्यज्य इह तु पश्वन्तराणां प्रातिस्विकविध्यप्रकरणावगतं नित्यत्वं विना कारणं न परित्याज्यमिति भावः । तस्मादिति—तथा च छागेनैव पशुयागे अधिकार इति भावः । अन्यायार्थमुपसंहरन् शिष्यहितार्थं वृत्तवर्तिष्यमाणषट्कद्वयार्थं सङ्गृह्णाति अधिकाति ।

**Colophon :**

इति श्रीनिट्ठलकुलतिलकसूरिभट्टमहोपाध्यायतनूभवस्य वेङ्कटाद्रियज्वगुरुचरणानुजस्य सोमनाथयज्वनः कृतौ शास्त्रदीपिकाव्याख्यायां मयूखमालिकाख्यायां षष्टस्याध्यायस्याष्टमः पादः ।

अध्यायश्च समाप्तः ।

The Scribe adds :—

। करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।

---

R. No. 7223.

Palm leaf. 9⅝ and 9 11/16 × 1⅜ inches. Foll. 35. Lines, 8 and 9 on a page. Grantha. Slightly injured. Extent,

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

नवीनमतविचारः by हरिराम ।

NAVĪNAMATAVICĀRAḤ by Harirāma.

This is a discussion on Parāmarśa or deduction according to the latest logicians.

Wants the beginning. Otherwise complete.

**Beginning :**

वस्तुतस्तु तद्धत्ताग्रहं प्रत्यपि तद्धर्मिकावृत्तित्वग्रहस्यापि विरोधित्वमनेकग्रन्थकारसम्मतं सयुक्तिकञ्च । तत्कल्पने पर्वतो वह्निमानित्याकारकानुमितौ वह्निवृत्तिरित्यादिविशेषणतावच्छेदकनिर्णयादिघटिताया इच्छादिविशिष्टाया अवृत्तिर्वह्निरित्याकारकविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षससामग्र्या प्रतिबन्धकत्वाकल्पनेन लाघवसम्भवात् । तथा गगनमवृत्ति इत्येतादृशज्ञानकाले गगनादिप्रकारकज्ञानमपि नोत्पद्यत इति वदन्ति । अत्रेदं चिन्तयामः—व्यापकसामानाधिकरण्यज्ञानस्यैवानुमितिहेतुत्वमुचितम् । तथा सति तादृशज्ञानप्रतिबध्ये अभावो न हेतुसमानाधिकरणः प्रतियोगिता नाभावीया इत्याकारक उपनीतशाब्दबोधादौ अनुमितिसामग्र्याः प्रतिबन्धकत्वाकल्पनेन लाघवसम्भवात् अनुमितिसामग्रीकाले बाधमुद्रया तादृशज्ञानं प्रतिकल्प्यप्रतिबन्धकताकस्य व्यापकसामानाधिकरण्यावगाहिज्ञानस्य तत्र सत्वात् ।

**End :**

अर्थापत्तिसामग्र्यभावअनुमितिसामग्र्यभावयोः परस्परसहकारित्वकल्पने पर्वतो वह्निमानित्यनुमितिसामग्र्यादेः वह्न्यभावव्यापकीभूताभावप्रतियोगिधूमवान् पर्वतो वह्निमानित्याकारकप्रत्यक्षेच्छाविशिष्टसामग्र्यभावादेः सहकारित्वकल्पने लाघवस्य जागरूकत्वात् । एवं तादृशप्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीकाले अर्थापत्तिसामग्र्यावश्यकत्वेन अर्थापत्तिसामग्र्यभावघटितानुमितिसामग्र्या अभावेन तदानीमनुमित्यनुत्पादनिर्वाहेण अनुमितौ तादृशसामग्र्याः प्रतिबन्धकत्वाकल्पनप्रयुक्तलाघवमप्यनुमित्यादिकं प्रति अर्थापत्त्यादिसामग्र्याः प्रतिबन्धकत्ववादिमते अक्षण्ण(त)मेवेत्याहुः ।

**Colophon :**

। इति श्रीभट्टाचार्यहरिरामतर्कालङ्कारवागीशप्रणीतो
नवीनमतविचारः समाप्तः ।

R. No. 7224.

Palm leaf. 13⅜ × 1⅜ and 1$\frac{3}{16}$ inches. Foll. 27. Lines, 6 and 7 on a page. Grantha. Injured. Extent, 450 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

रघुवंशम् सञ्जीविनीसहितम् by कालिदास ।

RAGHUVAMŚAM with the commentary SAÑJĪVINĪ OF MALLINĀTHA by Kālidāsa.

Same work as those described under D. Nos. 11636 and 11689.

Contains 11th Sarga only complete.

**Beginning :**

मू०—

कौशिकेन स किल क्षितीश्वरो राममध्वरविघातशान्तये ।
काकपक्षधरमेत्य याचितस्तेजसां हि न वयः समीक्ष्यते ॥

व्या०—

कौशिकेनेति—कुशिकापत्येन विश्वामित्रेण एत्य आगत्य स क्षितीश्वरः दशरथः अध्वरविघातशान्तये यज्ञविघ्नध्वंसनाय काकपक्षधरो बालोचितशिखाधरः। बालानां तु शिखा प्रोक्ता काकपक्षः शिखण्डक इति हलायुधः। रामं याचितः । याचतेः द्विकर्मकत्वादप्रधाने कर्मणि क्तः ।

**End :**

. . . . . . . . रम्यीऽपिकार्ये
कथञ्चि(तिचि)दवनिपालः शर्वरीः शर्वकल्पः ।
पुनरविशदयोध्या . . . . . . . .
. . . . . . . . लोचनैरङ्गनानाम् ॥

अथेति—ईषदसमाप्तः शर्वः शर्वकल्पः । ईषदसमाप्त . . . . . . . . . क्लप्तानामुपकार्या यस्मिन् सः तस्मिन् पथि । कतिचित् शर्वरीः रात्रीः । गमयित्वा . . . . . . . . यान्येषां सञ्जतरातिकूपलयिताः ! तदस्य सञ्जातं तारकादिभ्य इतच् । कूपलयिताग . . . . . . . . विष्टवान् ॥ ९३ ॥

**Colophon :**

इति रघुवंशव्याख्यायां सञ्जीवनीसमाख्यायाम् । (एकादशः सर्गः)

Scribe adds :—

दुर्मति वर्षम्—आवणिमासं 20. . . . . பேத்து. யெழுதிமு

ஒிந்தது. . . . . . . रित्रयल् पिङ्गलकृष्णस्वामिलिखितम् ।

---

R. No. 7225.

Palm leaf. 17¼ and 17⅜ × 1⅜ and 1½ inches. Foll. 46. Lines, 6 and 7 on a page. Grantha. Injured. Extent, 1,000 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

मतत्रयसारसङ्ग्रहः ।

MATATRAYASĀRASAÑGRAHAḤ.

First folio contains a small portion of Satpratipakṣa. This work begins on second folio (*a*).

A treatise supporting the conclusions of the Advaita Vedānta. First the meaning of the sutras is illustrated according to the Advaita school. Then the views of Dvaita and Visistadvaita schools of philosophy are illustrated and refuted. Neither the name nor the author of this treatise is known. Every sūtra is illustrated in the order observed by the Bhāṣyakāras.

Breaks off at the end of 24th sutra of the third pada of the first Adhyaya.

**Beginning :**

अथातो ब्रह्मजिज्ञासा—तत्र भामत्युक्तमधिकरणं—प्रत्यगात्मन एव ब्रह्मत्वात् तस्य चाहमिति प्रकाशमानत्वात् असन्दिग्धत्वेन न विषयत्वम् । नाप्यविद्यानिवृत्तिः प्रयोजनम् उक्तरीत्या आत्मनि भासमानेऽपि तदनिवृत्तेः । न च वाच्यमहमिति प्रत्ययः स्थूलोऽहं कर्ता भोक्ता दुःखीति गृह्णाति, तद्विपरीतश्च वेदान्तप्रतिपाद्यः सन्दिग्ध इति विषयसिद्धिरिति । वेदान्तानामध्ययनविध्यापादितप्रयोजनवदर्थावबोधकानामपि प्रबलाहंप्रत्ययबाधितत्वेन मन्त्रादिवत् जपमात्रोपयोगित्वेनाविवक्षितार्थत्वात् उपचरितार्थत्वाद्वा । तथा च वेदान्तविचारो नारब्धव्य इति पूर्वः पक्षः ।

**Colophon :**

हरिः । ओम् । प्रथमः पादः ।

**End :**

अन्यत्राश्रुतमप्यङ्गुष्ठमात्रत्वमीशानादिशब्दादीश्वरस्यैत्याहुः । तन्न । अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जानानां हृदये सन्निविष्टः । अंगुष्ठमात्रः पुरुषोऽङ्गुष्ठश्च समाश्रितः ईशः सर्वस्येत्यादौ ईश्वरोऽपि बहुशोऽङ्गुष्ठमात्रत्वदर्शनेन पूर्वपक्षानुत्थानात् । ईश्वरे अङ्गुष्ठमात्रत्वाभावं कृत्वाचिन्तया अधिकरणं प्रवृत्तमित्यस्य अगतिकविषयत्वात् । यत्र यत्राङ्गुष्ठमात्रत्वं श्रूयते तत्र तत्र जीव एव प्रतिपाद्यत इति पूर्वपक्ष इति चेन्न सर्वत्रापि ईश्वरविषय एवाङ्गुष्ठमात्रत्वमिति प्राणाधिप इति वाक्यमपि ईशविषय एव स्यादिति पूर्वपक्षानुत्थितिप्रमङ्गात् ।

---

R. No. 7226.

Palm leaf. 16½—17 × 1½ inches. Foll. 36. Lines, 9 and 10 on a page. Grantha. Much injured. Extent, 1,500 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

ब्रह्मसूत्रभाष्यव्याख्या — भाष्यरत्नप्रभा by गोविन्दानन्द

BRAHMASŪTRABHĀṢYA VYĀKHYĀ—BHĀṢYARATNA PRABHĀ by Govindānanda.

Same work as that described under D. No. 4679 wherein see for beginning.

Catūssūtrī almost complete.

**End :**

ब्रह्म न कार्यशेषः तद्बोधात् प्रागेव सर्वव्यवहार इत्यत्र ब्रह्मविदां गाथामुदाहरति—अपि चेति । सदबाधितं ब्रह्म पूर्णमात्मा अविषयानन्द इति सर्वसाक्ष्यहमित्येवं बोधे जाते सति पुत्रदेहादेः सत्ताबाधनात् मायामात्रत्वनिश्चयात् पुत्रदारादावहमिति स्वीयदुःखसुखभोक्तृगुणयोगात् गौणात्माभिमानस्य नरोऽहं कर्ता मूढ इति मिथ्यात्माभिमानस्य सर्वव्यवहारहेतोरसत्वे कार्यं विधिनिषेधादिव्यवहारः कथं भवेत्, हेत्वभावात् न कथञ्चिद् भवेदित्यर्थः । नन्वहं ब्रह्मेति बोधो बाधितः अहमर्थस्य

प्रमातुः ब्रह्मत्वायोगादित्याशङ्क्य प्रमातृत्वस्याज्ञानविलसितान्तःकरणतादात्म्य-कृतत्वान्न बाध इत्याह—अन्वेष्टव्येति । य आत्मापहतपाप्मा . . . . . . . . . . . |

---

R. No. 7227.

Palm leaf. $14\frac{1}{2} \times 1\frac{1}{4}$—$1\frac{3}{8}$ inches. Foll. 40. Lines, 5 to 7 on a page. Grantha. Injured. Extent, 650 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

व्युत्पत्तिवादव्याख्या ।

VYUTPATTIVĀDA VYĀKHYĀ.

A commentary on Gadādhara's Vyutpattivāda, which has been described under D. No. 4290. The name of the author of this work is not known.

Breaks off in the course of prathamā vibhakti. Foll. 39 and 40 contain Dēvīstotrās.

**Beginning :**

शाब्दबोधे च एकपदार्थे इत्यादेः एकपदार्थानुयोगिकापरपदार्थप्रतियोगिकसंसर्गः शाब्दबोधनिरूपितसंसर्गताभिन्नविषयतावानेवेत्यर्थः । चो भिन्नक्रमस्थोऽवधारणार्थः । न च ज्ञानमात्रे यथोक्तसंसर्गस्य संसर्गताख्यविषयतावत्वात् शाब्दबोध इत्यव्यावर्तकम् इति वाच्यम् । यतो हि प्रकृतवाक्यात् शाब्दबोधे पदानुपस्थितस्य अर्थस्य भानवारणाय तद्विषयकशाब्दत्वावच्छिन्नं प्रति पदजन्यतद्विषयकोपस्थितेः करणत्वमावश्यकम् । तच्च शाब्दबोधे पदानुपस्थितस्यापि संसर्गस्य भानात् व्यभिचारेणासम्भवग्रस्तम् । तत्प्रकारकशाब्दबुद्धित्वस्य तद्विशेष्यकशाब्दबुद्धित्वस्य वा कार्यतावच्छेदकत्वे विशेष्यतया प्रकारतया वा पदानुपस्थितस्यापि भानापत्ति ।

**End :**

वृत्त्यानियामकस्याभावप्रतियोगितानवच्छेदकत्वेऽपि एतादृशज्ञानदशायां राजसत्वाभाववान् पुरुषः सुन्दरः इत्याकारकविशिष्टवैशिष्ट्यबोधापत्तेः ।

न च स्वत्वसंसर्गकबोधोऽपि स्वीक्रियते स्वत्वप्रकारकबोधोऽपीति कुतस्तदापत्तिः बाधाभावघटितसामग्रीत्वेन विशेष्यतावच्छेदकप्रकारकनिर्णयाभावादेवापत्त्यभावादिति वाच्यम्। यस्य पुरुषस्य राज्ञः पुरुष इत्यादौ स्वत्वसंसर्गकबोध एव जातः तस्य तदापत्तेः दुर्वारत्वात्। किञ्च पदे पदे वृत्त्यनियामकसम्बन्धस्य . . . . . . ।

R. No. 7228.

Palm leaf. 14⅞ and 15 × 1⅜ and 1½ inches. Foll. 67. Lines, 8 and 9 on a page. Grantha. Slightly injured. Extent, 2,000 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

भामतीव्याख्या—वेदान्तकल्पतरुः by अमलानन्द।

BHĀMATĪ VYĀKHYĀ—VEDĀNTAKALPATARU by Amalānanda.

Same work as that described under D. No. 4677 wherein see for beginning.

Breaks off in the course of fourth sūtra.

**End :**

किमैन्द्रवायवादिवाक्यविहितानां यागानां सोमरसानाञ्च यथाक्रमं सोमेन यजेतेति सोमयागशब्दानुवदितारौ उत द्रव्ययुक्तस्य कर्मणो विधातारावििति। तत्रैन्द्रवायवादिवाक्येषु द्रव्यदेवताख्यरूपप्रतीतेः यागानुमानादितरत्र रूपाप्रतीतेः समुदायानुवाद इति प्राप्ते ह्रि।

कत * * * * *

तन्निवासिततच्छब्दोक्तः। पुत्रादेरुपकारकत्वारोपाद्य आत्माभिमानः तस्मिन् निवृत्ते।

R. No. 7229.

Palm leaf. 14½ to 16¾ × 1¼ to 1½ inches. Foll. 88. Lines, 5 to 11 on a page. Grantha. Much injured. Extent, 3,000 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

स्मृतिमुक्ताफलम् by वैद्यनाथदीक्षित।

SMṚTIMUKTĀPHALAM by Vaidyanāthadīkṣita.

Same work as that described under D. No. 2794 wherein see for beginning.

Contains the Śrāddha Kāṇḍa incomplete.

**End :**

अन्यथा महान् दोषः नास्य कर्मण्यधिकार इति । शतकेऽपि ।

मुख्यकर्तुरघं तावद्यावत्प्रेतविमोचनम् ।
पुत्राणामप्यघं तावत् . . . . . येपि स्थितम् ॥

इति प्रेतविमोचनम् । सपिण्डीकरणम् । अत्र मुख्यकर्तुः दशाहात् परमघविधानं सूतिकाया इव शुभकर्मानर्हत्वमात्राभिप्रायम् । 'अकृत्वा प्रेतकार्याणि नित्य . . . . . . न्यपि'। शुभकर्माणीत्यर्थः । 'न कुर्यात्तावदाशौचं यावत्प्रेतस्य मोक्षणम्' इति स्मरणात् । मुख्य-कर्तृव्यतिरिक्तज्ञातीनाम् ।

---

R. No. 7230.

Palm leaf. 16¼—17 × 1⅜ inches. Foll, 36. Lines, 6—8 on a page. Grantha. Much injured. Extent, 750 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

क्रियागोपनरामायणम्—सव्याख्यानम् by कृष्णकवि ।

KRIYĀGOPANARĀMĀYAṆAM with the commentary by Kṛsṇakavi.

Same work as that described under R. No. 7, which contains a different portion.

Contains Bāla and Ayodhyā Kāṇḍas. But wants some leaves in the middle and some portion thereby. Contains a small portion in the Āraṇya Kāṇḍa also.

**Beginning :**

लोके लोकेऽधिकं विष्णुं देवे देवे जनार्दने ।
माधवे माधवे भक्तिं कीर्तये कीर्तये हरिम् ॥

अत्र क्रियापदानि चत्वारि—लोके, देवे, धवे कीर्तये इति । लोके विष्णुमधिकं लोके, सर्वस्मात् वरं पश्यामि । आकृत्यधिकरणन्यायेन

लोकशब्दः सर्वजनपरः । यतश्च निर्धारणमिति सप्तमी । तदस्मिन्नधिकमिति निर्देशात् अधिकशब्दप्रयोगे वा सप्तमी । लोके लोकावहे लोकामहे । लोकृ दर्शने । ज्ञानसामान्यार्थकोऽयम् । पश्यार्थैश्चानालोचने इति व्याकरणस्मृतिः ।

**Colophon :**

पुत्रोऽहं रघुनाथदीक्षितगुरोः श्रीकृष्णनामा कविः
काव्यं चन्द्रकलाविलासमतुलं सद्भाग्यराज्यावहम् ।
आद्यं तत्र कलाविलासमगदं श्रीरामचर्यां शुभा-
मध्यायञ्च समाप्य मङ्गलशतैरानन्दमत्यद्भुतम् ॥

**End :**

तत्र शूर्पणखा नाम राक्षसी कामरूपिणी ।
अमलन्निस्तुलं रूपं स्वर्गस्त्रीविभ्रमावहम् ॥

व्या—अमलत् अमलतां अमलन् । मल मल्ल धारणे । दिव्यस्त्रीरूपं धृतवतीत्यर्थः । शूर्पमिव नखं यस्याः सा शूर्पणखा । नखमुखात् संज्ञायमिति ङीप् प्रत्ययनिषेधः । पूर्वपदात् संज्ञायामिति णत्वम् । स्वर्गस्त्रियाः विभ्रमं विलासं आवहतिती करोतीति तथोक्तं विलासमित्यर्थः । युवतिषु कोमलमाल्यमालिनीषु इति माघप्रयोगः ।

---

(R. Nos. 7231 and 7232 one bundle.)

Palm leaf. 14¼ and 14⅜ × 2 inches. Foll. 46. Lines, 10—12 on a page. Grantha. Injured.

Purchased in 1939-40 from Sri T. S. Krishna Aiyor, Advocate, Triplicane, Madras.

R. No. 7231.

गीतगोविन्दम्—सव्याख्यानम् ।

GĪTAGOVINDAM with the commentary.

Foll. 1—14. Extent, 450 granthas.

The other work herein is—Bhojacaritra, fol. 15 (*a*).

A commentary on the famous Gitagovinda of Jayadeva which has been described under D. No. 11937.

Commences with the beginning and breaks off in the course of the 10th stanza of the second sarga.

**Beginning :**

नन्दहस्तमवलम्ब्य पाणिना मन्दमन्दमरविन्दलोचनः ।
सञ्चरन् कनककिङ्किणीरवः सन्ततं मम तनोतु मङ्गलम् ॥

श्रीमान् जयदेवकविः गीतगोविन्दाख्यं प्रबन्धमारभमाणः तत्प्रतिपाद्यं वस्तु निर्दिशति—मेघैरिति ।

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैः
नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुम
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥

**End :**

श्रीजयदेवभणितमिदमद्भुतमधुरिपुमोहनरूपम् ।
हरिचरणस्मरणं प्रति सम्प्रति पुण्यवतामनुरूपम् ॥

रासे हरिमिह विहितविलासम् ।
स्मरति मनो मम कृतपरिभासम् ॥

श्रीजयदेवेन भणितं कथितमिदं गीतमद्भुतं सर्वाश्चर्यकरम् अत एव मोहनं सर्वचित्ताकर्षकं मधुरिपोः कृष्णस्य रूपं शृङ्गारादिस्वरूपं यस्मिन् तादृशमत एव सम्प्रति इदानीं हरिचरणस्मरणं प्रति पुण्यवतां पुण्यपरिपाकशालिनां श्रवणादिद्वारेण अनुरूपं साधनं भवत्विति शेषः ॥ ९ ॥
अथ स्वपरित्यागिनि श्रीकृष्णे विहरमाणे स्वकीयं मन उपालम्भते—

गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते वहति च ।
परितोषं दोषं विमुञ्चति दूरतः युवतिषु कृष्णे ॥

विहारिणि मां विना पुनरपि मनो वानं कामंकरोति किम् । हे सखि मनो मदीयं चेतः ।

R. No. 7232.

भोजचरित्रम् by वल्लभपण्डित ।

BHOJACARITRAM by Vallabhapaṇḍita.

Foll. 15—46. Extent, 1,000 granthas.

Begins on fol. 15 (*a*) of the manuscript described under the previous number.

Same work as that described under D. No. 12202.

Wants the beginning and end; otherwise complete.

**Beginning :**

त्यनुसारेण परम् । श्रीभोजमितः प्रेषय । ततो राजाज्ञया भोजेऽध्ययनशालां प्राप्ते विप्रः प्राह—

पञ्चाशत्पञ्चवर्षाणि सप्तमासान् दिनत्रयम् ।
भोजराजेन भोक्तव्यः सगौडो दक्षिणापथः । इति ॥

**End :**

राजानं स्तौति—

अनेके फणिनः सन्ति भेकभक्षणतत्पराः ।
एक एव हि शेषोऽयं धरणीधरणक्षमः ॥

. . . . . . . . ज्ञात्वा तस्मै लक्षं ददौ ।

कदाचित् हेमन्तकाले समागते ज्वलन्तीं हसन्तीं संसेवयन् राजा कालिदासं प्राह—कषे ! हसन्तीं . . . . . . ।

---

R. No. 7233.

Palm leaf. 11⅝—12¾ × 1½ inches, Foll. 34. Lines, 8 and 9 on a page. Grantha. Much injured. Extent, 1,100 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

तैत्तिरीयोपनिषद्व्याख्या—लघुदीपिका ।

TAITTIRĪYOPANIṢADVYĀKHYĀ—LAGHU DĪPIKĀ.

Same work as that described under D. No. 515 which does not contain some portion, found herein, in the beginning.

Complete. But all the leaves have been eaten away by white-ants in the left side.

**Beginning :**

. . . . . . . ति करणं यत् ।
भास्वरमतीव तेषां मध्यमवर्णाभिधेयमहमीडे ॥

यदिति निपातः । य से . . . . . . ।

. . . . . . . व्रजपतेः सम्बोधनं कीदृशं
का वा पद्मजवक्त्रपद्मनिवहं हंसीव संसेवते ।
कृष्णानन्दसरस्वती हावि . . . . . . .
सरस्वती सकरूणां पूर्णां विदध्यान्मयि ॥

कृष्णानन्दसरस्वति ब्रह्मानन्दसमुद्रे । सरस्वान् सागरोऽर्णवः इत्यमरः ।
स्पष्ट ।

. . . . . . . . गान्निदानं
बाह्योपघातानखिलान् निरस्य ।
बौद्धाश्च बुद्धिप्रतिबन्धका ये
बुद्धौ चिदानन्दघनश्चकास्तु ॥

*　　*　　*　　*　　*　　*

यत्संदर्शितमार्गेण गन्तुं मन्दधियोऽप्यलम् ।
श्रीरामं गुरुमानम्य सम्प्रदायानुसारतः ॥

. . . . . . . . दीपिका । सेयं तैत्तिरीयोपनिषत् त्रिविधा ।

**End :**

विद्यारण्यकृतव्याख्यादुग्धाब्धिं पातुमक्षमाः ।
तस्मात् समुद्धृतं सारं तृप्तिदं ते पिबन्त्वमुम् ॥

. . . . . रामाभिधसन्मणिः ।
कृत्यानया प्रसन्नस्सन् हार्दं हरतु मे तमः ॥

**Colophon :**

इति वारुण्युपनिषदि लघुदीपिकायां भृगुवल्याख्यः तृतीयोऽनुवाकः ।

R. No. 7234.

Palm leaf. 16 × 1½ and 1⅜ inches. Foll. 93. Lines, 9 on a page. Grantha. Slightly injured. Extent, 3,000 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

न्यायामृतम् by व्यासतीर्थ ।

NYĀYĀMṚTAM by Vyāsatīrtha.

Same work as that described under R. No. 871 which consists of a different portion.

Contains the last three paricchedas, viz., II, III and IV complete. But a small portion is wanting in the beginning of the II pariccheda.

**Beginning :**

नित्यत्वोक्तिसामर्थ्यात् विषयाबाधलक्षणप्रामाण्यस्यौत्सर्गिकत्वात् सत्यस्सो अस्य महिमेत्यादि श्रुतेश्च तात्सिद्धेः । अन्यथा सत्यं ज्ञानं तत्वमसीत्यादि श्रुत्युक्तं ब्रह्मसत्वैक्यादिकमपि तात्विकं ब्रह्म न स्यात् । निर्गुणश्रुतिविरोधस्तूद्धरिष्यत । किञ्च तद्विरोधेऽपि श्रुतेर्नातात्विकविषयता युक्ता—उक्तं हि को हि मीमांसको ब्रूयात् विरोधे शास्त्रयोर्मिथः । एकं प्रमाणमितरत्त्वप्रमाणं भवेदिति । तथा हि—

**End :**

उक्तश्च—ग्रामस्था अपि न ग्राम्या वैलक्षण्याद्धि सज्जना—इति । कथं देहेष्वेव जयादिषु देहेन्द्रियाद्युहीनाना इत्युक्तिः । तस्मात् फलाध्यायोक्तन्यायैः तरतमभावापन्नमुक्तामुक्तब्रह्मरुद्रादिनियामको भगवान् श्रीपतिः सर्वोत्तम इति सिद्धम् ।

नमो निरस्तदोषाय समस्तगुणराशये ।
विमलानन्ददेहाय कमलापतये सदा ॥
मत्प्रेरकेण हरिणा पूजायाः स्वस्य कारिता ।
वाग्यज्ञरूपा लक्ष्मीशः तया प्रीणातु केशवः ।

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मण्यपादपूज्यपादशिष्यश्रीमद्व्यासतीर्थविरचिते न्यायामृते चतुर्थः परिच्छेदः ।

॥ न्यायामृतं समाप्तम् ॥

R. No. 7235.

Palm leaf. 18¼ and 18⅜ × 1⅝ and 1⅞ inches. Foll. 172. Lines, 7—9 on a page. Grantha. Injured. Extent, 7,000 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate. Triplicane, Madras.

कृष्णयजुर्वेदारण्यकभाष्यम् by भट्टभास्कर ।

KṚṢṆAYAJURVEDĀRAṆYAKABHĀṢYAM by BHAṬṬA BHĀSKARA.

Same work as those described under D. Nos. 181 and 182. But the fifth and sixth prapāṭhakas have been written after the eighth prapāṭhaka.

Contains all the eight prapāṭhakas among which the prapāṭhakas 2 and 4 break off in the course of 6th and 9th Anuvākas respectively.

---

(R. Nos. 7236 and 7237 one bundle.)

Palm leaf. 13—16⅜ × 1⅜ and 1½ inches. Foll. 108. Lines, 7 and 8 on a page. Grantha. Torn and slightly injured.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate. Triplicane, Madras.

R. No. 7236.

शारीरकमीमांसान्यायसङ्ग्रहः ।

ŚĀRĪRAKAMĪMĀMSĀNYĀYASAṄGRAHAḤ.

Foll. 1—50. Extent, 1,200 granthas.

The other work herein is—Vaiyāsikasūtropanyāṣaḥ.

Same work as that described under R. No. 3732.

The left sides of the leaves have been eaten away by white-ants. Otherwise complete in 4 adhyāyas.

**Beginning :**

प्रणम्य प्रणतार्तीनां हर्तारं विष्णुमव्ययम् ।
शारीरकस्य संक्षेपात् क्रियते न्यायसङ्ग्रहः ॥

अथातो ब्रह्मजिज्ञासा ।

अत्र विधिः खलु सर्वत्र · · · · · येन्यतो प्राप्तविषयतत्साध्य-फलानुबन्धत्रयमवेक्ष्य प्रवृत्तिपर्यन्तो भवति यजेतेत्यादिवदिति न्यायेन बन्ध-विश्लेषनिमित्तब्रह्मानुभवस्य केवलदृष्टसाधनसाध्यत्वाभावस्य वक्ष्यमाणत्वात् ।

साधनवेदान्तवाक्यविचारत्रिषयानुबन्धत्रयोपेतविधौ वक्तव्ये कर्तृत्वभोक्तृत्व-तच्छक्तिलक्षणस्यात्मनिबन्धस्य परमार्थसत्यतया ब्रह्मानुभवनिरस्यत्वासम्भवे फलानुबन्धाभावात् ।

**End :**

अत एव तेनादूष्यत्वात् तस्माद्विप्रलम्भमात्रद्वैतिनां मुक्तेरङ्गीकरणवाद इति । न च वेदान्तैकद्वेषिणां द्वैतिनामे · · · · · षयितुञ्च शक्यते जगद्व्यापारवर्जने सिद्धसाधनत्वात्। विद्यान्तरगोचरभोगसाम्यस्य मुक्तावप्राप्तेः। अतो दूषयितुमशक्यम् । अदूषणत्वादप्राप्ते · · · · · · · न्तरदूषण-साधनेऽपि तथा । तस्मात् कार्यब्रह्मप्राप्तिसगुणविद्याविपाकोऽयमिति सिद्धम् ।

**Colophon :**

इति शारीरकमीमांसान्यायसङ्ग्रहे भगवन् · · · · · · · चिते चतुर्थस्याध्यायस्य चतुर्थः पादः ।

। समाप्तश्चाध्यायः ।

---

R. No. 7237.

वैयासिकसूत्रोपन्यासः ।

VAIYĀSIKASŪTROPANYĀSAḤ.

Foll. 51 to 108. Lines, 7 and 8 on a page. Extent, 2,000 granthas.

Begins on fol. 51 (*a*) of the manuscript described under the previous number.

Same work as that described under D. No. 4639.

Breaks off in the course of the 13th sūtra of the third pāda of the second adhyaya. Further the left sides of the leaves have been eaten away by rats or white-ants.

**Beginning :**

· · · · · · · कल्याणगुणशालिने ।
कृष्णानन्दसरस्वत्यै करवै गुरवे नमः ॥

बोधानन्दगणाध्यक्षं कालमूषिकवाहनम् ।
जन्मादिविघ्नहन्तारं भजे निजगुरुं सदा ॥

विद्याशङ्करपादाब्जपरागाः पान्तु पावनाः ।
. . . . . . . साक्षात्करणहेतवः ॥

नमामि शुद्धविज्ञानमात्मभारतिसद्गुरुम् ।
यस्यावलोकनान्मूको वावदूकत्वमाप्नुयात् ॥

आचार्यभाष्यतट्टीकातन्निबन्धनसागरात् ।
सदर्थरत्नान्युद्धृत्य सूत्रेषु ग्रथयाम्यहम् ॥

अथातो ब्रह्मजिज्ञासा—

**Colophon :**

इति वैयासिकासूत्रोपन्यासे प्रथमस्याध्यायस्य द्वितीयः पादः ।

**End :**

यत् कृष्णं तदन्नस्येति वाक्यशेषे पृथिव्यनुगुणरूपवत्वश्रवणात् तद्यदपां शर आसीत् तत्समहन्यत सा . . . . . . . . त्यन्नशब्दः पृथिवीपर इति निर्णीयते । लिङ्गप्रकरणसहितायाः श्रुत्यन्तरसमानार्थाया अद्भ्यः पृथिवीति श्रुतेर्बलीयस्त्वात्तस्म . . . . . . . . . . ।

(तद)भिध्यानादेव तु तल्लिङ्गात् सः

सृष्टिकामे तु भूतानामविरोधो निरूपितः । इदानीं तदधिष्टातृ देवतासुनिरू . . . . . . ।

---

(R. Nos. 7238 and 7239 one bnndle.)

Palm-leaf. 16½ and 17¼ × 1⅜ and 1¼ inches. Foll. 106, Lines. 7 to 10 on a page. Telugu and Grantha. Slightly injured.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7238.

आनन्दमयाधिकरणविचारः ।

ĀNANDAMAYĀDHIKARAṆAVICĀRAḤ.

Foll. 1 to 16. Telugu. Extent, 500 granthas.

The other work herein is Laghucandrikāvyākhyā, fol. 17 (*a*).

An independent treatise on Ānandamayādhikaraṇa according to the Advaitha school of thought. The name of this work is not to be identified. From the substance dealt with herein the abovementioned name has been given.

Wants both the beginning and end.

**Beginning :**

. . . धा तैत्तिरीयके ब्रह्मविदाप्नोतपरमिति . . . . . . . . . . मिति तस्य . . . . ध्यनुप्रवेशेन प्रत्यक्षेत्वक्तुमुक्त्वा तं प्रत्यगात्मानं स्थूलसूक्ष्मतरसूक्ष्मतमोपाधिविवेकेन दर्शयन्ती श्रुतिः—पञ्चकोशानवतार्य विज्ञानं . . . . . . . . . . श्लोकेन विज्ञानमयस्याहंबुद्धिविषयस्य निखिलकर्तृत्वमुक्त्वा ततोऽन्यस्वरूपं तस्य रूपान्तराभिप्रायेणाह—अन्योऽन्तर आत्मा आनन्दमय इति । अतो न क . . . . . . एव जीवः । नन्वानन्दमयो न जीवः किंतु ब्रह्मैव, अन्नमयादेरिवानन्दमयादन्यस्यानिर्देशात् । आनन्दमयस्यैव प्राकरणिकत्वादिति चेत् नहीदं प्रकर . . . . . . पर्यवसितम् ।

**End :**

अथार्थप्रकाशत्वेन तदा स्वरूपचैतन्यस्यापि तथात्वापत्तेः । नाप्यविद्यानिवृत्तिः स्यादिति तन्मन्दम् । अन्वयव्यतिरेकाभ्यामपरोक्षप्रमाणज्ञानत्वेन तन्निवर्त्यस्यैव विद्यात्वात् केवलसाक्षिणो विद्यासाधकत्वाच्च नाविद्यानिवर्तकत्वम् । न चैवं सहकृतादपि तस्मात् कथं निवृत्तिरिति वाच्यम् साधकस्यापीश्वरज्ञानस्यैव सहकारिविशेषान्निवर्तकत्वापत्तेः । तस्माद्यथा परमते संशयस्य स्थाणुत्वादिवैशिष्ट्यविषयत्वेऽपि न संशयविरोधित्वं संशयधाराविलोपप्रसङ्गात् किंतु निश्चयस्यैव । तथैवान्वयव्यतिरेकदर्शनात् । तत्रापि प्रमेय . . . .

R. No. 7239.

लघुचन्द्रिकाव्याख्या—विट्ठलेशीया ।

LAGHUCANDRIKĀVYĀKHYĀ—VIṬṬHALEŚĪYĀ.

Foll. 17 to 106. Grantha. Extent, 2,500 granthas.

Begins on fol. 17 (*a*) of the manuscript described under the previous number.

Same work as that described under R. No. 1300.

Begins with the Prapañcamithyātvavicāra and breaks off in the course of Dvitīya mithyātva vicāra.

**Beginning :**

मिथ्याशब्दार्थत्वरूपमिति रूपपदघटितपाठो न समञ्जसः । किन्तु मिथ्याशब्दार्थत्वमित्येव । ननु तावदन्यतमत्वमपि सामान्यरूपं कुतो नेहोच्यते इत्यत आह—नन्विति । स्वोक्ते असाम्प्रदायिकत्वं परिहरति—मिथ्याशब्दार्थत्वरूपेणेति बोधने अन्वयः । नन्वेवं तावत् सदसत्वानधिकरणत्वरूपमनिर्वाच्यत्वं मिथ्याशब्देन साध्यतया तादात्म्येन पक्षविशेषणतया निर्देष्टुमर्हमित्यर्थो न तावदित्यादेर्वाच्यः तथा चासङ्गतिः । तादृशानिर्वाच्यत्वस्य तादात्म्येन प्रपञ्चरूपपक्षे बाधेन तस्य तथानिर्देशस्याप्रसक्तेः खण्डनवैयर्थ्यात् । तादृशानिर्वाच्यत्वाश्रयस्यैव तथा निर्देशप्रसक्तेरित्यत आह—अथवेति ।

**End :**

इह रजतमिति पाठः । एवं रजतोपरि इति पाठः । असम्भवादिति समानविषयकत्वं न प्रतिबन्धकतायां तन्त्रम् । अपि तु समानप्रकारकत्वमिति । यथा एवं समानसंसर्गकत्वं न तन्त्रं किन्तु समान संसर्गतावच्छेदकत्वमेवेति भावः । यद्वा एतावता ब . . . . . . . शुक्तौ रजतविशिष्टबुद्धिर्वारिता । इदानीं शुक्तौ रजतत्वविशिष्टबुद्धिं वारयितुं शङ्कते—न चेति । शङ्कायामिह रजतत्वमिति पाठः । समाधत्ते न च शुक्त्युपरि इत्येव पाठः । व्यावहारिकत्वस्य मिथ्यात्वाघटकत्वात् व्याचष्टे व्यावहारिकमिति । व्यावहारिकत्वस्येति ।

(R. Nos. 7240 to 7240 (*b*) one bundle.)

Palm-leaf. 15⅝ and 16¼ × 1⅜ and 1⅝ inches. Foll. 42. Lines, 8 to 12 on a page. Grantha. Slightly injured.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7240.

मुक्तिविचारः ।

MUKTIVICĀRAḤ.

Foll. 1 to 9. Lines, 8 and 9 on a page. Extent, 250 granthas.

The other works herein are :—Muktivicāra vyākhyā, fol. 10 (*a*). Muktāvalī vyākhyā-mañjūṣā, 22 (*a*).

A treatise on Eternal salvation according to the Advaita school of thought. This deals with the nature of salvation, etc. Deals with the following topics :—

१. अविद्यानिवृत्तिनिरूपणम् ।

२. अविद्यानिवर्तकनिरूपणम् ।

३. जीवन्मुक्त्युपपत्तिः ।

४. मुक्तौ तारतम्यभङ्गः ।

Complete.

**Beginning :**

मुक्तिस्तावदविद्यानिवृत्तिर्न संभवति । तथा हि—तत् किमात्मरूपा तद्भिन्ना वा ? नाद्यः असाध्यत्वापत्तेः । द्वितीयेऽपि किं सती ? मिथ्या वा ? आद्येऽद्वैतहानिः । द्वितीये अविद्यातत्कार्यान्यतरत्वापत्तिः इति चेन्न । चरमवृत्त्युपलक्षितस्यात्मनोऽज्ञानहानिरूपत्वात् । तथा चोपलक्षणस्य साध्यतयैव साध्यता । न चोपलक्षणनिवृत्त्या मुक्तेरपि निवृत्तिः । पाके निवृत्ते पाचकानिवृत्तिदर्शनात् । तदुक्तम्—

निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः ।
उपलक्षणनाशेऽपि स्यान्मुक्तिः पाचकादिवत् ।

॥ इति ॥

**End :**

साक्षान्मोक्षधर्मे च—साधनतारतम्येन साध्ये तदुक्तिरिति तन्न साध-नोत्तमत्वेन साध्योत्तमत्वस्यापरमुक्तिविषयत्वात् । विज्ञातगताधिक्योक्तेरपि साक्षात्कारप्रयोजकसगुणविषयज्ञानपरत्वाच्च । अत एव दहरादिविद्या-नामधिकाल्पगुणविषयत्वेन साधनतारतम्यं यत् पराभिमतं तदप्येवमिति न कश्चिद्दोषः । तस्मात् स्वरूपानन्दस्य स्वप्रकाशात्मरूपिणः प्राप्तिर्मुक्तिः न तत्रास्ति तारतम्यं कथञ्चन ।

---

R. No. 7240 (*a*).

मुक्तिविचारव्याख्या ।

MUKTIVICĀRA VYĀKHYĀ.

Foll. 10 to 21 (*a*). Lines, 8 and 9 on a page. Extent, 300 granthas.

Begins on fol. 10 (*a*) of the manuscript described under R. No. 7240.

A commentary on Muktivicāra which has been described under the previous number, viz., 7240. It appears that the author of this work should be a disciple of one Nārāyaṇa tīrtha.

Almost complete.

**Beginning :**

श्रीनारायणतीर्थानां पादाम्बुजरजो (भजे) ।
य . . . . नु . . . . . . . . . ॥

. . . . यैति—तन्नाशनास्येत्यर्थः । पाके . . . . . . . . . . । उपलक्षितस्य नाश इति व्यवहारे उपलक्षणस्य प्रतियोगित्वेन . . . . . . . । तन्नाशमादाय न स इति भावः । ननु पाको-पलक्षितत्वं स्वसंबन्धिना पाकेन स्वेतरस्माद्व्यावर्तितस्वं । तथा च पाक-संबन्धात् पूर्वमपि चैत्रादावनुमानादिना तस्य ज्ञातत्वे तदस्त्येवेत्यत आह—व्यवह्रियते वेति । पाकसंबन्धात् पूर्वमित्यनुषज्यते । पूर्वकालमादाय इदानीमयं पाचक इति व्यवह्रियते नेत्यर्थः ।

**End :**

निरुपाधिक इति—निरञ्जनः परमं साम्यमित्यादिश्रुतिन्या . . . . तिरुपाधिकेत्यर्थः । एतेनाश्रयासिद्ध्यादिना स्वसजातीयेति निगडबन्धनिवृत्तित्वाविद्यानिवृत्तित्वान्यतररूपेण स्व . . . जातीयेत्यर्थः । गुणगतजाति . . . . . दिव्याप्यजाति विशेषाणामेव तारतम्यव्यवहारास्पदत्वं तद्वृत्तिधर्मस्यैव तत्प्रतियोगिकतारतम्यशब्देन . . . . धाने मुक्तानन्द . . . . . कजातीयत्वेऽपि . . . . . . मात्रविषयकधीविषयत्वमादाय . . . . . न्तर . . . . . निरतिशयत्वात् निरतिशयात्मरूपत्वात् । उभयवादिसिद्धेनेति स्वरूपानन्दस्य मुक्तावा . . . भावः ।

---

R. No. 7240 (*b*).

मुक्तावलीव्याख्या—मञ्जूषा ।

MUKTĀVALĪVYĀKHYĀ—MAÑJŪṢĀ.

Foll. 22 to 42. Lines, 11 and 12 on a page. Extent, 1,000 granthas.

Begins on fol. 22 (*a*) of the manuscript described under R. No. 7240.

Same work as that described under D. No. 3977.

Commences in the course of the Pṛthivi grantha and ends with the end of the same.

**Beginning :**

. . . न नैव शङ्कते—न चेति । नायं नियमो नैयायिकानामावश्यकः किन्तु महत्त्वोद्भूतरूपादिकारणसमवधानं यत्र तत्र दृश्यत्वम् । तदभावे तदभाव इत्येवास्माकं नियमस्तावतैव चक्षुरादौ परमाणुद्व्यणुकयोश्च प्रत्यक्षत्ववारणात् । न च सौगतमतेऽपीदं संभवति । परमाणोर्महत्त्वाभावेन घटव्यपदेशभाजोऽपि तस्याप्रत्यक्षप्रसङ्गात् । अतः चक्षुस्सन्ततौ सर्वेषामदृश्यत्वं घटसन्ततौ सर्वेषां दृश्यत्वं च पूर्वोक्तनियमाभ्युपगमेनैव त्वया उपपादनीयम् । तच्च न संभवति ।

**End :**

केचित्तु शरीरेन्द्रियभिन्नविशिष्टविषयत्वमिह विभाजकमतो नोक्तदोषः। भेदेनोपन्यास इत्यस्य शरीरेन्द्रियभिन्नत्वविशिष्टविषयत्वेन रूपेण विभाग इत्यर्थः। देहमिन्द्रियं विषयस्तथेति मूलेऽपि देहमिन्द्रियं तथा शरीरेन्द्रियभिन्नो विषयश्चेति त्रिधेत्यर्थ इत्याहुः।

---

R. No. 7241.

Palm-leaf. 15⅛—15½ × 1⅜—1⅝ inches. Foll. 38. Lines, 9 to 11 on a page. Grantha. Slightly injured. Extent, 1,250 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

देवीमाहात्म्यम्।

DEVĪMĀHĀTMYAM.

Same work as that described under D. No. 2444.

The Māhātmya proper consisting of 13 adhyāyas is in the same order as that of the abovementioned work. Other adhyāyas are in different order.

There are also some omissions and additions of adhyāyas. The chapters other than the Māhātmya proper are called Navāṅgam and a list of it has been given in the beginning. The subject-matter of the chapters as found in the colophon is as follows :—

१. नामस्तोत्रम्।
२. अर्गलस्तोत्रम्।
३. कीलकस्तोत्रम्।
४. चण्डिकाहृदयम्।
५. सप्तशतीध्यानम्।
६. देवीकवचस्तोत्रम्।
७. मधुकैटभवधः।
८. महिषासुरसैन्यवधः।
९. महिषासुरवधः।
१०. शक्रादिस्तुतिः।
११. देवीदूतसंवादः।

१२. धूम्रलोचनवधः ।
१३. चण्डमुण्डवधः ।
१४. रक्तबीजवधः ।
१५. निशुम्भवधः ।
१६. शुम्भवधः ।
१७. देवतास्तुतिः ।
१८. भगवतीवाक्यम् ।
१९. सुरथवैश्ययोः वरप्रदानम् ।

**Beginning :**

न्यासन्नावहनञ्चैव नामान्यर्गलकीळकम् ।
हृदयञ्च दलञ्चैव ध्यानं कवचमेव च ॥

माहात्म्यं च जपेन्नित्यं पाठो यद्वृद्धिप्रकारतः ।
हरलोके सुखं स्थित्वा चान्ते सायुज्यमाप्नुयात् ॥

पादयोर्वाराह्यै नमः ।
नितम्बे नारसिंह्यै नमः ।
ऊर्वोरुद्राण्यै नमः ।
नाभौ चामुण्डायै नमः ।

**End :**

देवा ऊचुः—

मातः सप्तशतीस्तोत्रफलश्रुतिरिहोच्यते ।
यां समाकर्ण्य जीवानां विश्वासो जायते भृशम् ॥

ऋषिरुवाच—

इतिवाक्यं समाकर्ण्य ब्रह्मविष्णुशिवोदितम् ।
फलश्रुतिमथोवाच स्तोत्रस्यास्य महामते ॥

**Colophon :**

इति श्रीरुद्रयामले घटतन्त्रे सप्तशातिकायां त्रयोदशोऽध्यायः ।

R. No. 7242.

Palm-leaf. 14⅞ and 15⅝ × 1⅛ and 1¼ inches. Foll. 56. Lines, 6 and 7 on a page. Telugu. Much injured. Extent, 1,500 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

ब्रह्मसूत्रभाष्यम् by शङ्करभगवत्पादः ।

BRAHMASŪTRABHĀṢYAM by Śaṅkara Bhagavatpāda.

Same work as that described under D. No. 4659, wherein see for beginning.

Breaks off in the course of the 5th sūtra of the third pāda of the first adhyāya.

**End :**

सू--भेदव्यपदेशात्—भा—भेदव्यपदेशश्चेह भवति—'तमेवैकं जानथ आत्मानम्' इति ज्ञेयज्ञातृभावेन । तत्र प्राणभृत्तावन्मुमुक्षुत्वाज्ज्ञाता, परिशेषादात्मशब्दवाच्यं ब्रह्म ज्ञेयं द्युभ्वाद्यायतनमिति गम्यते, न प्राणभृत् ।

कुतः पुनः प्राणभृत् द्युभ्वाद्यायतनत्वेनाश्रयितव्यः--

सू--प्रकरणात् ।

---

(R. No. 7243 to 7245 one bundle.)

Palm-leaf. 10¼ × 1½ inches. Foll. 43. Lines, 8 and 9 on a page. Grantha. Slightly injured.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7243.

ईशावास्योपनिषद्भाष्यटिप्पणम् ।

ĪŚĀVĀSYOPANIṢADBHĀṢYAṬIPPANAM.

Foll. 1 13 (*a*). Extent, 200 granthas.

The other works here in are :—Talavakāropaniṣadbhāṣyaṭippaṇam 13 (*a*), Kāṭhakopaniṣadbhāṣyaṭippaṇam, 26 (*a*).

Same work as that described under D. No. 312 wherein see for beginning and end.

Complete.

Tri. Cat.—9

R. No. 7244.

तलवकारोपनिषद्भाष्यटिप्पणम् by शिवानन्दयति ।

TALAVAKĀROPANIṢADBHĀṢYAṬIPPAṆAM by Śivānandayati.

Foll. 13 (*a*) to 25 (*b*). Extent, 275 granthas.

Begins on fol. 13 (*a*) of the manuscript described under the previous number.

Same work as that described under D. No. 389 wherein see for beginning and end.

Complete.

---

R. No. 7245.

काठकोपनिषद्भाष्यटिप्पणम् by शिवानन्दयति ।

KĀṬHAKOPANIṢADBHĀṢYAṬIPPAṆAM by Sivānandayati.

Foll. 26 (*a*) to 41. Extent, 325 granthas.

Begins on fol. 26 (*a*) of the manuscript described under R. No. 7243.

Same work as that described under D. No. 345 wherein see for beginning and end. The two stanzas found in the manuscript with the D. No. 346 are not here.

Complete.

Fol. 42 contains some accounts of the previous owner of this manuscript. Fol. 43 contains some stanzas concerning pañcagavya and its potentiality.

---

(R. Nos. 7246 to 7250 one bundle.)

Palm-leaf. 16⅜ × 1 and 1⅛ inches. Foll. 41. Lines, 4 on a page. Grantha. Slightly injured.

Purchased in the year 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7246.

विनायकस्तोत्रम् ।

VINĀYAKASTOTRAM.

Foll. 1 to 3 (*b*). Extent, 20 granthas.

The other works herein are:—Sarasvatistotram, fol. 4 (*a*), Rāmāyaṇam, fol. 7 (*a*), Viṣṇusahasranāmastotram, fol. 20 (*a*), Śivakavaca, fol. 37 (*a*).

Same work as that described under D. No. 9413 but with different readings.

Complete as found in Brahmāṇḍapurāṇa.

**Beginning :**

मूषिकवाहन मोदकहस्त चामरकर्ण विलम्बितसूत्र ।
वामनरूप महेश्वरपुत्र विघ्नविनायकपाद नमस्ते ॥

। ओम् । देवदेवसुतं देवं जगद्विघ्नविनायकम् ।
हस्तिरूपं महाकायं सूर्यकोटिसमप्रभम् ॥

वामनं जटिलं कान्तं ह्रस्वग्रीवं महोदरम् ।
धूम्रं सुदुर्जयं दण्डं विकटं प्रकटोत्कटम् ॥

**End :**

इष्टसिद्धिमवाप्नोपि पुनात्यासप्तमं कुलम् ।
सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ॥

**Colophon :**

इति ब्रह्माण्डपुराणे स्कन्दप्रोक्ते विनायकस्तोत्रं सम्पूर्णम् ।

---

R. No. 7247.

सरस्वतीस्तोत्रम् ।

SARASVATĪSTOTRAM.

Foll. 4 (*a*) to 6 (*a*). Extent, 30 granthas.

Begins on fol. 4 (*a*) of the manuscript described under the previous number.

Similar to the work described under D. No. 11299.

Complete.

**Beginning :**

सुरासुरासेवितपादपङ्कजा करे विराजत्कमनीयपुस्तका ।
विरिञ्चिपत्नी कमलासनस्थिता सरस्वती नृत्यतु वाचि मे
सदा ॥

सरस्वती सरसिजकेसरप्रभा
तपस्विनी सितकमलासनप्रिया ।
घनस्तनी कमलविलोललोचनी
मनस्विनी भवतु वरप्रसादिनी ॥

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा पूजिता
सा मां पातु सरस्वती भगवती निश्शेषजाड्यापहा ॥

**End :**

ब्रह्मविष्णुशिवाग्नै च बिन्दुनारि नमो नमः ।
शिवरूपी शिवज्ञानी शिवानाशी नमो नमः (?) ॥

सर्वज्ञानी सदानन्दी सर्वदर्शी नमो नमः ।
पद्मालया प्रिया देवी सरस्वत्यै नमो नमः ॥

सर्वसिद्धिकरं शान्तं सर्वकामफलप्रदम् ।
इदं सरस्वतीस्तोत्रमगस्त्यमु · · · · चकम् ॥

**Colophon :**

सरस्वतीस्तोत्रं संपूर्णम् ।

Foll. 6 (*b*) is left blank.

---

D. No. 7248.

रामायणम् (संक्षेपरामायणम्) by वाल्मीकि ।

RĀMĀYAṆAM (SAṀKṢEPARĀMĀYAṆAM) by Vālmiki.

Foll. 7 (*a*) to 18 (*a*). Extent, 150 granthas.

Begins on fol. 7 (*a*) of the manuscript described under R. No. 7246.

Same work as that described under D. Nos. 1864 and 1806 wherein see for the beginning.

First sarga of the Bālakāṇḍa only.

**End :**

एतदाख्यानमायुष्यं पठन्रामायणं नरः ।
सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ।

पठन् द्विजो वागृषभत्वमीयात्
स्यात् क्षत्रियो भूमिपतित्वमीयात् ॥

वणिग्जनः पण्यफलत्वमीयात्
जनश्च शूद्रोऽपि महत्त्वमीयात् ॥

**Colophon :**

इत्यार्षे श्रीमद्रामायणे आदिकाव्ये श्रीमद्वाल्मीकीये चतुर्विंशतिसहस्रिकायां संहितायां श्रीमद्बालकाण्डे नारदवाक्ये संक्षेपो नाम प्रथमः सर्गः ।

Foll. 18 (*b*) is left blank.

---

R. No. 7249.

विष्णुसहस्रनामस्तोत्रम् ।

VIṢṆUSAHASRANĀMASTOTRAM.

Foll. 20 (*a*) to 36 (*b*). Extent, 200 granthas.

Begins on fol. 20 (*a*) of the manuscript described under R. No. 7246.

Same work as that described under D. No. 9008 wherein see for beginning and end.

Complete.

This work contains the following additional stanzas :—

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेःस्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥

यदक्षरपदभ्रष्टं मात्राहीनं तु यद्भवेत् ।
तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते ।

विसर्गबिन्दुमात्रेण पदपादाक्षराणि च ।
न्यूनानि चातिरिक्तानि क्षमस्व पुरुषोत्तम ॥

Foll. 19 contains a fragment of Viṣṇusahasranāma stotra.

---

R. No. 7250.

शिवकवचः ।

ŚIVAKAVACAḤ.

Foll. 37 to 41. Extent, 60 granthas.

Begins on fol. 37 (*a*) of the manuscript described under R. No. 7246.

Similar to the work described under D. No. 7378.

Almost complete.

**Beginning :**

अस्य श्री शिवकवचस्तोत्रमहामन्त्रस्य ऋषभयोगीश्वर ऋषिः । अनुष्टुप् छन्दः, साम्बसदाशिवो देवता । ह्रां बीजम् । ह्रीं शक्तिः । ह्रूं कीलकम् । साम्बसदाशिवप्रसादसिद्ध्यर्थे जपे विनियोगः । ह्रां अङ्गुष्ठाभ्यां नमः । ह्रीं तर्जनीभ्यां नमः । ह्रूं मध्यमाभ्यां नमः । ह्रैं अनामिकाभ्यां नमः । ह्रौं कनिष्ठिकाभ्यां नमः । हः करतलकर-पृष्ठाभ्यां नमः ।

**End :**

मुसुण्डिशतघ्निचक्राद्यायुधभीषणकर सहस्रमुख दंष्ट्राकरालवदन विकटाट्टहास विस्फाटितब्रह्माण्डमण्डल नागेन्द्रकुण्डल नागेन्द्रहारवलय नागेन्द्रचर्मधर मृत्युञ्जय ।

---

(R. Nos. 7251 to 7253 one bundle.)

Palm-leaf. 9¾—10½ × 1⅜ and 1⅞ inches. Foll. 137. Lines, 9 to 13 on a page. Grantha. Slightly injured.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7251.

वैयाकरणसङ्केतलक्षणम् ।

VAIYĀKARAṆASAṄKETALAKṢAṆAM.

Foll. 1 to 49 (*b*). Lines, 11 to 13 on a page. Extent, 1,500 granthas.

The other works herein are:—Sabdasaktiprakāsika, fol. 50 (*a*). Satpratipakṣavyākhyā, fol. 128.

This is an independent treatise. This work defines the technical terms used by the Vaiyākaraṇas or grammarians such as Samāsa, Dhātu, Vibhakti, Bahuvrīhi and so on. This deals with the varieties of them also. First it is defined in a stanza and it is illustrated in prose. The author is not known.

Incomplete. (Neither beginning nor end.)

**Beginning :**

वस्तित्वादेरनुभवार्थम् । न तावत् अस्तित्वादेर्बाधविरहितत्वरूपं योग्यतामात्रं लिङ्गम् । बाधनिश्च · · · · · याभावेनान्यथासिद्धस्य

योग्यतानिश्चयस्यानावश्यकत्वात् । योग्यतामात्रलिङ्गकसंसर्गानुमा . . .
. . . . स्यान्वयबुद्धित्वे घटःकर्मत्वमित्यादिस्थलीयस्यापि तस्य तथा-
त्वापातात् । योग्यतायाः संशय . . . . लेऽप्यन्वयबुद्धेरानुभविक-
त्वाच्च ।

**End :**

तथा च पापविषयकगर्हाप्रयुक्तपापगोचरनिवृत्तिमानित्याकारकस्तत्र
. . . . . . "बोध· वल्मीकाग्रात् प्रभवति धनुः खण्डमाखण्डलस्ये"-
त्यत्र धातोरर्थः प्रकाशनम् । तत्र . . .

---

R. No. 7252.

शब्दशक्तिप्रकाशिका ।

ŚABDAŚAKTIPRAKĀŚIKĀ.

Foll. 50 to 127. Lines, 7 to 11 on a page. Extent, 1,800 granthas.

Begins on fol. 50 (*a*) of the manuscript described under the previous number.

Same work as that described under R. No. 410 (*d*). But this work contains a different portion.

The first 6 leaves contain 107 Kārikās of Śabdaśaktiprakāśikā from the beginning.

In the 7th fol. it begins abruptly in the course of the Dvitiyā-vibhakti and continues to the end.

**Beginning :**

तर्कं तन्त्रं च विदुषा विदुषां तोषकारिका ।
क्रियते जगदीशेन शब्दशक्तिप्रकाशिका ॥

अनुभवहेतुः सद्यः समुपासके सकले मनुजे ।
साकाङ्क्षासन्ना च स्वार्थे योग्या सरस्वती देवी ॥

साकाङ्क्षशब्दैर्यो बोधः . . . . यगोचरः ।
सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा ॥

योग्यतार्थगताकाङ्क्षा शब्दनिष्ठानुभाविका ।
प्रत्येकं वा मिलित्वा [वा] नैते लिङ्गमसिद्धितः ॥

* * * * * *

गामवरुणद्धि व्रजमित्यत्र गतिप्रतिरोधहेत्वावरणमवरुधेरर्थः । तेन गोगतिप्रतिरोधनस्यानुकूलं यद्व्रजस्यावरणं तत्कृतिमानित्यन्वयः । वृक्षं फलान्यपाचिनोतीत्यत्र छिदाहेतुविघट्टनं चिनोतेरर्थः । तथा च फलकर्मकच्छिदानुकूलं यद्वृक्षस्य विघट्टनं तत्कृतिमानित्यर्थः विघट्टनं चालनम् ।

**End :**

नित्यममीषां क्लीबत्वम् । एभ्यो जातार्थेऽस्य लुग्विधानात् । अश्विन्यादितो जातार्थकस्य वा लुगिति प्रतीयते । अत एव सर्वातोऽणो न लुक् वेदित्यत्रापि निषेधः सङ्गच्छत इति बन्धवः । वत्सशालादितस्तु जातार्थकस्य • • • • • • लुक् । यथा वत्सशालायां जात इत्यर्थे वत्सशालो वात्सशालश्च वृक्षः । एवमभिजिदाभिजितो वा बालकः ।

• • • • • भिजिच्चित्रा रेवती रोहिणी तथा ।
अश्वयुङ् मृगशीर्षश्च वत्सशालादिको गणः ॥

**Colophon :**

इति श्रीमहोपाध्यायजगदीशतर्कालङ्कारभट्टाचार्यकृतिः
शब्दशक्तिप्रकाशिका सम्पूर्णा ।

---

R. No. 7253.

सत्प्रतिपक्षव्याख्या ।

SATPRATIPAKṢAVYĀKHYĀ.

Foll. 128 (*a*) to 137 (*b*). Lines, 9 and 10 on a page. Extent, 300 granthas.

Begins on fol. 128 (*a*) of the manuscript described under R. No. 7251.

A commentary on Satpratipakṣa (Vyāvahārika) lakṣaṇa of Gadādharabhaṭṭācharya.

Incomplete.

**Beginning :**

देवान्यथापूर्वं तर्पयिष्यामः । साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थितिप्रतिरुद्धकार्यकलिङ्गत्वं तत्वमिति मूलम् । वह्निव्याप्याभावादिसाध्यकानुमितिजननयोग्यया वह्न्यादिव्याप्यवत्पक्षोपस्थित्या बाधनिश्चय-

रूपया कार्यप्रतिरोधदशायामतिव्याप्तिवारणाय साध्यविरोधित्वं प्रथमोपस्थिति-विशेषणं वह्निव्याप्यवत्पक्षोपस्थितेरपि साध्यवत्ताज्ञानप्रतिबन्धिकां वह्निव्याप्य-वत्पक्षविषयकसमूहालम्बनरूपवह्निमत्पक्षविषयकानुमितिं प्रति स्वरूपयो-ग्यतया यथाश्रुते उक्तातिप्रसङ्गस्य दुर्वारतया साध्यवत्ताज्ञानप्रतिबन्ध-कतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठकार्यतानिरूपित कारणताश्रयत्व-पर्यन्तं भट्टाचार्येणोक्तम् ।

**End :**

तादृशप्रतिबन्धकतावच्छेदकविषयिताकवह्न्यभावव्याप्यवत्तादृशह्रदत्वा-वच्छिन्नोनायके वह्न्यभावव्याप्यवत्तादृशह्रदात्मकबाधे वह्न्यभावव्याप्यवद्ध-ह्न्यभाववत्कालीनह्रदो वह्न्यभावव्याप्याभाववानित्यादौ प्रकृतपक्षे वह्न्यभाव-वत्तानिश्चयस्योक्तरीत्या अनुमितिप्रतिबन्धकत्वेन तादृशप्रतिबन्धकतावच्छे-दकविषयिता ।

---

R. No. 7254.

Palm-leaf. 14½—16¾ × 1½ and 1⅝ inches. Foll. 95. Lines, 9 to 10 on a page. Grantha. Very much injured. Extent, 4,250 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका by श्रीकण्ठः ।

NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ—TARKAPRAKĀŚIKĀ by Srikaṇṭha.

Same work as that described under D. No. 4224.

Begins with the beginning of the Śabdapariccheda and continues to the end.

**Beginning :**

. . . . . . गङ्गाजलभूषितमस्तकम् ।
पुनातु गिरिजाप्रेमपात्रमेकमनेकधा ॥

उपजीव्योपजीवकभावसङ्गत्या उपमाननिरूपणानन्तरं शब्दं निरूपयन् प्रमा · · · · · · · तथा उपमानोपजीवकत्वाभावात् फलयोः स्वरूप-फलयोश्च सङ्गतिर्बोध्या । तस्याश्च फलनिष्ठत्वेऽपि स्वाश्रयकरणत्वात्मक-परम्परासंबन्धेन करण · · · · · · नियामकत्वमवसेयम् । तथाहि—शक्तिपरिच्छित्तिरेव उपमितिः । तस्याश्च सर्वस्या एव शाब्दबोधजन-कत्वेन फलयोरुपजीव्योपजीवकत्वसम्भवः ।

---

R. No. 7255.

Palm-leaf. 16¼ × 1⅜ inches. Foll. 24. Lines, 8 and 9 on a page. Grantha. Injured. Extent, 900 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

तत्त्वचिन्तामणिरहस्यम् by मथुरानाथ ।
TATTVACINTĀMAṆIRAHASYAM by Madhurānātha.

A commentary on Gaṅgeśopādhyāya's Tattvacintāmaṇi that has been described under D. No. 3982 by Madhurānātha.

Begins with the Anumānalakṣaṇa and breaks off in the course of Vyāptilakṣaṇa.

**Beginning :**

प्यत इत्यन्तग्रन्थोऽत्र कस्यचित् कल्पितः ' न तु वास्तविकः पाठः । अथानुमानं निरूप्यत इत्येव पाठो वास्तविकः । तावतैव सिद्धसाध्यसमभिव्याहारलभ्यस्य हेतुहेतुमद्भावस्य प्रतिबन्धकीभूतजिज्ञासानि-वर्तकत्वासिद्धत्वकथनेनावसरस्य सङ्गतित्वलाभसम्भवात् । अन्यथा शब्द-खण्डेऽपि उपमानोपजीवकत्वादुपमानानन्तरं शब्दो निरूप्यत इत्यस्य वक्तव्यत्वापातादित्याहुः । अनुमितेः प्रत्यक्षादिप्रमितिभिन्नत्वज्ञानं विना अनुमितिकरणत्वेन हेतुना अनुमानस्य इतरभिन्नत्वज्ञानासम्भवात् ।

**End :**

केषाञ्चिन्मतमाशङ्कते-- अथेति । ननु किमिहासामा · · · · करणवृत्तित्वाभावः तदनधिकरणवृत्तित्वं वा । आद्ये व्यभिचारिण्यति-व्याप्तिः । साध्यसमानाधिकरणत्वे सतीत्यस्यैव सम्यक्त्वेनाभावद्वयघटनायां

गौरवम् । साधिकरणत्वे सतीत्यस्य · · · · · हेतुके वह्निमानाकाशा-
दित्यादावतिव्याप्तिवारणाय हेतुतावच्छेदकसम्बन्धेन सम्बन्धित्व र्थकस्य
साधिकरणपदस्य सार्थकत्वेऽपि केवला · · · · ।

---

(R. Nos. 7256 to 7256 (c) one bundle.)

Palm-leaf. 14½ and 14⅝ × 1⅛ and 1¼ inches. Foll. 89. Lines, 7 to 9 on a page. Grantha. Slightly injured.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7256.

प्रामाण्यवादरहस्यम् by मथुरानाथ ।

PRĀMĀṆYAVĀDARAHASYAM by Madhurānātha.

Foll. 3 to 38. Lines, 8 and 9 on a page. Extent, 800 granthas.

The other works herein are:—Laukikaviṣayatāvāda, fol. 44 (a). Satyajñānādivākyānāmakhaṇḍārthatvakhaṇḍanam, fol. 54 (a). Vidhivādārtha, fol. 65 (a).

A commentary on Tattvacintāmaṇi by Mathurānātha. This commentary is called Rahasya.

Commences with the Prāmāṇyavāda of Pratyakṣapariccheda and breaks off in the course of Pūrvapakṣarahasya.

Foll. 1 and 2 contain a fragment of the commentary on the Gadadharabhaṭṭācārya's Prāmāṇyavāda.

**Beginning :**

मङ्गलस्य फलत्वं व्यवस्थाप्य मोक्षसाधनीभूततत्त्वज्ञानचिकीर्षावतां स्वीयग्रन्थोपादानकप्रवृत्तये मोक्षसाधनीभूततत्त्वज्ञानरूपफलवदान्वीक्षिकी-प्रतिपादितप्रतिपादकत्वेन मोक्षसाधनीभूततत्त्वज्ञानजनकतां स्वीयग्रन्थस्य प्रतिपादयितुं तादृशहेतुमत्त्वं स्वीयग्रन्थस्य दर्शयति—अथेत्यादिना विविच्यत इत्यन्तेन । अथ मङ्गलस्य सफलत्वनिरूपणानन्तरम् । जगदेवेति जगत्पदं वस्तुत्वविशिष्टपरम् । एवकारस्तु यावदर्थकः । तथा च दुःखपङ्कनिमग्नं तदानीं दुःखसमूहाधिकरणं यावद्वस्तु तद्धुद्दिधीर्षुः तदात्यन्तिकदुःखध्वंसविशिष्टं चिकीर्षुः परमकारुणिको मुनिः अष्टादशसु—

**End :**

एवकारश्च यावदर्थकः । स्वपदं सामान्यतः पक्षीभूतघटत्ववति घटत्व प्रकारकत्वादिपरं । तथा च ज्ञाननिष्ठं घटत्ववति घटत्वप्रकारकत्वं

घटत्ववति घटत्वप्रकारकत्वाश्रयज्ञानविषयकयावत्प्रहविषयो न वेति विप्रतिपत्तिः फलिता । ज्ञानभेदेन घटत्ववति घटत्वप्रकारकत्वादेः भिन्नत्वे तु स्वाश्रयपदं पक्षीभूतप्रामाण्यव्यक्त्याश्रयज्ञानव्यक्तिपरम् । तथा च तज्ज्ञाननिष्ठं घटत्ववति घटत्वप्रकारकत्वं तत्तज्ज्ञानविषय य . . . . . . ग्रहविषयो न वेति फलितम् । इदं ज्ञानं प्रमासमर्थप्रवृत्तिजनकत्वादिति नैयायिकप्रसिद्धप्रामाण्यानुमिति ।

---

R. No. 7256 (*a*).

लौकिकविषयतावादः ।

LAUKIKAVIṢAYATĀVĀDAH.

Foll. 44 to 53 (*b*). Lines, 7 on a page. Extent, 210 granthas.

Begins on fol. 44 (*a*) of the manuscript described under R. No. 7256.

A disquisition on the nature of objectivity of ordinary or normal knowledge.

Complete.

Fol. 39 to 43 contain a commentary on parāmarśavāda.

**Beginning :**

घटं साक्षात्करोमीत्याद्यनुव्यवसायविषयतया लौकिकविषयतायाः अतिरिक्तायास्सिद्धिरिति नवीनाः । तत्र विवदन्ते बहवः । तथा हि—घट साक्षात्करोमीत्यनुव्यवसायस्यातिरिक्तलौकिकविषयताकत्वं न विषयः । किन्तु घटविषयकप्रत्यक्षमेव । तावतैव घटाद्यनुमित्याद्यनन्तरं तथाविधानुव्यवसायवारणसम्भवात् किमप्रामाणिकातिरिक्तलौकिकविषयताङ्गीकारेणेति । ननु घटं साक्षात्करोमीत्यनुव्यवसायस्य घटविषयकप्रत्यक्षविषयकत्वे घटाद्युपनीतभानानन्तरमपि तथाविधानुव्यवसायापत्तिः तदानीमुपनीतभानात्मकघटप्रत्यक्षरूपविषयसत्वादिति ।

**End :**

अन्यथा पश्यामि न पश्यामीत्यादिप्रत्यक्षानुपपत्तिरिति तन्न पश्यामीत्यादेः प्रत्यक्षसामान्यनिरूपितलौकिकविषयताशालिचाक्षुषत्वाद्यवच्छिन्नघटाद्यवलम्बनेनैवोपपत्तौ प्रत्यक्षसामान्यनिरूपितलौकिकविषयतातोऽतिरिक्तलौकिकविषयताभ्युपगमस्य निष्प्रयोजनत्वात् तथाविधातिरिक्तविषयताभ्युपगमे कार्यकारणभावलाघवस्योपदर्शितप्रतिबन्दिसहस्रकवलितत्वेनानुपादेयत्वादित्यलमतिविस्तरेणेति ।

**Colophon :**

इति लौकिकविषयतावादः ।

———

R. No. 7256 (*b*).

सत्यज्ञानादिवाक्यानामखण्डार्थत्वखण्डनम् ।
SATYAÑJÑĀNĀDIVĀKYĀNĀMAKHAṆḌĀRTHATVAKHAṆḌANAM.

Foll. 54 (*a*) to 64 (*a*). Lines, 7 on a page. Extent, 250 granthas.

Begins on fol. 54 (*a*) of the manuscript described under R. No. 7256.

A polemical work investigating the meaning of the Upanisadic passages like 'Satyamñjānam, Anantam, Brahma' so as to criticise unfavourably the Advaita view of the Vedanta and to support the Visistadvaita view thereof.

Incomplete.

**Beginning :**

गमनं न कर्तव्यमित्यनुमतिरेव न तु वाक्ये लक्षणा । अनन्वलभ्यो हि शब्दार्थः । विषं भुङ्क्ष्व इत्यादावपि प्रकृतात् शत्रुगृहभोजनात् विषभक्षणस्येष्टसाधनत्वोक्त्या भोजनस्यानिष्टसाधनता आक्षिप्यते । न तु वाक्येन भोजनाकर्तव्यता लक्ष्यते । यद्वा तत्र विषशब्देनानिष्टसाधने विधिप्रत्ययेन च निषेधे लक्षिते निषिद्धे भोजने भुजिधातुर्मुख्य एवेति न सर्वपदानामेकार्थलक्षकता ।

**End :**

तत्राद्ये हेतोर्व्यभिचारः । साध्यभावरूपस्य निर्धर्मकत्वरूपस्य हेतुरूपस्य पदार्थत्वात्मकस्य च धर्मस्य भावाभावाभ्यां व्याघातात् । प्रमेयत्वाभिधेयत्वादीनामबाधितानुभवबलेन त्वदभिमतमिथ्यात्वदृश्यत्वादिवत् स्ववृत्तित्वाच्च गोत्वादेरपि गोव्यक्तिरेव । गोत्वगतं स्वाश्रयव्यक्तिगतं प्रत्यस्माद्व्यावर्तकमिति न दुःखानात्मकत्वस्य तत्र व्यभिचारः । न च श्रुतिः सगुणब्रह्मपरा न तु परब्रह्मपरेति वाच्यम् । सगुणातिरिक्तस्य परस्याप्याप्यसिद्धेः । त्वत्पक्षेऽपि तात्त्विकगुणवद्व्यक्त्यन्तराभावाच्च परः पराणामित्यादि स्मृतौ परात्परत्वोक्तेश्च । अन्यथा सदेव ।

R. No. 7256 (c).

विधिवादार्थः by गदाधरभट्टाचार्य ।

VIDHIVĀDĀRTHAḤ by GADĀDHARABHAṬṬĀCĀRYA.

Foll. 65 (*a*) to 85 (*b*). Lines, 7 and 8 on a page. Extent, 350 granthas.

Begins on fol. 65 (*a*) of the manuscript described under R. No. 7256.

Similar to the works described under D. No. 4279 and R. No. 3891 (*b*).

Vidhisvarūpavāda complete.

**Beginning:**

विधिनिषेधार्थवादभेदेन वाक्यं त्रिविधम् । तत्र प्रवर्तकवाक्यं विधिः । ओदनकामः पचेत, स्वर्गकामोऽश्वमेधेन यजेतेत्यादिलौकिकालौकिकवाक्यानां प्रवर्तकज्ञानजननेन प्रवर्तकत्वाद्विधित्वम् । अथ तरति मृत्युमित्याद्यर्थवादवाक्यानामपि फलसाधनताबोधद्वारा प्रवर्तकतया तत्रातिप्रसङ्गः । न च कर्तव्यताबोधकवाक्यत्वं विधित्वम् । तच्च कृतिसाध्यत्व-बाधेन लिङ्गा तद्बोधनासम्भवात् । न च तत्र धातुना कृतिः द्वितीयया च साध्यत्वरूपं कर्मत्वं प्रत्याय्यत इति कृतिसाध्यत्वबोधकत्वमनपवादमिति वाच्यम् तर्हि पाकं करोति यागं करोतीत्यादिवाक्यस्यापि दर्शितरीत्या कृतिसाध्यताबोधकत्वेन तादृशार्थवादे अतिप्रसङ्गात् ।

**End:**

ईदृशरीत्यैव लोहितं निरसतीत्यादिबोधितलोहितसक्तान्निरासाद्यात्मकप्रतिपत्तिरूपोङ्गबोधः । लोहितसक्ताद्यसत्वे स्थानप्रधानविधिसिद्धिरुपपादनीया । न वाङ्गभेदेन लोहिताद्यसत्वे स्थानलोहिताद्यन्तरं सम्पाद्य तन्निरसनं युक्तमिति वाच्यम् । लोहितादिसत्वे किं कुर्वीतेत्याकांक्षया तादृशविरोधानां प्रवृत्त्या लोहितसत्वस्थले तेषां विधीनां प्रवृत्तेः तत्र तदङ्गताबोधाभावात् । तत्र न्यायमूलक एव प्रतिपत्तेः प्रतिपाद्याप्रयोजकत्वमिति प्रवादः । अथ लौकिकशेषभोजनस्य लौकिकभोजनाङ्गत्वे पूर्वदिवसीयनिरामिषसकृद्भोजनस्यापि श्राद्धाङ्गता स्यात् । निरामिषं सकृद् भुञ्जीतेत्यादिना निरामिषसकृद्भोजनातिरिक्तभोजनस्य वाङ्गत्वबोधनादिति चेन्न

पूर्वदिवसे आवश्यकोपवासस्थले श्राद्धाद्यनिर्वाहात् । प्रसङ्गेन तत्र वैदि-
काङ्गाकल्पने गौरवेण तद्वचनं निरामिषसकृद्भोजनातिरिक्तभोजना-
भावरूपाङ्गबोधकताया एवोपगमादिति सङ्क्षेपः ।

**Colophon :**

इति श्रीगदाधररचितविधिस्वरूपवादार्थः समाप्तः ।

Foll. 86 to 89 contain a work which seems to be a supplement to Bhagvadgītā and its commentary.

---

(R. Nos. 7257—7259 one bundle.)

Palm-leaf. 16⅝ and 16⅞ × 1¼ and 1⅜ inches. Foll. 69. Lines, 7 and 8 on a page. Telugu. Slightly injured.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7257.

त्रिंशच्छ्लोकी—सव्याख्या ।

TRIMŚACCHLOKĪ with the commentary of Paṭṭābhirāma Sāstry.

Foll. 1 (*a*) to 29 (*b*). Extent, 1,000 granthas.

The other works herein are :—Padārthatattvanirṇaya Vyākhyā, fol. 30 (*a*). Padārthatattvanirūpaṇam, fol. 70 (*a*).

A treatise in thirty-two stanzas explaining the meaning of certain words in the light of Nyāya school of thought. This is also followed by a commentary composed by Paṭṭābhirāma Sastry, the author of Muktāvalīprabhā, etc. Printed.

Same work as that described under R. No. 4293 wherein see for beginning and end.

Complete.

---

R. No. 7258.

पदार्थतत्त्वनिर्णयव्याख्या by रघुदेवन्यायालङ्कारभट्टाचार्य ।

PADĀRTHATATTVANIRṆAYAVYĀKHYĀ by Raghudevanyāyālaṅkārabhaṭṭācārya.

Foll. 30 to 63. Extent, 1,000 granthas.

Begins on fol. 30 (*a*) of the manuscript described under the previous number.

Same work as that described under D. No. 4264.

Complete.

Foll. 64 contains a fragment of Trimśacchlokī.

R. No. 7259.

पदार्थतत्त्वनिरूपणम् by रघुनाथशिरोमणि ।

PADĀRTHATATTVANIRŪPAṆAM by Raghunāthaśiromaṇi.

Foll. 65 to 69. Lines, 6 to 8 on a page. Extent, 125 granthas.

Begins on fol. 65 (*a*) of the manuscript described under R. No. 7257.

Same work as that described under D. No. 4262. From the colophon of this work it is known that the famous Raghunātha Siromaṇi, the author of this, is a disciple of Pakṣadharamiśra.

Complete.

**Colophon :**

इति श्रीपक्षधरमिश्रान्तेवासिना तार्किकशिरोमणिना श्रीमता रघुनाथभट्टाचार्येण कृतं पदार्थतत्वनिरूपणं समाप्तम् ।

श्रीमते मेधादक्षिणामूर्तये महते देशिकेन्द्राय समर्पितमस्तु ।

Foll. 69 (*b*) is left blank.

---

R. No. 7260.

Palm-leaf. 14⅝ and 14¾ × 2 inches. Foll. 92. Lines, 10 to 14 on a page. Grantha. Slightly injured. Extent, 4,750 granthas.

Purchased in 1939–40 from Srī T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

तत्त्वचिन्तामणिदीधितिप्रकाशिका by गदाधरभट्टाचार्य ।

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ by Gadādharabhaṭṭācārya.

Same work as that described under D. No. 4050 that contains some portions that are in this work.

Contains the following portions.—

1. Sāmānyalakṣaṇaprakaraṇa. Complete.
2. Sādhāraṇaprakaraṇa. Complete.
3. Asādharaṇaprakaraṇa. Complete.
4. Viruddha. Complete.
5. Satpratipakṣa. Complete.
6. Bādha. Incomplete.

**Beginning :**

व्याप्तिग्रहश्चेत्यादिमूलेन व्याप्तिग्रहस्य सकलधूमविषयकतायाः पर्वतीयधूमज्ञानजन्यानुमित्यन्यथानुपपत्त्या व्यवस्थापनं कुत्रोपयोगीत्याकांक्षायां

तस्य सामान्यलक्षणाप्रत्यासत्तिव्यवस्थापनोपयोगितां सामान्यलक्षणाप्रत्यासत्तिनिरूपणप्रयोजकसङ्गतिञ्च दर्शयति—प्रसङ्गादिति ।

**End :**

व्यधिकरणबहुव्याप्यसहिष्णुतया साध्याभावे निश्चयो यस्मादिति न व्याख्यातम् । तदधीनत्वं च तन्निर्वाह्यनिश्चयकार्यकारिताप्रयोजकरूपविशिष्टत्वम् । एतच्चेदानीं ज्ञानयोः क्रमिकत्वहेतुत्वेनाभिहितम् । पूर्वं ज्ञातमिति च मूलं तज्ज्ञानाभिन्नज्ञानविषयीभूतमित्यर्थकम् । उपजीव्यत्वादिति । स्वरूपेण प्रतिबन्धकत्वेनेत्यादिः । एतच्चेदानीं दोषत्वहेतुतयोक्तम् । ननु वह्निरनुष्ण इत्यादौ साध्याभावज्ञानादेवानुमित्यनुत्पादनिर्वाहात् तत्प्रमात्वधियः स्वतोऽविरोधित्वेन तत्प्रमात्वस्य हेत्वाभासता नोपपद्यत इत्याशङ्क्य प्रमात्वज्ञानस्यानुमितौ ।

---

(R. Nos. 7261 to 7263 one bundle.)

Palm-leaf. 14½ and 14⅞ × 1⅜ and 1½ inches. Foll. 141. Lines, 8 aud 9 on a page. Grantha. Much injured.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7261.

शिवोत्कर्षप्रदीपिका ।

ŚIVOTKARṢAPRADĪPIKĀ.

Foll. 1 to 64. Extent, 1,700 granthas.

The other works herein are :—Tattvaviveka, fol. 65 (*a*). Sadvidyāvijayopanyāsa, fol. 124 (*a*).

A work on Śaiva-Vedanta pointing out Siva to be the Supreme Brahman. This work refers to many Upaniṣadic passages. The author is not known.

Incomplete.

**Beginning :**

. . . . . . कारणत्वं प्राधा . . . . . मुमुक्षुरुपास्यत्वादिकञ्च शिवस्य तु तत् स्यात् । तथा हि तैत्तिरीयके श्रूयते । अणोरणी . . . . . . हितो स्य जन्तोः तम . . . . पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम् । सप्त प्राणाः प्रभवन्ति तस्मात् सप्ता . . . .

. . . लोका एषु चरन्ति . . . . णा गुहाया निहिताः सप्त सप्त । अतः समुद्रा गिरयश्च सर्वेऽस्मात् स्यन्दन्ते सिन्धवस्सर्वरूपा . . . . . साश्च . . . येन नैष भूतरितष्ठत्यन्तरात्मेत्यादि । अत्र सूक्ष्मात् सूक्ष्मतरं महतो महत्तरं सर्वप्राणिहृदय . . . . . समस्तकामं सर्वान्तर्यामिणमीशशब्दार्थं पश्यतीत्युक्त्वा तत्सकाशात् स प्राणादिसमस्तजगदुत्पत्ति . . . . . . . ।

**End :**

यद्यपि तापनीयोपनिषन्नारायणावतारभूतनृसिंहविषया । तथापि . . . . . . रभिन्नतया तत्प्रतिपादिकायास्तस्या अपि नारायणपरत्वमुपपद्यते । तत्र पूर्वतापनीयशेषे पुरा किलेदन्न किञ्चनासीत् । न द्यौः नान्तरिक्षं न पृथिवी । केवलं ज्योतिरेकमनाद्यनन्तस्थूलरूपं रूपवदविज्ञेयं ज्ञानरूपमानन्दमासीदित्यनेन प्रलयप्रतिपादनपूर्वकं ज्योतिश्शब्दितस्य परमकारणस्य तदानीं सत्वमुक्त्वा, तदमन्यत तद्द्वेधाभूत् हरितमेकं रक्तं परम् ।

---

R. No. 7262.

तत्त्वविवेकः by वरदाचार्य ।

TATTVAVIVEKA by Varadācārya.

Foll. 65 (*a*) to 123 (*b*). Extent, 1,600 granthas.

Begins on fol. 65 (*a*) of the manuscript described under the previous number.

Same work as that described under R. No. 3769 wherein see for the end.

Wants the beginning.

**Beginning :**

तत्र यद्रक्तं तत् पुंसो रूपम् । यद्धरितं तन्मायायास्तौ अगच्छेतां तयोर्विन्ध्यमवस्कन्दत । तदवततदण्डमभूत् (?) । हैमं तत् परिणममानं महदभूत् । ततः परमेष्ठीव्यजायतेत्यनेन तस्यैव तेजसो मायापूर्वरूपेण विभक्ततयावस्थानरूपद्विधाभवनम् । ततः परमपुरुषसंकल्पानुसारेण मायाशब्दतत्प्रकृत्येकदेशस्य ब्रह्माण्डात्मना परिणतिं चतुर्मुखोत्पत्तिं चाभिधाय ।

R. No. 7263.

सद्विद्याविजयोपन्यासः ।

SADVIDYĀVIJAYOPANYĀSAḤ.

Foll. 124 to 141. Lines, 8 on a page. Extent, 450 granthas.

Begins on fol. 124 (*a*) of the manuscript described under R. No. 7261.

A treatise on Viśiṣṭādvaita Vedānta and it is intended to deny and refute the Māyā Doctrine admitted by the Advaita school of thought. This work deals with the following topics :—

1. Bhāvarūpajñana pramāṇabhaṅgaḥ.
2. Tirodhānabhaṅgaḥ.
3. Ajñānāśrayabhaṅgaḥ.
4. Avidyālakṣaṇabhaṅgaḥ.
5. Avidyāprakāśabhaṅgaḥ.
6. Avidyānivartakabhaṅgaḥ.
7. Avidyānivṛttibhaṅgaḥ.

Incomplete.

**Beginning :**

. . . ल्पनया। किञ्च घटाद्यवयवानां कॢप्तानामेवोपादानत्वसम्भवेऽविद्योपादानत्वे मानाभावाच्च । नन्वेवमपि ब्रह्मणो जगदुपादानत्वेऽनुपपत्तिरेव भावरूपाज्ञाने प्रमाणम् । तथाहि—परिणामित्वं ह्युपादानत्वं । न च निर्विकारस्य ब्रह्मणः परिणामित्वसम्भव इति परिणाम्युपादानं किञ्चिदास्थेयम् । तच्च भावरूपाज्ञानामिति चेदस्तु । तावता हि ब्रह्मविशेषणभूतं ब्रह्मोपादानत्वनिर्वाहकं परिणामि द्रव्यं किञ्चित् सिध्यति । तच्च अस्मदभिमता प्रकृतिरेव । न भावरूपाज्ञानामिति न ब्रह्मोपादानत्वानुपपत्तिरपि तत्र प्रमाणम् ।

**End :**

ननु तर्हि मा भून् प्रत्यक्षम् । अनुमानादिकं तु स्यात् । तथा हि प्रपञ्चो मिथ्या दृश्यत्वात् व्यावर्त्यमानत्वात् ब्रह्मव्यतिरिक्तत्वात् परिच्छिन्नत्वात् जडत्वाच्च शुक्तिरूप्यवदित्यनुमानानां, नेह नानास्ति किञ्चन

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति । सर्वं खल्विदं ब्रह्मात्मै-वेदं सर्वमेकमेवाद्वितीयमित्यादिश्रुतीनां च विद्यमानत्वादिति चेत् । उच्यते न ताव . . . . . . . . . त्वादे . . . . भावेन साधनाव्यापकत्वात् । प्रपञ्चस्य विकारित्वात् अबाधितत्वाच्च । न चाबाधितत्वमस्ति ।

---

(R. Nos. 7264 to 7266 one bundle.)

Sritala. $16\frac{3}{4} \times 2\frac{1}{8}$ and $2\frac{1}{4}$ inches. Foll. 84. Lines, 10 to 15 on a page. Grantha. Slightly injured.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7264.

अनुमानरहस्यम् by मथुरानाथ ।

ANUMĀNARAHASYAM by Mathurānātha.

Foll. 1 to 72. Lines, 10 on a page. Extent, 2,260 granthas.

The other works herein are :—Sāmānyaniruktipatram, fol. 73 (*a*). Bhandhamithyātvadūṣaṇam, fol. 78 (*a*).

Same work as that described under D. No. 3915 which contains a different portion.

Begins in the course of Savyabhicārasāmānyanirukti and continues to the end of Bādhaprakaraṇa.

**Beginning :**

सम्बन्धेन वृत्तिमत एव तथात्वादित्यभिमानः । एतच्च द्वितीय-लक्षणेऽप्यनुषञ्जनीयम्, प्रथमलक्षणे साध्यव्याप्यत्वं साध्याभाववदवृत्तित्वे सति साध्यवद्वृत्तित्वं, साध्यवदवृत्तित्वे सति साध्याभाववद्वृत्तित्व च साध्याभावव्याप्यत्वं, द्वितीये साध्यवद्भिन्नावृत्तित्वे सति साध्यवद्वृत्तित्वं साध्यवन्मात्रवृत्तित्वं, साध्याभाववद्भिन्नावृत्तित्वे सति साध्याभावद्वृत्तित्वं च साध्याभाववन्मात्रवृत्तित्वमतो नाभेद इति भावः ।

**End :**

न च धर्मिग्राहकत्वं धर्मितावच्छेदकविशिष्टधर्मिग्राहकत्वमिति वाच्यम् । घटो व्यापकं इत्यादावप्यतथात्वात्, तथाप्युद्भावने कथक-सम्प्रदायसिद्धप्रकारभेदो अनेन दर्शित इति न काप्यनुपपत्तिरिति संक्षेपः ।

R. No. 7265.

सामान्यनिरुक्तिपत्रम् ।

SĀMĀNYANIRUKTIPATRAM.

Foll. 73 to 77. $16\frac{3}{4} \times 2\frac{1}{2}$ inches. Lines, 13 to 15 on a page. Extent, 400 granthas.

Begins on fol. 73 (*a*) of the manuscript described under the previous number.

Similar to the work described under D. No. 4320.

Incomplete.

**Beginning :**

च्छिन्नप्रतिबन्धकताविरहात् केवलसामान्यत्वाभाववत्पक्षनिश्चये तादृशप्रतिबन्धकतावत्त्वेन तदनतिरिक्तवृत्तिर्या जनकता तन्निरूपितजन्यतावच्छेदकधर्मघटितधर्मावच्छिन्नजन्यतानिरूपितजनकतानिवेशेऽपि च न प्रतीकार इति यत्किञ्चिदेतत् ।

**End :**

परे तु असाधारण्यविषयित्वाप्रयुक्तोभयाभावाधिकरणतावत् तादृशह्रदरूपसत्प्रतिपक्षेऽव्याप्तिः । तादृशसत्प्रतिपक्षविषयकत्वजनकतानिरूपितजन्यतावच्छेदकीभूता या बाधविषयता तदवच्छिन्नजन्यताव्यापिका प्रकृतसत्प्रतिपक्षनिश्चयप्रतिबध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतिबध्यतानिरूपितज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकत्वाप्रसिद्धेः । तादृशसाध्याभाववत्ताबुद्धेः साध्यवत्ताज्ञानं प्रति समवायिगगनाभाववान् गगनाभाववानिति निश्चयविशिष्टसमवायिगगनाभाववांश्च तादृशपक्षज्ञानत्वेन प्रतिबन्धकत्वात् । अभाववान् समवायिगगनाभावाभाववानिति निश्चयविशिष्ट अभाववांश्च तादृशपक्षनिश्चयत्वेन च साध्याभावभाववत्ताबुद्धिप्रतिबन्धकत्वात् । अतिरिक्त प्रतिबन्धकताङ्गीकारे प्रमाणाभावात् । यद्येतद्दोषवारणाय उक्तप्रतिबन्धकतास्थाने प्रतिबध्यत्वं प्रतिबन्धकत्वप्रतिबध्यत्वोभयं वा निवेश्यते तदा स्थलविशेषोऽप्यनुसारणीय इति चेन्मैवम् ।

R. No. 7266.

वन्धमिथ्यात्वदूषणम् ।

BANDHAMITHYĀTVADŪṢAṆAM.

Foll. 78 to 84 (*b*). Lines, 13 and 14 on a page. Extent, 560 granthas.

Begins on fol. 78 (*a*) of the manuscript described under R. No. 7264.

This endeavours to refute the view that the external as well as the bondage is only phenomenal.

Incomplete.

**Beginning :**

प्रणम्य पितरौ भक्त्या पितृव्यं तत्प्रपूजितम् ।
करिष्ये वन्धमिथ्यात्वदूषणं वादिभूषणम् ॥

ननु सर्वागमानामद्वितीयब्रह्मपरत्वान्यथानुपपत्त्या बन्धमिथ्यात्वमवश्यमन्वेष्टव्यम् । अन्यथा तदनुपपत्तेः । तथा चागममानताप्रतिकूलं वन्धमिथ्यात्वखण्डनं कुर्वतः कथं न विरुद्धभाषित्वम् । किञ्चोत्पत्तिसंहृत्यन्यथानुपपत्तिसिद्धं बन्धमिथ्यात्वं न शक्यखण्डनम् आत्मवत् सत्यत्वे तदनुपपत्तेरिति । मैवम् । अगमानामद्वितीयब्रह्मपरत्वस्यान्यथाप्युपपत्त्या धर्ममीमांसारम्भानुपपत्तिरूपयुक्तिविरुद्धत्वेन च बन्धमिथ्यात्वस्य बाधितत्वात् ।

**End :**

अथवा नानाशब्दो भेदपर्यायो भिन्नपर्यायो वा । तथा च स्थानादिभेदेन स्वरूपभेदस्य तद्गतगुणादिभेदस्य च प्रसक्तौ श्रुत्या तन्निषिध्यते । तस्मात् श्रुतिः न मिथ्यात्वे मानम् । नापि जिज्ञासासूत्रं तत्र मानम् । तत्र युक्तिग्रथनात्मकशास्त्रारम्भसिद्ध्यर्थं मोक्षहेतुब्रह्मज्ञानप्रयोजकयुक्त्यनुसन्धानात्मकमननापरपर्यायजिज्ञासाकर्तव्यतासमर्थनपरं न तु विषयमिथ्यत्वपरमपदार्थत्वादवाक्यार्थत्वाच्च । ननु न ब्रह्मज्ञानमात्रं न जिज्ञासाप्रयोजकं सुखदुःखनिवृत्तीतरत्वात् । किंतु तत्साध्यो मोक्षपदार्थ एव । स च बन्धनिवृत्तिरूपः बन्धसत्यत्वेऽनुपपन्नः । सत्यस्य निवृत्तौ आत्मनोऽपि निवृत्तिप्रसङ्गात् । न च ज्ञानेन स्वविरोध्यज्ञानं निवर्त्यतां बन्धमिथ्यात्वे ।

R. Nos. 7267 and 7268 one bundle.

Palm-leaf. 18⅝ and 1⅞ inches. Foll. 69. Lines, 11 and 12 on a page. Grantha. Slightly injured.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7267.

ब्रह्मसूत्रवृत्तिः—ब्रह्मतत्त्वप्रकाशिका by सदाशिवब्रह्मेन्द्र ।

BRAHMASŪTRAVṚTTI—BRAHMATATTVAPRAKĀŚIKĀ by Sadāśiva Brahmendra.

Foll. 1 to 64 (*b*). Extent, 3,750 granthas.

Other work herein is :—Brahmasūtra, fol. 65 (*a*).

Same work as that described under D. No. 4690 wherein see for the beginning and end.

Complete.

---

R. No. 7268.

ब्रह्मसूत्रम् by व्यास ।

BRAHMASŪTRAM by Vyāsa.

Foll. 65 to 69. Lines, 10 and 11 on a page. Extent, 200 granthas.

Begins on fol. 65 (*a*) of the manuscript described under R. No. 7267.

Same work as that described under D. No. 4649 wherein see for beginning and end.

Complete.

---

(R. Nos. 7269 to 7274 one bundle.)

Palm leaf. 13⅝—17⅜×1⅜—1⅝ inches. Foll. 85. Lines, 7 to 9 on a page. Grantha. Torn and slightly injured.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7269.

विधिसुधाकरः by अनन्ताचार्य ।

VIDHISUDHĀKARA by Anantācārya.

Foll. 1 to 40 (*b*). Lines, 7 to 9 on page. Extent, 1,125 granthas.

The other works herein are :—Advaitarahasyam, fol. 41 (*a*). Aghapancaṣaṣṭih with commentary, fol. 47 (*a*). Vapanavidhi, fol. 62 (*a*). Veda Nighaṇṭuḥ, fol. 70 (*a*). Siddhāntasiddhāñjanam, fol. 76 (*a*).

Same work as that described under D. No. 4477 wherein see for the beginning.

Incomplete.

**End :**

उत्पात्तिविधिश्च क्वचित् ब्रह्मोपासनमात्रोत्पादकः । यथा सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीतेत्यादौ क्वचिच्च ब्रह्मोपासनोत्पादकः यथा कहोळप्रश्ने एष त आत्मा सर्वान्तर इत्युक्तसर्वान्तरत्व · · · · ब्राह्मणः बाल्येन तिष्ठासेत् इत्युपासनविधिः । तथा च व्यतिहारसूत्रे श्रीभाष्यम् । सर्वान्तरात्मत्वविशिष्टे ब्रह्मण्युपास्य इति । विधिप्रत्ययश्चोत्तरत्र दृश्य · · · · · · · · · · · · बाल्येन तिष्ठासेदिति च । अत्र टीका तिष्ठासेत् ब्रह्मणि तिष्ठासेत् निष्ठां लभेत उपासीतेत्यर्थ इति । क्वचित् ब्रह्मोपासनगुणो · · · · · · · · · · · दिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दह ।

---

R. No. 7270.

अद्वैतरहस्यम् ।

ADVAITARAHASYAM.

Foll. 41 to 46. Extent, 150 granthas.

Begins on fol. 41 (*a*) of the manuscript described under the previous number.

A treatise on Vedānta. This endeavours to prove that the Viśiṣṭadvaita doctrine is acceptable to Śaṅkarabhagavatpāda as well as Appayya Dīksita. It appears that the author may be the Rāmasubba Sastri of Tiruvisanallur.

Complete.

**Beginning :**

अद्वैतं द्विविधं अवैदिकं वैदिकं चेति । अवैदिकं शून्याद्वैतम् । वैदिकं पञ्चविधम् । निर्विशेषाद्वैतभावाद्वैतविशिष्टाद्वैत भास्कराभिमता·द्वैतयादवमिश्राभिमताद्वैतभेदात् ।

* * * * *

तर्हि श्रीमच्छङ्कराचार्यमतप्रविष्टानां श्रीमद्रामानुजाचार्यमतप्रविष्टानां च विशेषो न स्यादिति वाच्यम् । श्रीरामानुजमतप्रविष्टानां तप्तचक्राङ्कनादिकं श्रीमच्छङ्करमतप्रविष्टानामस्मदादीनां तन्नेति विशेषात् ।

**End :**

सर्वं खल्विदं ब्रह्म तज्जलानित्यन्तं वाक्यं सर्वशब्दप्रयो · · · सर्वं खल्वित्यस्य शान्त उपासीतेत्येतदेकवाक्यत्वनिराकरणात् । · · · · · · नाभिमतं विशिष्टाद्वैतं निरूपितं तदयुक्तमित्यपास्तम् । विशिष्टाद्वैतस्य शङ्करभगवत्पादाभिमतत्वस्य दीक्षितपादाभिमतत्वस्य च उक्तत्वात् ।

**Colophon :**

इति शि · · · · सुब्बाशास्त्रिविरचितमद्वैतरहस्यं संपूर्णम् ।

---

R. No. 7271.

अघपञ्चषष्टिः सव्याख्या ।

AGHAPAÑCAṢAṢṬIH with commentary.

Foll. 47 to 62. Line, 7 on a page. Extent, 450 granthas.

Begins on fol. 47 (*a*) of the manuscript described under R. No. 7269.

Same work as that described under D. No. 3003 wherein see for beginning and end.

Complete.

---

R. No. 7272.

वपनविधिः ।

VAPANAVIDHI.

Foll. 63 to 70. Lines, 7 and 8 on a page. Extent, 225 granthas.

Begins on fol. 63 (*a*) of the manuscript described under R. No. 7269.

Similar to the work described under D. No. 3073.

Complete.

**Beginning :**

पुत्रादीनां मन्त्रवत्संस्कारे कृते स्नात्वा पश्चात् ज्ञातीनां वपनमाह—बोधायनः । एतस्मिन् कालेऽस्यामात्याः केशश्मश्रूणि वापयन्त इत्येतस्मिन् काले दहनानन्तरस्नानोत्तरकाल इत्यर्थः । "अशुद्धान् स्वयमप्येतानशुद्धस्तु यदि तं स्पृशेत् । विशुध्यत्युपवासेन तथा कृच्छ्रेण वा पुनः" इति ।

अशुद्धस्य शूद्रस्पर्शे प्रायश्चित्तविधानान्न स्नानात् पूर्वं वपनम् । आपस्तम्बश्च तेषु चोदकस्पर्शनं तावन्तं कालमनुभाविनां च परिवापनमिति, काश्यपः ।

सन्त्यज्य विधिवत् प्रेतं यज्ञेषु तु हविर्यथा ।
केशश्मश्रूवादिवपनं कुर्युरत्रानुभाविनः ॥

इति ।

आदिशब्देन लोमनखानि लक्ष्यन्ते ।

**End :**

सङ्ग्रहे—

क्षुरकं न च कुर्वीत चौलादूर्ध्वमिति त्रये ।
तथैवोपनयादूर्ध्वमुपाकर्म विना क्वचित् ॥

वापयेन्न कृतोद्वाहः वर्षं वर्षार्धमेव वा ।
भुञ्जीत पार्वणं नैव दर्शश्राद्धं च वर्जयेत् ॥

भ्रूप्रकोष्ठौ विना सर्वं नखलोमानि वापयेत ।

द्विमुण्डने तु सम्प्राप्ते कथं क्षौरं विधीयते ।
मन्त्रेण प्रथमं कुर्यात् पश्चात् क्षौरं समाचरेत् ॥

**Colophon :**

इति वपनविधिः ।

---

R. No. 7273.

वेदनिघण्टुः ।

VEDANIGHAṆṬUḤ.

Foll. 71 to 77. Lines, 8 and 9 on a page. Extent, 125 granthas.

Begins on fol. 71 (*a*) of the manuscript described under R. No 7269.

Same work as that described under D. No. 1026 and under the title Niruktam.

Five adhyāyas complete.

**End :**

सरण्युः । त्वष्टा । सविता । भगः सूर्यः । पूषा । विष्णुः । वैश्वानरः । वरुणः । केशी । केशिनः । वृषाकपिः । यमः । अज एकपात् । पृथिवी । समुद्रः । अथर्वा । मनुः । दध्यङ्ङ् । आदित्याः । सप्त ऋषयः । देवाः । विश्वे देवाः । साध्याः । वसवः वाजिनः । देवपत्न्यो देवपत्न्यः ।

**Colophon :**

इति पञ्चमोऽध्यायः । निघण्टुः संपूर्णः ।

---

R. No. 7274.

सिद्धान्तसिद्धाञ्जनम् by अनन्ताचार्य ।

SIDDHĀNTASIDDHĀÑJANAM by Anantācārya.

Foll. 77 to 85. Lines, 9 on a page. Extent, 300 granthas.

Begins on fol. 77 (*a*) of the manuscript described under R. No. 7269.

Same work as that described under D. No. 5069 wherein see for beginning.

Breaks off in the course of first pariccheda.

**End :**

न चोक्तोभयसम्बन्धेन प्रकृतित्वविशिष्टाक्षरत्वाद्यवस्थायाः प्रकृतौ सत्वात्तच्छून्यत्वलक्षणस्यासम्भव इति वाच्यम् । अक्षरत्वावस्थायास्तमस्त्वावस्थानांशरूपत्वेन तज्जन्यत्वेऽपि प्रकृतित्वावस्थानांशरूपत्वाभावेन तज्जन्यत्वासम्भवात् तन्नाशरूपावस्थाया एव तज्जन्यत्वात् अविभक्ततमसः कृत्स्नत एव विभक्ततमोरूपेण विभक्ततमसः कृत्स्नत एवाक्षररूपेणाक्षरस्य च कृत्स्नत एवाव्यक्तरूपेणापरिणामात् उक्तधर्मचतुष्टये एकैकस्य जन्यतासम्बन्धेन धर्मविशिष्टत्वेऽपि कालिकसम्बन्धेन तद्विशिष्टत्वाभावात् असंभवविरहात् अव्यक्तत्वनागवाद्यसमानकालीनत्वेन वा धर्मविशेषणेन अक्षरादीनां सुचालश्रुतावण्डावारकतया · · · · · · स्योक्तत्वात् तमः प्रभृतीनां निश्शेषपरिणामासम्भवेऽपि न क्षतिः । अव्यक्तत्वनाशप्रागभाववत्तस्यालघुलक्षणं बोध्यम् । सा च ।

R. No. 7275.

Palm-leaf. 18¼—18¾ × 1¼—1¾ inches. Foll. 109. Lines, 7 and 8 on a page. Grantha. Slightly injured. Extent, 3,000 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

वैयासिकन्यायमाला—सव्याख्या by भारतीतीर्थमुनि ।

VAIYĀSIKANYĀYAMĀLĀ with commentary by Bhāratītīrthamuni.

Same work as those described under D. Nos. 4751 and 4753. This is also called Adhikaranaratnamālā.

**Colophon:**

इति श्रीमत्परमहंसपरिव्राणकाचार्य श्रीभारतीतीर्थमुनिविरचितायामधिकरणरत्नमालायां चतुर्थाध्यायस्य चतुर्थः पादः ।

समाप्तेयमधिकरणरत्नमाला ।

---

(R. Nos. 7276 to 7294 one bundle.)

Palm-leaf. 10¼ × 1¾ inches. Foll. 130. Linas, 9 to 11 on page. Malayalam and grantha. Injured and eaten by white-ants.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7276.

शिवार्चनशिरोमणिः by ब्रह्मानन्दनाथ ।

ŚIVĀRCANAŚIROMAṆIḤ by Brahmānandanātha.

Foll. 1 to 91 (*a*). Extent, 2,700 granthas.

The other works herein are:—Cakrapratiṣṭhāvidhi, fol. 92 (*a*). Śivamānasikasnānavidhi, fol. 96 (*a*). Cidambarapañcākṣarīmantra, fol. 97 (*b*). Svarṇākarṣaṇabhairavamantra, fol. 98 (*b*). Dhanvantari mahāmantra, fol. 99 (*a*). Jārayakṣiṇīmantraḥ, fol. 99 (*b*). Harihara-putramahāmantra, fol. 99 (*b*). Mudrālakṣaṇam, fol. 100 (*a*). Śūlinīdurgā-parameśvarī mantraḥ, fol. 104 (*a*). Sūlinīmālā mantrah, fol. 104 (*b*). Śarabhaśūlinīmantraḥ, fol. 105 (*b*). Kriyābheda, fol. 106 (*b*). Caṇḍikā-hṛdayamantra, fol. 108 (*a*). Devīpūjāvidhi, fol. 109 (*b*). Setusnāna-vidhi, fol. 114 (*a*). Karṇayakṣīmahāmantrah, fol. 124 (*a*). Jautiṣa-viṣayah, fol. 125 (*a*). Pañcākṣarīmantraḥ, fol. 128 (*a*).

Same work as that described under D. No. 5726 wherein see for the end.

Contains Ullāsas 16 to 21 complete and 15 incomplete.

First of leaf contains Santānagopālamantra and Śaktipañcakṣari mantra.

**Beginning :**

अथाम्नायदीक्षाक्रमो लिख्यते । तत्रादौ गुरुशिष्यलक्षणं ज्ञेयम ।

यथा—

तत्र कादिमते—

सुन्दरः सुमुखः स्वच्छः सुलभो बहुमन्त्रवित् ।
असंशयः सङ्गहीनो निरपेक्षो गुरुर्मतः ।

सौन्दर्यं चानवद्यत्वं रूपसौमुख्यता पुनः ।
स्मेरपूर्वाभिभाषित्वं स्वच्छन्दाजिह्मवृत्तिता ॥

सौलभ्यमप्यगार्वित्वं सन्तोषो बहुतन्त्रता ।
असंशयस्तत्वबोधे सच्छिष्ये प्रतिपादनम् ॥

निरपेक्षमवित्तेच्छा गुरुत्वं हितवेदिता ।
एवंविधो गुरुर्ज्ञेयः इतरः शिष्यदूषकः ॥

---

R. No. 7277.

चक्रप्रतिष्ठाविधिः ।

CAKRAPRATIṢṬHĀVIDHIḤ.

Foll. 92 (*a*) to 95 (*b*). Lines, 5 to 11 on a page. Extent, 25 granthas.

Begins on fol. 92 (*a*) of the manuscript described under R. No. 7276.

A work bearing on the consecration of Cakra representing the goddess Sakti.

Complete.

**Beginning :**

अथ श्रीचक्रप्रतिष्ठा तु तन्त्रराजे—

चक्रे देव्यां तथा शिष्ये प्रतिष्ठा त्रिविधोच्यते ।
सा च तत्वविदा कार्या सम्प्रदायानुरोधिना ॥

गुर्वाज्ञया ऋते मोहात् लोभाद्वा कुरुते यदि ।
सपुत्रदारो निलयं प्राप्नुवन् निरयं व्रजेत् ॥

तस्मात् सम्पूर्णाभिषेके प्राप्तानुज्ञः समाचरेत् ।

**End :**

स्पर्शं जपेत् कराग्रेण श्रीचक्रं पूजयेदपि ।
एवं दिनत्रयं कृत्वा ततो नित्यक्रमं भजेत् ॥

गन्धैः पुष्पैर्नवैर्धूपैः दीपैर्नैवेद्यतर्पणैः ।
त्रिरात्रं पूजयेद्देवीं योगिनीं योगिभिः समम् ॥

एवं देविप्रतिष्ठायां क्रमः सान्निध्यकारकः ।

मूर्तिप्रतिष्ठायामपि एष एव विधिर्ज्ञेयः । तत्र स्थितताया विसर्जनं नास्तीति विशेषः ।

---

R. No. 7278.

शिवमानसिकस्नानम् ।

ŚIVAMĀNASIKASNĀNAM.

Foll. 96 (*a*) to 97 (*b*). Lines, 9 and 10 on a page. Extent, 30 granthas.

Begins on fol. 96 (*a*) of the manuscript described under R. No. 7276.

Same work as that described under D. No. 5805 but with the addition of the following stanza at the beginning.

Complete.

वीरासने समारूढं विद्युत्पिङ्गजटाधरम् ।
कराङ्कुरितचिन्मुद्रं कञ्चिद्देशिकमाश्रये ॥

**Colophon :**

शिवमानसिकस्नानं समाप्तम् ।

---

R. No. 7279.

चिदम्बरपञ्चाक्षरीमन्त्रः ।

CIDAMBARAPAÑCĀKṢARĪMANTRAḤ.

Foll. 97 (*b*) to 98 (*b*). Lines, 11 and 12 on a page. Extent, 25 granthas.

Begins on fol. 97 (*b*) of the manuscript described under R. No. 7276.

Similar to the work described under D. No. 6294.

Complete.

**Beginning :**

अस्य श्री चिदम्बरपञ्चाक्षरमहामन्त्रस्य, ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुस्सामाथर्वाणि छन्दांसि, आनन्दमहानटराजो देवता, आं बीजम्, ह्रीं शक्तिः, क्रों कीलकं, मम चिदम्बरसभानटेश्वरप्रसादसिद्ध्यर्थे महा-मन्त्रजपे विनियोगः ।

**End :**

ओं नमो भगवते दक्षाध्वरध्वंसताण्डवेश्वरायाभयहस्ताय, अमृतवरद-हस्ताय, चिदानन्दस्वरूपाय न्यं न्यं न्यां पातालद्वारं बन्धासि वन्धि मां रक्ष रक्ष मम शत्रून् भक्षय भक्षय, मा सर्वकार्याणि . . . . . दुष्ट-ग्रहान् बन्धय बन्धय हुं फट् स्वाहा ।

---

R. No. 7280.

स्वर्णाकर्षणभैरवमहामन्त्रः ।

SVARṆĀKARṢAṆABHAIRAVAMANTRAḤ.

Foll. 98 (*b*) to 99 (*a*). Extent, 10 granthas.

Begins on fol. 98 (*b*) of the manuscript described under R. No. 7276.

Similar to the work described under D. No. 7633.

Complete.

**Beginning :**

स्वर्णाकर्षणभैरवमहामन्त्रस्य । ब्रह्मा ऋषिः त्रिष्टुप्छन्दः । स्वर्णा-कर्षणभैरवो देवता । ऐं बीजं ह्रीं शक्तिः श्रीं कीलकम् । मम दारिद्र्यविद्रावणार्थे जपे विनियोगः ।

**End :**

ऐं ह्रीं श्रीं क्ष्म्र्च्यूं ओं ऐं क्लां क्लीं क्लूं ह्रां ह्रीं ह्रूं सः आपदोद्धार-णाय अजमलबन्धनाय लोकेश्वराय स्वर्णाकर्षणभैरवाय मम दारिद्र्यविद्रा-वणाय । ओं श्रीं महाभैरवाय नमः ।

R. No. 7281.

धन्वन्तरिमहामन्त्रः ।

DHANVANTARIMAHĀMANTRAḤ.

Fol. 99 (*a*) and (*b*). Extent, 10 granthas.

Begins on fol. 99 (*a*) of the manuscript described under R. No. 7276.

Similar to the work described under D. No. 6440.

Complete.

**Beginning :**

श्री धन्वन्तरिमहामन्त्रस्य, अवतारतम ऋषिः । अनुष्टुप् छन्दः । धन्वन्तरिमहाविष्णुर्देवता । मूलेन बीजादि अस्त्रान्तं विन्यस्य ।

ध्यानम्—

**End :**

ओं नमो भगवते वासुदेवाय धन्वन्तरये अमृतकलशहस्ताय सर्वामयविनाशनाय त्रैलोक्यनाथाय श्रीमहाविष्णवे स्वाहा ।

---

R. No. 7282.

जारयक्षिणीमन्त्रः ।

JĀRAYAKṢIṆĪMANTRAḤ.

Fol. 99 (*b*). Extent, 10 granthas.

Begins on fol. 99 (*b*) of the manuscript described under R. No. 7276.

This mantra is addressed to Jārayakṣiṇī who is considered to be red and having a black dress.

Complete.

**Beginning :**

अस्य श्रीजारयक्षिणीमन्त्रस्य । दुर्वासाः ऋषिः । अनुष्टुप् छन्दः । जारपदयक्षिणी देवता । क्षामित्यादि बीजाद्यस्त्रान्तं विन्यस्या ध्यानम् ।

रक्तवर्णशरीराभां कृष्णांशुकविभूषिताम् ।
दंष्ट्राकरालवदनां कृष्णमाल्यानुलेपनाम् ॥

**End :**

ओं नमो जारयक्षिकान्ते (?) नररुधिरनरमांसभक्षिणि क्रूरे जारचारोदिक्रान्ति क्षों, श्रूं मे कर्णे वद वद आं ह्रीं क्रों शीघ्रमागच्छागच्छ श्रौं वषट् ।

---

R. No. 7283.

हरिहरपुत्रमहामन्त्रः ।

HARIHARAPUTRAMAHĀMANTRAḤ.

Foll. 99 (*b*) and 100 (*a*). Extent, 10 granthas.

Begins on fol. 99 (*b*) of the manuscript described under R. No. 7276.

Similar to the work described under D. No. 7376.

Complete.

**Beginning :**

अस्य श्रीहरिहरपुत्रमहामन्त्रस्य । अर्धनारीश्वर ऋषिः । अनुष्टुप् छन्दः । हरिहरपुत्रो देवता । वह्निः कीलकम् । हरिहरपुत्रप्रसाद-सिद्ध्यर्थे जपे विनियोगः । हरिः ओं ह्रीं हरिहरपुत्राय पुत्रलाभाय शत्रुनाशनाय मदगजगमनाय महाशास्त्रे नमः । ध्यानम्—

**End :**

तेजोमण्डलमध्यगं त्रिणयनं दिव्याम्बरालङ्कृतं
देवं पुष्पशरेक्षुकार्मुकलसत् माणिक्यपात्रं वरं ।
बिभ्राणं करपङ्कजैर्मदगजस्कन्धाधिरूढं महा-
शास्तारं वरदं नमामि सततं त्रैलोक्यसंमोहनम् ॥

स्मर्तव्या पादुका पूर्वं चरणं तदनन्तरम् ।
पश्चाम्बा नव नाथाश्च मूलविद्या च षोडशी ॥

आधारविद्याषट्कं च पुनरङ्घ्रिद्वयं क्रमात् ।
मूलविद्या परा चातिरहस्ययोगिनी तथा ॥

शाम्भवी चैव हल्लेखा समयापरबोधिनी ।
कुलपञ्चाक्षरी पञ्चदशार्णानुत्तरात्मिका ॥

कुलविद्या ततः प्रोक्ता गुरुक्रमविमर्शिनी ।
अनानाख्या च सङ्केता विद्यानुत्तरपूर्विका ॥

षोडशी पूर्तिविद्या च महात्रिपुरसुन्दरी ।

---

R. No. 7284.

मुद्रालक्षणम् ।

MUDRĀLAKṢAṆAM.

Fol. 100 to 103 (*a*). Lines, 11 and 12 on page. Extent, 60 granthas.

Begins on fol. 100 (*a*) of the manuscript described under R. No. 7276.

Similar to the work described under R. No. 5796.

Incomplete.

**Beginning :**

अथ मुद्रालक्षणानि नारदपाञ्चरात्रे—

वामाङ्गुष्ठं पराङ्गुष्ठे कृत्वा हस्तद्वयेन तु ।
सावकाशत्वेन मुष्टिं कुर्यात् कुम्भाख्यमुद्रिका ॥

प्रयोगसारे—

त्रिशूलाग्रौ करौ कृत्वा व्यत्यस्तद्वहिते नयेत् ।
अस्त्रमुद्रेयमाख्याता वह्निप्राकारलक्षणा ॥

सारसङ्ग्रहे ऋषिच्छन्दो देवतानां न्यासे त्वङ्गुल्य ईरिताः । चतस्रोऽङ्गुष्ठरहिता इति ।

**End :**

करावङ्के प्रकल्प्यादौ अन्योन्यग्रथिताङ्गुली ।
मध्यमावुच्छ्रितौ कृत्वा तर्जनीभ्यामनामिके ।
बन्धयेल्लिङ्गमुद्रेयं देवानां मानसप्रिया ॥
नाभिदेशे करौ कृत्वा सक्तान्योन्यतलाङ्गुली ।
तर्जनीभ्यामनामाग्रे बन्धयेदितरेतरः ।
प्रसार्य मध्यमे मूले स्वाङ्गुष्ठाभ्यां तयोः स्पृशेत् ।
प्रसिद्धा योनिमुद्रेयं देवीनां चित्तरञ्जिनी ॥

पद्माकारौ करौ कृत्वा श्लेषयेन्मध्यमाङ्गुली ।
बिम्बमुद्रेयमाख्याता मार्ताण्डहृदयप्रिया ॥

Fol. 103 (*b*) is left blank.

---

R. No. 7285.

शूलिनीदुर्गापरमेश्वरीमन्त्रः ।

SŪLUNĪDURGĀPARAMEŚVARĪMANTRAḤ.

Fol. 104 (*a*) and (*b*). Extent, 15 granthas.

Begins on fol. 104 (*a*) of the manuscript described under R. No. 7276.

Similar to the work described under D. No. 7420.

Complete.

**Beginning :**

अस्य श्री शूलिनीदुर्गापरमेश्वरीमहामन्त्रस्य । वसिष्ठ ऋषिः । देवी गायत्री छन्दः । महाशूलिनी दुर्गापरमेश्वरी देवता । दुं बीजं, स्वाहा शक्तिः, ह्रीं कीलकं । मम सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः । श्रामित्यादि षडङ्गं कृत्वा न्यासमन्त्रम् ।

**End :**

मूलमन्त्रम्—

दुं श्रीं श्रीं ओं ज्वल ज्वल शूलिनि दुष्टग्रहं हुं फट् स्वाहा ।

---

R. No. 7286.

शूलिनीमालामन्त्रः ।

SŪLINĪMĀLĀMANTRAḤ.

Foll. 104 (*b*) to 105 (*b*). Lines, 11 on a page. Extent, 20 granthas.

Begins on fol. 104 (*b*) of the manuscript described under R. No. 7276.

Similar to the work described under D. No. 7426.

Complete.

**Beginnin**

ओं नमो भगवति दिग्बन्धने कं कालरात्रि दुं दुर्गे शं शूलिनि, वं वटुकभैरवि, अर्धरात्रि, विलासिनि, महानिशिप्रतापकेलिनि महाज्ञाघरे, सभूतप्रेतपिशाचपिङ्गलि ;

**End :**

ओं नमो भगवति व्याघ्रचर्माम्बरि जटामकुटधारिणि, ठम् मदवक्रकमलधरित्रि त्रिशूलकपालडमरुकपाशाङ्कुशधारिणि हुं फट् स्वाहा ।

---

R. No. 7287.

शरभशूलिनीमन्त्रः ।

ŚARABHAŚŪLINĪMANTRAḤ.

Foll. 105 (*b*) to 106 (*b*). Extent, 15 granthas.

Begins on fol. 105 (*b*) of the manuscript described under R. No. 7276.

This mantra is addressed to the goddess Sarabhasūlinī and its repetition is considered to have the power to enable one to secure one's desires and counteract the hostile movements of one's enemies.

Complete.

**Beginning :**

शरभशूलिनीमहाचक्रं त्रिकोणं विलिखेत् । पूर्वं तद्बहिर्वृत्तमालिखेत् । तद्बहिश्चाष्टपत्रन्तु पुटीकृत्येन्द्रपुरम् ।

भूपुरद्वन्द्वबाह्ये तु षट्कोणं विलिखेत् तथा ;
कोणाग्रे शूलमालिख्य तद्बाह्ये पृथिवीं लिखेत् ॥

**End :**

सारस्वतप्रयोगे तु मुक्ताधवलरूपिणि ।
एवं ध्यात्वा जपेत् दुर्गां शूलिनीमर्थसिद्धये ॥

इति शूलिनीमहाचक्रं सम्पूर्णम । शूलिनीचक्रार्चना । गुं गुरुभ्यो नमः । गं गणाधिपतये नमः । दुं दुर्गायै नमः । क्षं क्षेत्रपालाय नमः । आं आत्मने नमः । आं अन्तरात्मने नमः । पं परमात्मने नमः । ज्ञं ज्ञानात्मने नमः । ओं दुर्गायै नमः ।

ओं वरदायै नमः । विन्ध्यवासिन्यै नमः । असुरमर्दिन्यै नमः । युद्धप्रियायै नमः । देवसिद्धसुपूजितायै नमः । नन्दिन्यै नमः । महायोगेश्वर्यै नमः । परायै नमः । ततो लोकपालपूजा । धूपदीप-नैवेद्यम् । बलिकर्म कुर्यात् ।

---

R. No. 7288.

क्रियाभेदः ।

KRIYĀBHEDAḤ.

Foll. 106 (*b*) to 108 (*a*). Extent, 25 granthas.

Begins on fol. 106 (*b*) of the manuscript described under R. No. 7276.

This work deals with a different method of worship from that of the work described under the previous number of the goddess Sarabha-śūlini.

Complete.

**Beginning:**

> अथातः संप्रवक्ष्यामि क्रियाभेदं तु पार्वति ।
> अभक्तानामगम्यन्तु भक्तानां शीघ्रसिद्धिदम् ।
>
> स्तम्भनाकर्षणं चैव वश्यविद्वेषणं तथा ।
> उच्चाटनं मारणं च एवं षड्भेदमुच्यते ॥

**End:**

त्रिकोट्यष्टकुलनागान् आकर्षयाकर्षय । द्विकोटिपिशाचानाकर्षयाकर्षय । एककोटिहरिहरब्रह्मराक्षसानाकर्षयाकर्षय । हुं हुः । स्वां पूरय पूरय । अन्यविद्यां स्फोटय स्फोटय । रां रीं रूं सदाशिवाज्ञापयति स्वाहा ।

---

R. No. 7289.

चण्डिकाहृदयम् ।

CAṆḌIKĀHṚDAYAM.

Foll. 108 (*a*) to 109 (*b*). Extent, 20 granthas.

Begins on fol. 108 (*a*) of the manuscript described under R. No. 7276.

Similar to the work described under D. No. 6278.

Complete.

**Beginning :**

अथ चण्डिकाहृदयमन्त्रस्य आत्रिः ऋषिः । अतिबृहती छन्दः । चण्डिका परमेश्वरी देवता । मम सर्वाभीष्टप्रसादसिद्ध्यर्थं चण्डिकासमाराधनार्थे चण्डिकाहृदयमन्त्रे करिष्ये ।

**End :**

हां हीं हूं हैं हौं हः एकविंशति परिजाप्ये ।
राजद्वारे विवादे शत्रुसङ्कटे ।
युद्धे च रणमध्येषु सर्वकार्यं च सिद्ध्येत् ।

**Colophon :**

इति चण्डिकाहृदयं संपूर्णम् ।

त्रिसन्ध्यं कीर्तयेद्यस्तु शुद्धचित्तो दृढव्रतः ।
लभते चिन्तितं कार्यं मन्त्रिणां च समो भवेत् ॥

**Beginning :**

इति श्रीमन्मार्कण्डेयपुराणे सूर्यसावर्णिके मन्वन्तरे श्रीदेवीमाहात्म्ये चण्डिकाहृदयं नाम त्रयोविंशोऽध्यायः ।

---

R. No. 7290.

देवीपूजाविधानम् ।

DEVĪPŪJĀVIDHĀNAM.

Foll. 109 (*b*) to 111 (*b*). Extent, 75 granthas.

Begins on fol. 109 (*b*) of the manuscript described under R. No. 7276.

Similar to the work described under D. No. 5659.

Complete.

**Beginning :**

अथ देवीपूजाविधिः—

अथातः संप्रवक्ष्यामि पूजामार्गं नराधिप ।
अथ स्वर्गकामोऽश्वमेधेन यजेतेत्यादौ इष्टसाधनत्वं कृतिसाध्यत्वं वा यद्विधिः स समभिव्याहृतक्रियान्वयी, तदन्वयी वेति मूलम् । अस्यार्थः स्वर्गकामोऽश्वमेधेन यजेतेत्यादौ याद्विधिः विध्यर्थः । विध्यर्थस्तु द्विविधः । इष्टसाधनत्वमिति नैयायिकमते कृतिसाध्यत्वमिति उभयमते ।

**End :**

तथा हि—स्वर्गकामोऽश्वमेधेन यजेतेत्यादौ अपूर्वोपस्थितिं विना यागे स्वर्गसाधनत्वं नान्वेति । तदनन्वये तु न नियोज्यत्वाद्यन्वयः । तदनन्वये तु न यागे कृतिसाधनताज्ञानमिति यागे स्वर्गकामकृतिसाध्यतान्वयानुरोधेन ।

---

R. No. 7343.

विधिवादः ।

VIDHIVĀDAḤ.

Foll. 29 (*a*)—72 (*a*). Extent, 1,250 granthas.

Begins on fol. 29 (*a*) of the manuscript described under R. No. 7341.

Similar to the work described under D. No. 4279.

Complete.

**Beginning :**

ओदनकामः पचेत स्वर्गकामो यजेत इत्यादि विधिवाक्यं पाकयागादौ प्रवर्तकम् । तस्य च तथात्वं न साक्षात् । अव्युत्पन्नानां ततोऽप्रवृत्तेः । किं तु अर्थज्ञानद्वारेति तस्य प्रवर्तकज्ञानजनकत्वोपपत्तये प्रवर्तकज्ञानविषये लिङः शक्तिरिति सर्वेषामेवानुमतम् ।

**End :**

क्रियायां यस्य विशेषणस्याभेदः संसर्गतया भासते तद्वाचकपदोत्तरमेव क्रियाविशेषणानामित्यादिना द्वितीया इष्यते । अत्र तृतीयार्थोऽभेद इत्यलं पल्लवितेन ।

**Colophon :**

इति विधिविचारः ।

---

R. No. 7344.

Palm-leaf. 15 and 15¾ × 1½—1⅝ inches. Foll, 51. Lines, 9 and 10 on a page. Grantha. Slightly injured. Extent, 1,800 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

तत्वचिन्तामणिदीधितिप्रकाशिका by गदाधर ।

TATVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ by Gadādhara.

Same work as that described under D. No. 4040.

Contains Siddhāntalakṣaṇa incomplete.

Fol. 1 contains the definition of pakṣatā.

**Beginning :**

प्रतियोगितावच्छेदकावच्छिन्नं यत्र भवतीति यथाश्रुतमूलात् यत्पदार्थे साध्ये प्रतियोगितावच्छेदकावच्छिन्नान्यत्वं प्रतीयते । तथा च वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणमहानसीयवह्नित्वाद्यवच्छिन्नाभावमादाय दोषो दुर्वारः । सर्वेषामेव वह्न्यादीनां तादृशाभावप्रतियोगितावच्छेदक-विशिष्टतया तदन्यत्वासंभावात् ।

**End :**

व्यभिचारनिरूपकाधिकरणप्रलयत्वादिनिष्ठायामुक्तसंबन्धघटकाधेयतायां कालिकसंबद्धवह्निनिरूपितत्वसाध्यीयविषयतासंबद्धवह्निनिरूपितत्वयोः सत्वेन आधेयतासामान्ये दर्शितत्रित्वावच्छिन्नाभावसत्वेन साध्याभावस्य प्रतियोगि-वैयधिकरण्यानिर्वाहात् । प्रातियोगिताधार्मिकोभयावघटितलक्षणे च नेयमनुप-पत्तिः हेत्वधिकरणपर्वतादिनिष्ठस्य ।

R. No. 7345.

Palm-leaf. 17—17½ × 1½—1⅝ inches. Foll. 57. Lines, 10 and 11 on a page. Grantha. Injured. Extent, 3,000 granthas.

Purchased in 1939-40 from T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

तत्वचिन्तामणिप्रकाशः by रुचिदत्तः ।

TATTVACINTĀMAṆIPRAKĀŚAḤ by Rucidatta.

Same work as that described under D. No. 4013 which contains a different portion.

Śabda pariccheda and Anumāna pariccheda incomplete.

**Beginning :**

थिव्यादिभिन्नत्व · · · · जानन्ति इच्छायाः पृथिव्याद्यनाश्रितत्वं जानन्ति तेषामप्यनुमानात् इत्याहुः । अथ व्यतिरेकि नानुमानम् । सर्वत्र प्रमेयत्वादिना · · · · · · · दिति चेत् न व्यतिरेकिणो बलवत्वात् । अन्ये तु व्यतिरेकिण्यभाव एव साध्यः । स चाप्रसिद्ध एव सिध्यति ।

**End :**

निश्चयाकारश्च यथा संभवति सहस्रे शतमिति । तस्मादत्राद्यो न प्रमाणम् । द्वितीयस्तु अविनाभावपुरस्कारात् । अनुमानमेव · · · · · · · · · · पूर्वोक्तन्यायेन सम एव । एतच्च सर्वमनुसन्धाय सिद्धवदाह सिद्धमिति ।

सन्तः स्वभावसुभगास्सुजनोपकार-
संभारमात्रशरणाः करुणारसार्द्राः ।
अभ्यर्थये कृतिमिमां कृतिनो भवन्तः
· · · · · · · ननु दृशा परिशीलयन्तु ॥

श्रीदेवदत्ततनयो विनयोपगूढः
श्रीवेणुकाविमलगर्भपुटोपजातः ।
श्रीशक्तिदत्तमतिदत्तमहोदयो यः
सोऽमुं चकार रुचिदत्तकृती प्रकाशम् ॥

**Colophon :**

इति रुचिदत्तकृतचिन्तामणिप्रकाशः समाप्तः ।

R. No. 7346.

Palm-leaf. 14⅝ × 1⅜ inches. Foll. 17. Lines, 9—11 on a page. Grantha. Slightly injured. Extent, 650 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

वेदान्तपरिभाषाव्याख्या—शिखामणिः ।

VEDĀNTAPARIBHĀṢĀ VYĀKHYĀ—ŚIKHĀMAṆIḤ.

Same work as that described under D. No. 4739.

Contains Anumāna and Upamāna paricchedas complete and Āgama pariccheda incomplete.

**Beginning :**

एवं सर्वप्रमाणज्येष्ठतया प्रथमं प्रत्यक्षप्रमाणं निरूपितम् । इदानीं शिष्यावधानार्थमनुमाननिरूपणं क्रियत इति प्रतिजानीते—अथेति । प्रत्यक्षानन्तरमित्यर्थः । सर्वमतसाधारणलक्षणमाह अनुमितीति । ननु नानुमितिकारणत्वमपि तल्लक्षणं तद्घटकानुमितेर्लक्षणाभावेन दुर्निरूपत्वात् ।

. . . .

ननु चित्रगुमानय गभीरायां नद्यां घोषः इत्यादावपि गवादिपद एव लक्षणा । न च नियामकाभावः । विशेष्यपदत्वस्य नियामकत्वात् । अत एवाभेदान्वयस्थले नीलो घट इत्यादौ विशेषणविभक्तिः साधुत्वार्था । न च पदान्तरवैयर्थ्यम् । चित्रगोस्वामिनि गभीरनदीतीरादौ तात्पर्यद्योतकत्वात् । अत एव प्रजयतीत्यादावुपसर्गस्य प्रकृष्टजये तात्पर्यद्योतकत्वं न तु शक्तिर्लक्षणा वा । ततश्च वाक्ये न लक्षणा इत्यत आह—एवमिति । अर्थवादवाक्यानामिति । न हि विश्वरूपो वै जा—

---

R. No. 7347.

Palm-leaf. 15⅜ × 1⅜ inches. Foll. 131. Lines, 7 on a page. Grantha. Slightly injured. Extent, 3,250 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

तत्वचिन्तामणिव्याख्या—फक्किका by मथुरानाथ ।

TATTVACINTĀMAṆI VYĀKHYĀ—PHAKKIKĀ by Mathurānātha.

Same work as that described under D. No. 4027 wherein see for the beginning.

Contains Śabdapariccheda incomplete.

**End :**

अत्र च स्वजन्यतत्संसर्गाभावप्रमाविशेष्यत्वसंबन्धेन तत्करणाभाव इति भेदः । बोधनीयसंसर्गेति बोधनयोर्द्वयोरन्वयी य अन्वयितावच्छेदकः संबन्धः तदीयतन्निष्ठतदीयान्वयितावच्छेदकसंबन्ध इति यावत् । तदभावप्रमायास्तत्राभावः तत्र तद्योग्यतेत्यर्थ. । प्रतियोग्यप्रसिद्धेरिति प्रमेयमाभिधेय ।

---

R. No. 7348.

Palm-leaf. 15—15½ × 1¼ inches. Foll. 5. Lines, 9 and 10 on a page. Grantha. Much injured. Extent, 300 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

तत्वचिन्तामणिः दीधितिप्रकाशिकासहितः ।

TATTVACINTĀMAṆIḤ with Dīdhiti and prakāśikā.

Same work as those described under D. Nos. 3982, 4002 and 4055.

Contains Sāmānyanirukti incomplete.

**Beginning :**

चि—अथ हेत्वाभासाः तत्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते तत्रानुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम् । . . . . .
दीधि—एतावता प्रबन्धेन सपरिकरं हेतुं निरूप्य तत्प्रसङ्गात् तत्वनिर्णयादिरूपतत्कार्यकारित्वाच्च तदाभासनिरूपणं . . . . . . ते—अथेति ।

प्र—हेत्वाभासनिरूपणे प्रसङ्गस्यापि सङ्गतित्वं संभवति । व्याप्तिपक्षधर्मताविशिष्टहेतुनिरूपणे व्याप्तिपक्षधर्मताविरोधिताद्विरहवतो दुष्टहेतोः ।

**End :**

तत्र प्रथमव्यभिचारतात्पर्यकस्थले व्यभिचारपदार्थैकदेशे अभावे अनुयोगितारूपषष्ठ्यर्थस्य तत्र प्रकृत्यर्थतावच्छेदकवह्नित्वाद्यवच्छिन्ननिरूपितत्व . . . प्रकृत्यर्थस्यान्वयः । मत्वर्थीयार्थश्च स्वरूपसंबन्धवान् । तस्य चाभेदसंबन्धेन प्रथमान्तार्थे अन्वयः । द्वितीयव्यभिचारतात्पर्यकस्थले च तदेकदेशसामानाधिकरण्ये हेतुपदार्थान्वितप्रथमान्तार्थे ।

R. No. 7349.

Palm-leaf. 17 × 1⅛—1⅜ inches. Foll. 90. Lines, 5 and 6 on a page. Grantha. Slightly injured. Extent, 1,750 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

सिद्धान्तकौमुदी by भट्टोजिदीक्षित ।

SIDDHĀNTAKAUMUDĪ by Bhaṭṭoji dīkṣita.

Same work as those described under D. Nos. 1375 and 1386.

Cantains Svaraprakriyā complete.

**Beginning :**

अनुदात्तं पदमेकवर्जम् । परिभाषेयम् । स्वविधिविषया यस्मिन् पदे यस्योदात्त . . . . . वा विधीयते तमेकवचनं वर्जयित्वा शिष्टं तत् पदं अनुदात्तं च स्यात् । गोपायतन्नः । अत्र सनाद्यन्ता इति धातुत्वे धातुस्वरेण धकारागकार उदा . . . . . ।

**End :**

तथा विद्यादक्षराणामवग्रहे वेति । नन्वेवमुपगन्तवै अनेन तपा इत्या . . . . दीनामवग्रहे उत्तरखण्डाद्यवर्णस्य प्रचयस्य . . . . . यद्यादौ स . . . . . द्युदात्तानामसंहितावदुत्तरा नेति विशेषवचनात् । एवं रत्नधातमम् । अल . . . ।

---

R. No. 7350.

Palm leaf. 16⅛ × 1⅜ inches. Foll. 67. Lines, 7 end 8 on a page. Grantha. Slightly injured. Extent, 2,144 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

तत्त्वचिन्तामणिरहस्यम् by मथुरानाथ ।

TATTVACINTĀMAṆI RAHASYAM by Mathurānātha.

Same work as that described under D. No. 4028 which contains Utsannapracchanna vāda in Śabdakhaṇḍa.

Contains yogyatāvāda, Āsattivāda and Tātparyavāda in Śabdakhaṇḍa. Herein the leaves are not to be properly arranged.

**Beginning :**

· · · · · वच्छेदकावच्छिन्नत्वावच्छिन्नत्वोभयाभावविशिष्टप्रामाण्य-घटकतदधिकरणनिष्ठाधिकरणताकान्यत्वं तत् प्रामाण्यविरोधित्वम् । घट-त्वाभावाधि · · · · · रणतावप्रामाण्यघटके घटरूपाधिकरणे घटत्वाभाव-वद्विशेष्यकत्वावच्छिन्नत्वाधिकरणता च न तादृशे घटत्वप्रकारकत्वरूपाधि-करणे इति तये · · · · · · नवच्छिन्नत्वेऽपि न क्षतिः ।

**End :**

केचित्तु नित्यत्वेन निर्दोषत्वेन चेति प्रयोजकद्वयपरतया व्याचक्षते । तदसत् । नित्यत्वं यदि यथाश्रुतं तदा विसंवादिवाक्यमात्रेऽनिव्याप्तेः । आनुपुर्वी · · · · · नां सर्वत्र नित्यत्वात् । यदि नित्यानुपूर्वीविशिष्टत्वं तदा लौकिकमात्राव्याप्तेः । एतेन नित्यत्वविशिष्टनिर्दोषतयेति विशिष्ट-(विशिष्ट)प्रयोजकपरतया व्याख्यानमपि परास्तम् । नित्यत्वनिर्दोषत्वे ।

---

(R. Nos. 7351—7354 one bundle.)

Palm leaf. 16½—17 × 1⅜ inches. Foll. 130. Lines, 7 and 8 on a page. Grantha. Slightly injured.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7351.

मुक्तावलीव्याख्या—प्रभा by रायनरसिंह ।

MUKTĀVALĪVYĀKHYĀ—PRABHĀ by Rāyanarasimha.

Foll. 1 (*a*)—117 (*b*). Extent, 3,000 granthas.

The other works herein are :—Śārīrakanyāyanirṇayavyākhyā, fol. 118 (*a*). Mṛtyuñjayamānasapūjāstotram, fol. 125 (*a*). Darśatarpaṇarcaḥ, fol. 130 (*a*).

Same work as that described under D. No. 3971.

Contains Guṇaparicceda incomplete.

**Beginning :**

अथ द्रव्याश्रिता इति मूलस्थाथशब्दस्य केवलारम्भकार्थकत्वे द्रव्यगुणयोः सङ्गत्यप्रदर्शनेन न्यूनतापत्तिः । अतः आनन्तर्यार्थकत्वमपि वाच्यम् । एवं च विभागवाक्यात् द्रव्यस्यैव प्रथममुपस्थितत्वेन तत्रैवादौ जिज्ञासा जायते । तन्निरूपणेन तन्निवृत्तौ · · · · · · वक्तत्वरूपा-वसरसङ्गत्या गुणा निरूप्यन्त इति ।

**End :**

तन्निष्ठसंयुक्तसंयोगपरंपरासामान्यघटकसंयोगसमुदायस्य निरुक्तसङ्ख्या-पेक्षया अधिकसङ्ख्यापर्याप्त्यधिकरणत्वज्ञानं न परत्वोत्पादकं काशीनिष्ठ-पाटलीपुत्रावधिका या काचित् संयुक्तसंयोगपरंपरा तद्घटकसंयोगसमुदाय-पर्याप्तसङ्ख्यापेक्षया काशीनिष्ठपाटलीपुत्रावधिकसमुदायस्याधिकसङ्ख्यापर्या-प्त्यधिकरणत्वेन तज्ज्ञानात् ।

---

R. No. 7352.

शारीरकन्यायनिर्णयव्याख्या ।

ŚĀRĪRAKANYĀYANIRṆAYA VYĀKHYĀ.

Foll. 118—124 (*a*). Extent, 150 granthas.

Begins on fol. 118 (*a*) of the manuscript described under the previous number.

This is a commentary on Śārīrakanyāyanirṇaya of Ānandagiri which itself is a commentary on Śaṅkarabhagavatpāda's famous Sūtra-Bhāṣya.

Contains only a small portion.

**Beginning :**

अध्यस्तान्ध्यमपूर्वमर्थधिग्राह्यं पुमर्थास्पदं
लक्ष्यं लक्षणभेदतः श्रुतिगतं निर्धूतसाध्यार्थकम् ।
आम्नायान्तविभातविश्वविभवं सर्वाविरुद्धास्पदं
शक्यज्ञानसमर्थसार्थविधुरं ब्रह्म प्रपद्ये सदा ॥

अथ नन्दिकेश्वरावतारो भगवान् आनन्दगिर्याचार्यः श्रीमच्छरीरक-भाष्यं पदशो व्याचिकीर्षुरादौ विघ्नोपशमनाद्यर्थं तत्वानुस्मरणलक्षणं मङ्ग-लाचरणं श्लोकद्वयेनोपनिबध्नाति अध्यस्तान्ध्यमिति । सदा ब्रह्म प्रपद्ये इत्यन्वयः । ब्रह्म बृहत् त्रिविधपरिच्छेदशून्यं प्रपद्ये प्रत्यगात्मत्वेन साक्षात्करोमीत्यर्थः । उक्तसाक्षात्कारस्य कादाचित्कत्वव्यावृत्त्यर्थं सदेति-पदम् । ननु ब्रह्मणस्त्रिविधपरिच्छेदशून्यत्वं न घटते जडप्रपञ्चस्य सत्वा-दित्याशङ्क्याह—अध्यस्तान्ध्यमिति ।

* * * * * *

अन्यथा ईश्वरप्रसादो नायाति । तदभवावादेव साक्षात्कारो न सिध्यति । अत एवेश्वरप्रसादनिमित्तानुभवसिद्ध्यर्थमीश्वर उपासितव्य इति तात्पर्यार्थः ।

**End :**

नित्याध्यासनविध्युपादापितवेदान्तवचोभिः आपततः प्रतिपन्नं शास्त्रारम्भौपयिकमनुबन्धजातं न्यायतो निर्णेतुं भगवान् बादरायणः सूत्रितवान्—अथातो ब्रह्मजिज्ञासेति ।

---

R. No. 7353.

मृत्युञ्जयमानसपूजास्तोत्रम् ।

MṚTYUÑJAYA MĀNASAPŪJĀSTOTRAM.

Foll. 125 (*a*)—128 (*b*). Extent, 100 granthas.

Begins on fol. 125 (*a*) of the manuscript described under R. No. 7351.

Same work as that described under D. No. 11135 wherein see for both beginning and end.

Complete.

---

R. No. 7354.

दर्शतर्पणर्चः ।

DARŚATARPAṆARCAḤ.

Fol. 130 (*a*) only. Extent, 10 granthas.

Begins on fol. 130 (*a*) of the manuscript described under R. No. 7351.

Same work as that described under D. No. 3065.

Complete.

**Beginning :**

उदीरतामङ्गिरस आयन्त्वित्यूर्जमित्यपि ।
पितृभ्य इति ये चेह मधुवाता इति तृचम् ॥

पितन् ध्यायन् प्रसिञ्चेद्दै जपेन्मन्त्रान् यथाक्रमम् ।
तृप्यध्वमिति पठेत्ततः प्राञ्जलिरानतः ।

**End :**

चन्द्रिकायाम् ।

सव्यं जानु ततोऽन्वाच्य पाणिभ्यां दक्षिणामुखः ।
तल्लिङ्गैस्तर्पयेन्मन्त्रैः सर्वान् पितृगणांस्तथेति ॥

---

R. No. 7355.

Palm leaf. 19½—19⅝ × 1½ inches. Foll. 56. Lines, 8—10 on a page. Grantha. Injured. Extent, 2,000 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

लघुसिद्धान्तकौमुदी by वरदराज ।

LAGHUSIDDHĀNTAKAUMUDĪ by Varadarāja.

Same work as that described under D. No. 1455 wherein see for the beginning.

Complete.

**End :**

मद्राकरोति । कुमारं माङ्गल्यमुण्डनेन संस्करोतीत्यर्थः । भद्राच्चेति वक्तव्यम् । मद्राकरोति । परिवापणे किम् । भद्रं करोति । मद्रं करोति ।

**Colophon :**

इति तद्धिताः ।

* * * * * *

शार्ङ्गरवाद्यञो ङीन् । शार्ङ्गरवादेञो यो आकारस्तदन्ताच्च जातिवाचिनो ङीन् । शार्ङ्गरवी ब्राह्मणी । बैदी । नृनरयोर्वृद्धिश्च । . . . . . . युवन् शब्दस्य स्त्रियां तिः स्यात् । युवतिः ।

**Colophon :**

इति स्त्रीप्रत्ययाः ।

* * * * * *

अन्योन्यमपि प्रणमन्ति । अन्योन्यौ अन्योन्यान् । अन्योन्येन अन्योन्यस्मै दत्तमित्यादि । एवं परस्परम् । अत्र कस्कादित्वात् विसर्जनीयस्य सः । इतरेतरमित्यादि ।

**Colophon :**

इति द्विरुक्तिप्रक्रिया ।

. . . . . ष्टानां बालानामुपला(लिका)लङ्कारिका ।

कृता वरदराजेन लघुसिद्धान्तकौमुदी ॥

**Colophon :**

इति श्रीविद्वन्मकुटरत्नस्य लक्ष्मीधरसूरिसूनोर्भट्टोजिदीक्षितस्य शिष्येण वुटिकण्टि-वरदराजभट्टेन . . . . सिद्धान्तकौमुदी संपूर्णा ।

---

R. No. 7356.

Palm leaf. 15⅞—16 × 1¼ inches. Foll. 83. Lines, 6 and 7 on a page. Grantha. Injured. Extent, 1,800 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

आपस्तम्बगृह्यसूत्रवृत्तिः अनाकुला by हरदत्तमिश्र ।
ĀPASTAMBAGṚHYASŪTRAVṚTTIḤ ANĀKULĀ by Haradatta-miśra.

Same work as that described under D. No. 16065 but with numerous variants.

Complete in 8 paṭalas.

**Beginning :**

नमो रुद्राय यद्गृह्यमापस्तम्बेन निर्मितम् ।
क्रियते हरदत्तेन तस्य वृत्तिरनाकुला ॥

अथ कर्माण्याचाराद्यानि गृह्यन्ते । द्विप्रकाराणि कर्माणि । श्रुति-लक्षणानि आचारलक्षणानि च ।

**End :**

उत्तरं कर्म होमामिमं कृत्वा परिषेचनान्तेऽश्मानं परिधीमन्तः ध्यानं मृत्युनिवारणम । प्रतिष्ठापयत्युत्तरयर्चा इमं जीवेभ्य इत्येतया । अभ्यासः प्रश्नसमाप्तिसूचकः ।

**Colophon :**

इति हरदत्तमिश्रविरचितायां गृह्यवृत्तावनाकुलायामुत्तममष्टममं पटलं समाप्तम् ।

R. No. 7357.

Palm leaf. 14⅞—15⅛ × 1⅛ inches. Foll. 97. Lines, 6 and 7 on a page. Grantha. Injured. Extent, 2,000 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

भाट्टदीपिका by खण्डदेव ।

BHĀṬṬADĪPIKĀ by Khaṇḍadeva.

Same work as that described under D. No. 4423.

Contains the 4th adhyāya and the last 2 padās of 3rd adhyāya complete.

**Beginning :**

सर्वार्थमप्रकरणात् । अनारभ्य श्रूयते 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति.' इत्यादिना अव्यभिचरितक्रतुसंबन्धिजुहूद्देशेन विधीयमाना पर्णता तद्द्वारा जुहूसाध्यक्रत्वङ्गमिति स्थिते सा किं प्रकृतिविकृतिसाधारणी उत प्रकृतेरेवेति चिन्तायामविशेषात् सर्वेषामपि ।

**End :**

क्रमादेरुत्तरकालमाकाङ्क्षायामपि निराकाङ्क्षत्वज्ञानाभावमात्रेण वाक्यस्य पूर्वप्रवृत्त्युपपत्तेः । तेन च कालस्य क्रमस्य वा विधेयत्वेन विशिष्य तद्घटितसंबन्धस्य सोमयागेऽवगमात् । नाम्नः प्रसिद्धार्थकत्वेन तस्यैव फलसंबन्धावगमेन प्राधान्यमन्येषां तदङ्गत्वमिति तद्विकृतावतिदेशः । तदेवं प्रयोज्यवर्गो निरूपितः ।

**Colophon :**

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां चतुर्थस्याध्यायस्य चतुर्थः पादः ।

* * * * * *

क्रमश्च सर्वत्रोत्तरपदार्थाङ्गम् । तस्यैव काहं कर्तव्य इत्यपेक्षणात् । न तु पूर्वपदार्थाङ्गम् । उत्तरं कः पदार्थः कर्तव्य इत्यपेक्षायाः क्वचिदप्यदर्शनात् । पूर्वपदार्थस्तु प्रतियोगितया, क्रमविशेषणम् दर्शपूर्णमासादिरिव पूर्वकालतायाः । एतेन उभयपूर्वापर्यरूपोऽपि क्रमः पदार्थद्व ।

(R. Nos. 7358 and 7359 one bundle.)

Palm leaf. 14½—15⅞ × 1⅛—1⅜ inches. Foll. 42. Lines, 6 to 8 on a page. Grantha. Injured.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7358.

देवतात्वविचारः by अनन्तदेव ।

DEVATĀTVAVICĀRAḤ by Anantadeva.

Foll. 1 (*a*)—35 (*a*). Extent, 750 granthas.

The other work herein is Tatvacintāmaṇidīdhiti, fol. 36 (*a*).

This is a treatise on mīmāṁsā. This work gives definition of Devatā or deity as well as the authority therefor. It refutes the objections that are presented by other schools of thought. It is in an argumentative style.

The author of this work is one Anantadeva. One Anantadeva is included in the list of royal poets quoted in antholiogieā. Another Anantadeva is the author of Krishnabhakticandrikā. There is another man, called Anantadeva Silhara whose grant is dated Śaka 1016. It is not known whether there is any connection to this author with the abovementioned Anantadevas. It appears that this work may be also called as Devatāsvarūpavicāra.

Complete.

**Beginning :**

ननु किमिदं देवतात्वं । कश्च तदाश्रयः । कानि च तत्र मानानि । कथं च तेषां बलाबलमिति । न तावत् . . . . . . . द्देश्यत्वं देवतात्वमाग्नेयपुरोडाशत्यागसमये प्रमादादुद्देश्यतां तस्य . . . . त्वप्रसङ्गात् । न च विहितत्वविशेषणेन तत्परिहारः । सान्नाय्याद्यङ्गत्वे . . . . . . हितत्वात् ।

**End :**

न चोच्चार्यत्वं देवतात्वं येन तन्निर्णये मन्त्रस्य देवतात्वनिर्णये बलीयस्त्वेन व्यवह्रियत इति चतुर्थीमन्त्रयोः बलाबलाक्षेपपरिहारः ।

**Colophon :**

देवताविषयाशेषदोषराशिविशोषिणी ।
अनन्तदेववागेषा सतां तोषाय जायताम् ॥

**Colophon :**

इति देवतात्वविचारः ।

R. No. 7359.

तत्वाचिन्तामणिव्याख्या—दीधितिः by रघुनाथशिरोमणि ।

TATVACINTĀMAṆIVYĀKHYĀ—DĪDHITIḤ by Raghunāthaśiromaṇi.

Foll. 36 (*a*) to 42 (*b*). Extent, 125 granthas.

Begins on fol. 36 (*a*) of the manuscript described under the previous number.

Same work as that described under D. No. 4002 which contains the Anumānakhaṇḍa.

Contains prāmāṇyavāda incomplete.

**Beginning :**

गिरं गुरूणां हृदये निधाय विधाय सिद्धान्तसरोऽवगाहम्
संक्षेपतः श्रीरघुदेवनामा चिन्तामणेर्दीधितिमातनोति ॥

प्रेक्षावत्प्रवृत्तये फलवच्छास्त्रोपकरणत्वेन प्रयोजनवत्तां अभिधेयसंबन्धौ चाह स्वीयग्रन्थस्य—अथेत्यादिना विविच्यत इत्यन्तेन । जगत् संसार्यात्मजातम् ।

**End :**

उक्तयावत्सामग्रीग्राह्यत्वाभावरूपपरतस्त्वसाधने सिद्धसाधनमिति वाच्यम् । व्यधिकरणप्रकारकाजनकत्वेन सामग्रीविशेषणात् । पूर्वोक्तदिशैवात्र निष्कर्षो बोध्य इत्याहुः । तच्चिन्त्यम् । तज्ज्ञानविषयकेति ।

---

R. No. 7360.

Palm leaf. 14¾—15 × 1½ inches. Foll. 180. Lines, 8—10 on a page. Telugu. Slightly injured. Extent, 6,500 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

अद्वैतसिद्धिव्याख्या—लघुचन्द्रिका by ब्रह्मानन्दसरस्वती ।

ADVITASIDDHIVYĀKHYĀ—LAGHUCANDRIKĀ by Brahmānandasarasvati.

Same work as that described under D. No. 4531.

Contains 2nd to 4th pariccheda complete.

**Beginning :**

मा भैष्टेत्यमृतस्यन्दिमुखचन्द्रमनोहरम् ।
गोवर्धनधरं धाराधरधौरेयमाश्रये ॥

श्रीनारायणतीर्थानां पदपङ्केरुहस्मृतिः ।
स्मृतिमव्याहतां कुर्यात् सदा पदपदार्थयोः ॥

पदार्थनिष्ठं पदार्थयोः भेदबुद्धिविरोधित्वे सत्यखण्डविषयकम् । वाक्यार्थनिष्ठं उक्तबुद्धिविरोधित्वे सत्यखण्डविषयकम् । पदार्थौ च महावाक्यीयौ ग्राह्यौ ।

**End :**

अकाण्डे अनवसरे दूषणशून्ये मन्मते । ग्रामसिंहस्य शुनकस्य । इष्टनैष्कर्म्यब्रह्मगानां इष्टादिपदाव्यवहितोत्तराणाम् । सिद्धीनां सिद्धीतिपदानां । नामनामिनोरभेदोपचारात् । इष्टसिद्ध्यादिग्रन्थलाभः हिरण्यपूर्वं कशिपुं प्रचक्षत इत्यादिवत् ब्रह्मगानामित्यन्ते लक्षणया वा तल्लाभः ।

* * * * * *

एषा यद्यपि चन्द्रिका खलमनोराजीवराजेररि-
ध्वान्तच्छेदकरी सरीसृपमुखव्याघातमुद्राकरी ।
साधूनां सकलस्वभावकरुणाकूपारसारात्मनां
चेतश्चन्द्रमणीमणीषु रमणी जाता तथापि स्फुटम् ॥

**Colophon :**

इति श्रीपरमानन्दसरस्वतीपूज्यपादशिष्यश्रीब्रह्मानन्दसरस्वतीविरचितायामद्वैतसिद्धिटीकायामद्वैतलघुचन्द्रिकायां चतुर्थः परिच्छेदः ।

। समाप्तेयं लघुचान्द्रिका ।

---

(R. Nos. 7361 and 7362 one bundle.)

Palm leaf. 15¼—15⅜ × 1⅛—1¼ inches. Foll. 20. Lines, 6 to 8 on a page. Grantha. Slightly injured.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7361.

साधारणक्रोडपत्रम् ।

SĀDHĀRAṆAKRODAPATRAM.

Foll. 1 (*a*)—10 (*b*). Extent, 150 granthas.

The other work herein is Parāmarśavicāraḥ, fol. 11 (*a*).

A treatise on one of the three divisions of the fallacy known as Savyabhicāra or Anaikāntika.

Incomplete.

**Beginning :**

साध्यवत्ताज्ञानविश्लेषप्रतिबध्यतावच्छेदिका सती साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकीभूता या विषयता तदाश्रयधर्मिकहेतुसामानाधिकरण्याभावप्रकारकज्ञानाविरोधित्वरूपसाधारण्यलक्षणं गदाधरभट्टाचार्येण कृतम् । ननु तथापि पर्वतो धूमव्याप्यवान् वह्नेरित्यत्र धूमव्याप्याभावव्याप्यधूमाभावत्वावच्छिन्नविषयताया अपि धूमव्याप्याभावव्याप्यत्वावच्छिन्नविषयतात्वेन धूमव्याप्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकत्वात् ।

एवं ।

**End :**

एवं तादृशी या प्रकारता तन्निरूपितहेतुसामानाधिकरण्यविषयतापि प्रकारतात्वेन विवक्षणीया । अन्यथा विह्नसामानाधिकरण्याभावो घटा ।

---

R. No. 7362.

परामर्शविचार ।

PARĀMARŚAVICĀRAḤ.

Foll. 11 (*a*)—20 (*b*). Extent, 200 granthas.

Begins on fol. 11 (*a*) of the manuscript described under the previous number.

Similar to the work described under the D. No. 4268.

Contains only the later portion.

**Beginning :**

महानसीयवह्नित्वादिना व्यापकताज्ञानं विनापि शुद्धवह्नित्वादिना व्यापकताज्ञानस्य महानसीयवह्नौ लाघवमित्यादिलाघवज्ञानस्याङ्गीकारेण महानसीयवह्निभिन्नवह्न्यभाववान् पर्वत इत्यादीतरभेदसहकारेण वा महानसीयत्वविशिष्टवह्नित्वादिरूपेण तादृशवह्न्यादिविधेयकानुमितिजनकत्वात् तादृशानुमितौ तथाविधलाघवज्ञानेतरबाधयोर्हेतुत्वं कल्पनीयम् ।

**End :**

सामग्रीप्रतिबन्धकतावच्छेदककोटौ तादृशपरामर्शस्य निवेशे तादृश-परामर्शशून्यकालीनाननुगतेच्छायाः तत्तद्व्यक्तित्वेनोत्तेजकत्वानभ्युपगमेन लाघवानपायादिति युक्तः पन्थाः ।

**Colophon :**

समाप्तोऽयं विचारः ।

---

R. No. 7363.

Palm leaf. 19⅜—20⅛ × 1⅛—1¼ inches. Foll. 54. Lines, 6 and 7 on a page. Grantha. Injured. Extent, 1,500 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

सिद्धान्तकौमुदीव्याख्या—बालमनोरमा by वासुदेवदीक्षित ।

SIDDHĀNTAKAUMUDĪ VYĀKHYĀ—BĀLAMANORAMĀ by Vāsudevadīkṣita.

Same work as that described under D. No. 15898.

Contains the Lugvikaraṇa or the second conjugation and Vikārārthaprakaraṇa in Taddhita complete and Śaiṣika Ṭhagadhikāra prakaraṇas in Taddhita incomplete.

**Beginning :**

त्र इत्यत्र तथादर्शनात् । पञ्चरात्रः । न न्यूनः नाप्यतिरिक्तः । सम इत्यर्थः । संप्रतिशब्दात् विनयादित्वात् ठञि सांप्रतिकः । प्रज्ञादित्वादणि स्वार्थे अणि तु सांप्रतमित्यपि भवति । एतर्हि संप्रतीदानीमिति कोशादिदानीमित्यर्थेऽपि । प्रकृते तु साम्यं विवक्षितम् ।

**End :**

सिद्धवत्कृत्य विधिलिङ्याह—ह्रुवीतेति । आशीर्लिङ्याह—ह्रोषीष्टेति । लुङ्याह—अह्रोष्टेति ।

**Colophon :**

. . . श्रीवासुदेवदीक्षितविरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां लुग्विकरणनिरूपणं समाप्तम् ।

The Scribe adds :—

निरोधिकृन्नामसंवत्सरे दक्षिणायने शरदृतौ कार्तिकमासे शुक्लपक्षे एकादश्यां सुन्दरेण संपूर्णत्वेन लिखितम् ।

---

(R. Nos. 7364—7367 one bundle.)

Palm leaf. $12\frac{7}{8}$—$13\frac{7}{8}$ × $1\frac{1}{8}$—$1\frac{7}{8}$ inches. Foll. 81. Lines, 7 to 10 on a page. Grantha. Injured.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7364.

अवयवविचारः ।

AVAYAVAVICĀRAḤ.

Foll. 1 (*a*) to 40 (*a*). Extent, 1,000 granthas.

The other works herein are :—Vyutpattivāda vyākhyā, fol. 41 (*a*). Pauṣavādaḥ with ṭippaṇi, fol. 50 (*a*), Evakārārthavivecanam, fol. 70 (*a*).

Similar to the work described under R. No. 3143 (*b*).

Incomplete.

**Beginning :**

ादृशयत्किञ्चिच्छाब्दबोधनिरूपिता शाब्दज्ञाननिष्ठा या या कारणता तत्तदवच्छेदककोटिप्रविष्टयत्किञ्चिज्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदाय-त्वस्य विवक्षितत्वान्नास्माकं न्यायैकदेशेऽतिव्याप्तिः । यत्किञ्चिच्छा-ब्दबोधपदं च प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थविषयकसमूहालम्बनबोध-परम ।

**End :**

प्रकृतपक्षतावच्छेदकावच्छिन्नान्वितस्वार्थबोधकतदुपस्थापितार्थान्वित-स्वार्थबोधकत्वे सति न्यायावयवत्वात् । तत्र साध्यतावच्छेदकावच्छिन्नान्वित-स्वार्थबोकत्वोक्तौ प्रमेयत्वं प्रमेयवद . . . . ।

## R. No. 7365.

व्युत्पत्तिवादव्याख्या ।

VYUTPATTIVĀDA VYĀKHYĀ.

Foll. 41 (*a*) to 49 (*a*). Extent, 150 granthas.

Begins on fol. 41 (*a*) of the manuscript described under the previous number.

Similar to the work described under D. No. 4300.

Incomplete. (Contains a small portion in the 2nd Khaṇḍa of Dvitīyāvibhakti or objective case.)

**Beginning :**

मर्यादेति—मर्यादाशब्दस्य समयबन्धत्वादिपरत्वभ्रमनिरासाय सीमेति । समभिव्याहृतक्रियानधिकरणमिति तदर्थः । तावन्मात्रस्योत्तरोत्तरकालदेशसाधारणत्वादाह—कालनिष्ठमिति । शुद्धदशम्युत्तरकाले पूजासीमात्वव्यवहारवारणाय तत्कालनिष्ठमिति । यद्यपि शुद्धदशमींसीमेत्यादौ विशेष्यीभूतदशमीप्रागभावाधिकरणत्वघटितसीमात्वप्रत्यायनस्य व्युत्पत्तिसिद्धत्वादेव नोक्तव्यवहारप्रसङ्गः । तथापि तादृशव्युत्पत्तिसूचनार्थमेव तत्कालनिष्ठमित्युक्तम् ।

**End :**

तिथीति । तन्निष्ठत्वं च तन्निष्ठकालविशेषानवच्छिन्नाधिकरणताकत्वं तेन पूजाधिकरणतिथावपि पूजाभावस्य कालविशेषावच्छेदेन सत्वेऽपि न व्यापकत्वानुपपत्तिः । ननु यत्र चैत्रेण षोडशपूजाः कृताः मैत्रेण तु एकैव पूजा कृता तत्र मैत्रीयपूजाया अपि चैत्रीयपूजावृत्तिपूजाविशेषत्वरूपतादृशधर्मवत्वात् विधिबोधितत्वापत्तिः !

---

## R. No. 7366.

पौषवादव्याख्या or (व्युत्पत्तिवादव्याख्या) by देवभद्रशर्मा ।

PAUṢAVĀDAVYĀKHYĀ or (Vyutpattivādavyākhyā) by Devabhadraśarma.

Foll. 50 (*a*) to 70 (*a*). Extent, 325 granthas.

Begins on fol. 50 (*a*) of the manuscript described under R. No. 7364.

Same work as that described under R. No. 2278 but with an addition of the following stanza.

Complete.

**End :**

काशीपुरनिवासेन देवभद्रेण शर्मणा ।
प्रणीतः पौषवादार्थः प्रीतये विदुषां सताम् ॥

कृष्णस्वामिलिखितम् ।

---

D. No. 7367.

एवकारार्थविवेचनम् ।

ĒVAKĀRĀRTHAVIVECANAM.

Foll. 70 (*a*) to 81 (*b*). Lines, 6 and 7 on a page. Extent, 250 granthas.

Begins on fol. 70 (*a*) of the manuscript described under R. No. 7364.

Similar to the work described under R. No. 2738 (*a*).

Complete.

**Beginning :**

अत्र एवकारमात्रस्य व्यवच्छेदमात्रे शक्तिः । अयोगान्ययोगात्यन्तायोगानां समभिव्याहारविशेषाल्लाभ इति प्राञ्चः । तन्न । समभिव्याहारो नामाकाङ्क्षा । तल्लभ्यो हि वाक्यार्थः ; न तु पदार्थः । पदोपस्थितानामर्थानां संसर्गस्यैव तल्लभ्यत्वात् ।

**End :**

एवकारादिस्थले एकपदार्थयोगवत् क्वचिदेकशक्तिविषयस्यापि द्विधान्वयादिति अभावमात्रे शक्त्या ज्ञानमर्थं गृहाणेत्यादौ मुख्यप्रयोगोऽन्यत्र लक्षणेत्याहुरिति समासः ।

**Colophon :**

इत्येवकारविवेकः समाप्तः ।

---

R. No. 7368.

Palm leaf. 16⅛—16⅝ × 1—1⅛ inches. Foll. 115. Lines, 6 and 7 on a page. Grantha. Injured. Extent, 4,000 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

तत्वचिन्तामणिदीधितिप्रकाशिका by गदाधर ।

TATVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ by Gadādhara.

Same work as that described under D. No. 4041 wherein see for the beginning.

Contains up to the end of Anumitiprakaraṇa.

**End :**

निर्विकल्पकस्येति अनुमानाधीनसिद्धिकत्वात् तन्मात्राधीनव्यवस्थिति-
कत्वादित्यर्थः । तन्मते स्वप्रकाशतया अनुव्यवसाय . . . . . . .
त्वाद्यवगाहित्वोपगमे विषयानवस्थानप्रसङ्गेन संभावनायाश्च अप्रमात्वेन
तद्व्यवस्थापकप्रमाणाभावादिति भावः ।

---

R. No. 7369.

Palm leaf. 15¾—16⅜ × 1⅛—1⅜ inches. Foll. 100. Lines, 6 and 7 on a pages, Grantha. Injured. Extent, 2,500 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

तत्वचिन्तामणिदीधितिप्रकाशिका by गदाधर ।

TATVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ by Gadādhara.

Same work as that described under D. No. 4041 wherein see for the beginning.

Contains Anumānakhaṇḍa up to Vyāptivāda.

**End :**

वृत्तित्वविशेषणस्य समानाधिकरणधर्मावच्छिन्नाभावोऽपि वृत्तिमद्वृत्तिः
संभवतीति यावत्तादृशाभावान्तर्गत तद्वा . . . . . . नाधिकरणधर्मा-
वच्छिन्नाभाववृत्तित्वस्य प्रकृतहेतुतावच्छेदकीभूतकिञ्चिद्धर्मावच्छिन्नस्य . .
. . . . . . ।

---

R. No. 7370.

Palm-leaf. 14⅞—15⅜ × 1⅜ inches. Foll. 125. Lines, 8—10 on a page. Grantha. Slightly injured. Extent, 3,500 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

शास्त्रदीपिका by पार्थसारथिमिश्र ।

ŚĀSTRADĪPIKĀ by Pārthasārathimiśra.

Same work as that described under D. No. 4478 wherein see for the beginning.

Contains from the second pāda of the first adhyāya to the end of the second pāda of the third adhyāya.

**End :**

तत्र संशयः ... किमुच्चैस्त्वादयः ऋगादीनां धर्माः । मन्त्राणामित्यर्थः । ऋचा . . . . . . . णोच्चैः किं वा वेदधर्माः । ऋग्वेदो नोच्चैरिति । उपक्रमे वेदश्रवणात् उपसंहारे च ऋगादिश्रवणात् . . . . . . . . वेदशब्दो हि मन्त्रब्राह्मणसमुदायात्मनो ग्रन्थविशेषस्य वक्ता नैककस्य मन्त्रवाक्यस्य ब्राह्मणवाक्य ।

---

R. No. 7371.

Palm-leaf. 15⅜ × 1⅞ inches. Foll. 146. Lines, 10 and 11 on a page. Grantha. Slightly injured. Extent, 6,000 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

अद्वैतसिद्धिव्याख्या—लघुचन्द्रिका by ब्रह्मानन्दसरस्वती ।

ADVAITASIDDHIVYĀKHYĀ—LAGUCANDRIKĀ by Brahmānanda Sarsvatī.

Same work as that described under D. No. 4531 wherein see for the beginning.

Contains the first pariccheda incomplete (up to pratyakṣa pramāṇopapattiprakaraṇa).

Foll. 146 contains a small portion of Prāmāṇyavādadīdhiti.

**End :**

स्वसमभिव्याहृतपदार्थतावच्छेदकरूपेणात्यन्ताभावबोधकत्वस्य व्युत्पत्तिसिद्धत्वात् । अन्यथा निर्घटं सघटमित्याद्यापत्तेः । एवं च सामान्यरूपेण विशेषस्य प्रागभावादिरिह कपाले घटो नास्तीत्यादौ समवायावच्छिन्नतया ।

---

R. No. 7372.

Palm-leaf. 16⅛ 16⅜ × 1¼—1⅜ inches. Foll. 89. Lines, 8 and 9 on a page. Grantha. Injured. Extent, 2,800 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

कृष्णयजुर्वेदसंहिताभाष्यम्—वेदार्थप्रकाशः by माधवाचार्य ।

KṚṢṆAYAJURVEDASAMHITĀBHĀṢYAM—VEDĀRTHA-PRAKĀŚAḤ by Mādhavācārya.

Same work as that described under D. No. 109.

Contains the third Kāṇḍa from the fifth anuvāka of the ninth prapāṭhaka to the end.

**Beginning :**

चतुर्थे रविर्योजनालङ्कारावुक्तौ । पञ्चमे ब्रह्मोद्यनामको होतृब्रह्मणो ब्राह्मणयोः प्रश्नोत्तररू · · · · · · कारेण उत्तरौ महिमानौ परिवप्यौ हुत्वा चात्वाले मार्जयित्वा भीतोऽग्निष्टं ब्रह्मोद्याय पर्युपविशेते । दक्षिणो ब्रह्मो · · · · · · सुत् पूर्वचित्तिरित्येतस्यानुवाकस्य पृष्टानि होतुः प्रतिज्ञातानि ब्रह्मण इति पृष्टानि प्रश्नवाक्यानि प्रतिज्ञातान्युत्तरवाक्यानि तदिदं · · · · · · · ।

**End :**

तस्मात् विश्वजिता तृषीणामिदं सत्रं सहस्रदिनमिति राद्धान्तः ।

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमां · · · · · · · · · · · श्वरः ॥

**Colohon :**

इति श्रीमद्दिव्ययोगीन्द्रश्रीविद्यातीर्थमुनीश्वरापरावतारश्रीमद्राजाधिराजराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कमहाराजस्य · · · · · · · · · · · · विराचिते वेदार्थप्रकाशे · · · · · · · · · · · · · प्रपाठकः । संपूर्णं काण्डम् ।

---

R. No. 7373.

Palm-leaf. 16½—16⅝ × 1⅜ inches. Foll. 177. Lines, 7 and 8 on a page. Grantha. Slightly injured. Extent, 4,500 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

भाट्टदीपिकाव्याख्या—भाट्टचिन्तामणिः by वाञ्छेश्वरयज्वन् ।

BHĀṬṬADĪPIKĀVYĀKHYĀ—BHĀṬṬACINTĀMAṆIḤ by Vāñcheśvarayajvan.

A commentary on Khaṇḍadeva's Bhāṭṭadīpika, that has been described under D. No. 4423. This Bhāṭṭacintāmaṇi is different from Gāgābhaṭṭa's Bhāṭṭacintāmaṇi.

The author of this work is one Vāñcheśvarayajvan of the Kāmakāyana, Viśvāmitra family. He is the son of Nṛsiṁhasūri and the grandson of Mādhavasūri and the greatgrandson of Śleṣakavisārvabhauma Vāñcheśvarasūri, the author of Mahiṣaśataka, Dhāṭīśataka and Āśīśśataka. He belongs to one Hosala Karṇāṭaka community. He is the native of Sahajendrapura or Saharājendrapura in Tanjore district.

Tri. Cat.—15A

The other works composed by this author are :—

(1) Kākatālīyavādārtha.
(2) Vidvanmanohara.
(3) Malamāsanirṇaya.
(4) Dattacintāmaṇi.
(5) Śrāddhacintāmaṇi.
(6) Brahmasūtrārthacintāmaṇi.
(7) Commentary on Mahiṣaśatakam.
(8) Commentary on Hiraṇyakeśisūtras.

Contains the first adhyāya complete.

**Beginning :**

वन्दे ढुण्ढि महालिंगं विश्वेशं मणिकर्णिकाम् ।
ईश्वरश्रीनिवासार्याहोबिलाख्यगुरूत्तमान् ॥

श्रीमत्कावेरजातीरं विद्वद्वृन्दोपशोभितम् ।
अत्युत्तमाशिवक्षेत्रं विष्ण्वादिस्थानमस्ति हि ॥

श्रीशहराजेन्द्रपुरे श्रीशहराजेन्द्रविष्टरैः सदृशे ।
कृतवासो विमलमतिः होशनिकर्णाटकः सुधीः श्रीमान् ॥

चक्रे माहिषशतकं घाटीशतकं तथाशिषां शतकम् ।
श्लेषकविसार्वभौमः श्रीमान् वाञ्छेश्वरः स्वतन्त्रोऽसौ ॥

तस्य नप्ता माधवार्यपौत्रः श्रीनरसिंहतः ।
वेदवेदाङ्गतत्वज्ञात् सर्वशिष्टाग्रपूजितात् ॥

लब्धजन्माधीतशास्त्रो वेदार्थैकनिविष्टधीः ।
माहिषं शतकं येन प्रपितामहनिर्मितम् ॥

व्याख्यातमतिगम्भीरं पितृप्रोक्तेन वर्त्मना ।
हिरण्यकेशिसूत्रं च व्याख्यातं कृत्स्नमेव हि ॥

दत्तचिन्तामणिं चैव श्राद्धचिन्तामणिं तथा ।
कृतवान् ब्रह्मसूत्रार्थचिन्तामणिमनुत्तमम् ॥

काकतालीयवादार्थः कृतो येनातिदुर्घटः ।
श्रीवाञ्छेश्वरनामासौ तनुतेऽद्य यथामति ॥

श्रीभाट्टदीपिकाव्याख्यां भाट्टचिन्तामणिं मुदा ।
दोषसत्वेऽपि कृपया गुणं गृह्णन्तु पण्डिताः ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थमनुष्ठितमिष्टदेवतानमस्कारलक्षणं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नन् चिकीर्षितं प्रतिजानीते— विश्वेश्वरमिति ।

**End :**

वृत्तवर्तिष्यमाणयोः सङ्गतिं प्रदर्शयन्नध्यायार्थमुपसंहरति—तदेवमिति । सूत्रार्थस्तु, अर्थात् सामर्थ्यात् कल्पनाकल्पितं पदमपि वेदैकदेशत्वात् वेदावयवतुल्यत्वात् प्रमाणमेवेति शिवम् ।

**Colophon :**

इति श्रीमच्चोलदेशाग्रपूज्यविद्वत्समाजविराजमानकवेरजोत्तुङ्गतरङ्गशीकरशीतलशहराजेन्द्रपुरनिवासिकामकायनविश्वामित्रगोत्रजलधिकौस्तुभश्लेषकविसार्वभौमवाञ्छेश्वरसूरिवरप्रपौत्रश्रीमाधवसूरिवरपौत्रश्रीनृसिंहसूरिवरात्मजाश्वलायनसूत्रहोशनिकर्णाटजातीयवाञ्छेश्वरयज्वनः कृतिषु भाट्टदीपिकाव्याख्याने भाट्टचिन्तामण्यभिधाने प्रथमस्याध्यायस्य चतुर्थः पादः ।

अध्यायश्च संपूर्णः ।

The scribe adds—

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः । लोकनाथेन लिखितम् । अस्य प्रथमस्याध्यायस्य ग्रन्थसङ्ख्या सप्तशताधिकचतुस्सहस्रम् । पत्रसङ्ख्या शताधिकषट्सप्ततिः ।

---

## R. No. 7374.

Palm-leaf. 17¼—18⅜ × 1¼—1⅜ inches. Foll. 201. Lines, 6 and 7 on a page. Telugu, Slightly injured. Extent, 6,000 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

ब्रह्मसूत्रवृत्तिः—ब्रह्मामृतवर्षिणी by धर्मभट्ट ।

BRAHMASŪTRAVṚTTI–BRAHMĀMṚTAVARṢIṆĪ by Dharmabhaṭṭa.

Same work as that described under D. No. 4689 wherein see for the end.

Contains from the second pāda of the first adhyaya to the end of the fourth pāda of the fourth Adhyāya.

**Beginning :**

लिङ्गवशात् । न तथेह ब्रह्मलिङ्गमस्ति । किं तु ब्रह्मणः प्रकरणित्वमेव । तथा च प्रकरणापेक्षया लिंगस्य बलवत्वात् जीवस्य मनोमयत्वादिलिंगमस्तीति तत्परत्वमेवास्त्विति प्रत्युदाहरणसङ्गतिः । यद्वा पादान्तरत्वान्नावान्तरसङ्गत्यपेक्षेति । सर्वत्राधिकरणे सविशेषवाक्यविचाररूपे पूर्वोत्तरपक्षयोः उपास्तिरेव फलम् । यत्र तु निर्विशेषवाक्यविचारस्तत्र पूर्वपक्षे उपास्तिः । सिद्धान्ते प्रमितिरिति भेदः ।

**End :**

प्रथमाध्यायस्य सूत्राणि—१३४ ।

| | |
|---|---|
| १—पादे ... ... ... ... | ३१ |
| २—पादे ... ... ... ... | ३२ |
| ३—पादे ... ... ... ... | ४३ |
| ४—पादे ... ... ... ... | २८ |
| सर्वम् | १३४ |

द्वितीयाध्यायस्य सूत्राणि—१५५ ।

| | |
|---|---|
| १—पादे ... ... ... ... | ३७ |
| २—पादे ... ... ... ... | ४५ |
| ३—पादे ... ... ... ... | ५१ |
| ४—पादे ... ... ... ... | २२ |
| सर्वम् | १५५ |

तृतीयाध्यायस्य सूत्राणि—१८५ ।

| | |
|---|---|
| १—पादे ... ... ... ... | २७ |
| २—पादे ... ... ... ... | ४१ |
| ३—पादे ... ... ... ... | ६६ |
| ४—पादे ... ... ... ... | ५१ |
| सर्वम् | १८५ |

चतुर्थाध्यायस्य सूत्राणि—७८ ।

| | |
|---|---|
| १—पादे ... ... ... ... | १९ |
| २—पादे ... ... ... ... | २१ |
| ३—पादे ... ... ... ... | १६ |
| ४—पादे ... ... ... ... | २२ |
| सर्वम् | ७८ |

। आहत्य ५५२ ।

The scribe adds :—

सर्वजिन्नामसंवत्सर आषाढशुद्धाष्टमीसोमवारं पगलु मूडुजामुलन्नरकुदुष्ठ-श्रीनिवासुलु हरिसीतारामशास्त्रिगारिकि ब्रह्मसूत्रवृत्ति व्रायडमु, अयिनदि ।

---

R. No. 7375.

Palm-leaf. 18—18⅛ × 1⅓—1½ inches. Foll. 140. Lines, 6 to 8 on a page. Grantha. Injured. Extent, 4,000 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

माधवीयधातुवृत्तिः by सायण ।

MĀDHAVĪYADHĀTUVṚTTIḤ by Sāyaṇa.

Same work as that described under R. No. 1483 wherein see for the end.

Contains Bhvādi the first conjugation only incomplete.

**Beginning :**

वति । जिजीव । जीविता । जिजीविषति । जेजीव्यते । यवकारान्तानां चोठ्भाविनात्र यङ्लुगस्तीति . . . . . . . . . . . वुक्तम् · जीवयति । अजिजीवत् । भ्राजभासेत्यादिना णौ चङि उपधाया ह्रस्व विकल्पः । यावज्जीवम् ।

R. No. 7376.

Palm-leaf. 18⅛—18⅜ × 2—2¼ inches. Foll. 137. Lines, 7—9 on a page. Grantha. Slightly injured. Extent, 5,000 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

जैमिनीयन्यायमालाविस्तरः by माधवाचार्य ।

JAIMINĪYANYĀYAMĀLĀVISTARAḤ by Mādhavācārya.

Same work as that described under D. No. 4412.

Contains from the fifth pāda of the sixth adhyāya to the end of the twelfth adhyāya. But two stanzas are wanting in the beginning.

**Beginning :**

उच्यते ।

दर्शपूर्णमासयोः श्रूयते—यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति त्रेधा तण्डुलान् विभजेत् । ये मध्यमाः स्युः तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात् । ये स्थविष्ठाः, तानिन्द्राय प्रदात्रे दधश्चरुम् । येऽणिष्ठाः, तान् विष्णवे शिपिविष्टाय शृते चरुम् इति । अयमर्थः ।

**End :**

वेदानां स्थितिकृत् पुरोहरिहरोऽभूत्सूत्रकृज्जैमिनिः ।
तद्भाष्यं शबरो सायसाय . . . . . . . . . . ॥

**Colophon :**

न्यायमालाविस्तरे द्वादशाध्यायस्य चतुर्थः पादः समाप्तः । समाप्तश्चाध्यायः ।

---

R. No. 7377.

Palm-leaf. 14½—14⅝ × 1⅜—1½ inches. Foll. 150. Lines, 7 to 9 on a page. Grantha. Slightly injured. Extent, 3,500 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

न्यायभास्कर by अनन्ताचार्य ।

NYĀYABHĀSKARA by Anantācārya.

Same work as that described under R. No. 4726.

Contains the bhaṅgas from 2nd to 12th complete.

**Beginning :**

तादृशसंशयस्य पक्षतावच्छेदकत्वान्न गौरवावकाश इति वाच्यम् ; पुरुषभेदेन कालभेदेन च भिन्नानां तादृशसंशयसंशयव्यक्तीनां मध्ये एकस्यास्तद्व्यक्तित्वेन पक्षतावच्छेदकत्वं नान्यस्य इत्यत्र विनिगमकाभावात् न्यायप्रयोगे तदादिशब्देन पक्षादिनिर्देशस्यासांप्रदायिकताया भवद्भिरेव सकृदावेदितत्वात् ।

**Colophon :**

इति शेषकुलतिलकस्य यादवाचलनिवासरसिकस्यानन्ताचार्यस्य कृतौ न्यायभास्करे पक्षतावच्छेदकनिर्वचनभङ्गः प्रथमः ।

**End :**

शशशृङ्गं सदिति ज्ञानवत् शशशृङ्गाज्ञानस्य युक्तत्वात् स्वकालत्वाव्यापकस्वधीकत्वं प्रतिभासमात्रशरीरत्वमित्युक्तावपि शुक्तिरूप्यादौ तदसिद्धिः असतः स्वकालाप्रसिद्धेरिति निरस्तम् । निरुक्तप्रतिभासमात्रशरीरत्वस्य असत्ववादिमतेऽपि उपपत्तेरिति ।

**Colophon :**

इति शेषकुलतिलकस्य यादवाद्रिनिवासरसिकस्य अनन्ताचार्यस्य कृतौ न्यायभास्करे दृश्यत्वादिहेतूनां निरुपधिकत्वभङ्गो द्वादशः ।

---

R. No. 7378.

Palm-leaf. 16¾—17½ × 1⅜ inches. Foll. 70. Lines, 7 to 9 on a page. Grantha. Much injured. Extent, 2,500 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

तत्वचिन्तामणिदीधितिप्रकाशिका by गदाधर ।

TATVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ by Gadādhara.

Same work as that described under D. No. 4041.

Contains up to the end of anumiti grantha. But wants the beginning.

**Beginning**

तत्रेत्याद्याहेत्यन्तको ग्रन्थः । तत्र प्रतिज्ञायां । सप्तम्यर्थः निरूपणान्वयिविषय . . . . . . . . . . क्षणमितरभेदानुमापकरूपं स्वरूपं लक्षणग्रन्थोपयोगि अनुमितिकरणतावच्छेदकरूपं । तच्च लिङ्ग . . . . . . . . . . . . प्रमाण्यं प्रत्यक्षातिरिक्तप्रमितिकरणत्वम् । आदिपदात् विभाजकरूपपरिग्रहः ।

**End :**

निर्विकल्पकस्येति । अनुमानाधीनसिद्धिकत्वात् तन्मात्राधीनव्यवस्थितिकत्वादित्यर्थः । तन्मते स्वप्रकारकतयानुव्यवसायाभावेन स्वस्य स्वनिष्ठस्वविष . . . . वगाहित्वोपगमे विषयानवस्थाप्रसङ्गेन संभावनायाश्च . . . मात्वेन तद्व्यवस्थापकप्रमाणान्तराभावादिति भावः ।

**Colophon :**

इति गदाधर्यां अनुमितिग्रन्थः संपूर्णः ।

---

(R. Nos. 7379—7382 one bundle.)

Palm-leaf. $14\frac{3}{4}$—$15 \times 1\frac{1}{8}$—$1\frac{1}{4}$ inches. Foll. 98. Lines, 6 to 8 on a page. Grantha. Slightly injured.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7379.

श्रुतिमतानुमानोपपत्तिः ।

ŚRUTIMATĀNUMĀNOPAPATTIḤ.

Foll. 1 (*a*). to 47 (*a*) Extent, 1,000 granthas.

The other works herein are :—Śrutimatānumānopapattiḥ, fol. 48 (*a*). Śrutiratnaprakāśaḥ, fol. 65 (*a*). Mithyātvanirukti, fol. 82 (*a*).

Same work as that described under R. No. 2202 but with slight difference.

Incomplete.

**Beginning :**

सत्यज्ञानानन्दलक्ष्मपरिच्छेदाविवर्जितम् ।
अस्पृष्टानर्थमनिशमाश्रये नृहरेः पदम् ॥

ननु कथमात्मनः परिच्छेदशून्यत्वं तस्य प्रत्यक्षादिसिद्धपारमार्थिकलौकिकवियदादिविलक्षणत्वेन वस्तुतः परिच्छिन्नत्वादिति चेन्न । विमतं मिथ्या दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात् शुक्तिरजतवदित्यादिजीवब्रह्माभेदपरश्रुत्यनुगृहीतबलवदनुमानबाधितविषयेण प्रत्यक्षादिना वियदादेः परमार्थिकत्वासिद्धेः ।

**End :**

आत्मनः ईक्षारूपस्यापि ईक्षितृत्वमुपपादितम् । प्राक् भेदस्य तु प्रधानस्य न कथंचिदीक्षितृत्वम् । तन्निष्ठेत्यस्य तदीयकेवलरूपनिष्ठस्य मोक्षोपदेशादित्यर्थकतया विशिष्टस्यैव जगत्कारणतामतेऽपि न तद्विरोधः शङ्कनीयः । यदपि आत्मशब्दादिति द्वितीयसूत्रस्थहेतोर्विकल्पेन दूषणं तदपि तत्सूत्रव्याख्यानावसरे निरस्यमेव ।

---

R. No. 7380.

श्रुतिमतानुमानोपपत्तिः by त्र्यम्बकभट्टः ।

ŚRUTIMATĀNUMĀNOPAPATTIḤ by Tryambakabhaṭṭa.

Foll. 48 (*a*) to 64 (*b*). Extent, 350 granthas.

Begins on fol. 48 (*a*) of the manuscript described under the previous number.

Same work as that described under D. No. 2202.

Complete.

---

R. No. 7381.

श्रुतिरत्नप्रकाशः ।

ŚRUTIRATNAPRAKĀŚAḤ.

Foll. 65 (*a*)—81 (*b*). Extent, 350 granthas.

Begins on fol. 65 (*a*) of the manuscript described under R. No. 7379.

A treatise on Advaita Vedānta illustrating the reality by the knowledge of which one can obtain the eternal salvation.

Complete.

**Beginning :**

पूर्णानन्दाय निर्भेदपरमानन्दरूपिणे ।
व्यासशङ्कररूपाय श्रीपरब्रह्मणे नमः ।
पूर्णानन्दाय सत्यानामपि सत्याय शम्भवे ।
निर्दोषज्ञानरूपाय नमोऽनन्ताय विष्णवे ॥

तत्वज्ञानस्य निखिलपुरुषार्थसाधनत्वात् । बाध्यत्वं च स्वसंसर्गिनिष्ठ-व्याप्यवृत्त्यत्यन्ताभावप्रतियोगित्वम् ।

**End :**

समाने वृक्षे पुरुषो निमग्न इति पूर्वमन्त्रे देहादिविविक्ततया अनुपलभ्यत्वरूपमग्नताया उक्तत्वेन तदानुगुण्यानुरोधात् परमसाम्यस्याभेद एव । निरञ्जनः परमं साम्यमुपैतीत्यनेन सामञ्जस्ये परमपदवैयर्थ्यात् ब्रह्मभावबोधक-श्रुत्यन्तराविरोधाच्चेति शिवम् ।

**Colophon :**

इति श्रुतिरत्नप्रकाशः ।

The scribe adds—

श्रुतिरत्नप्रकाशोऽयं दक्षिणामूर्तिसंज्ञिना ।
शिष्येण श्रीमहालिंगशास्त्रिणे लिखितो मया ॥
श्रीमद्भ्योऽस्मद्गुरुभ्योऽस्तु नमस्सन्ततिरर्पिता ।
मया विद्यासु बु . . . . द्राग्विशदीकरणाय मे ॥

यं प्रशंसन्ति विद्वांसस्सभासु विदिताखिलम् ।
तं नमस्कुर्महे नित्यं बुद्धिवैशद्यसंपदे ॥

---

R. No. 7382.

मिथ्यात्वनिरुक्तिः ।

MITHYĀTVANIRUKTIH.

Foll. 82 (*a*) to 97 (*b*). Extent, 350 granthas.

Begins on fol. 82 (*a*) of the manuscript described under R. No. 7379.

Similar to the work described under D. No. 17182.

Contains the first Nirukti complete and the second incomplete.

**Beginning :**

वन्दे वन्दारुमन्दारमिन्दिरानन्दमन्दिरम् ।
बृन्दावनपरं भक्तबृन्दावनपरं महः ॥

इह खलु परमपुरुषार्थसाधनमात्मतत्वमामनन्ति न्यायवेदान्तनिष्णाताः। तच्चात्मतत्वं कर्तृभोक्तृत्वादिनिखिलानर्थविरहितसच्चिदानन्दघनप्रत्यगभिन्न-ब्रह्मात्मकमिति तन्निरूपणीयम्। निरूपणं च साधकप्रदर्शनबाधकनिरा-करणाभ्याम्। तत्र साधका ह्यसङ्गो ह्ययं पुरुषः, सत्यं ज्ञानमनन्तं ब्रह्म, सदेव सोम्येदमग्र आसीत्, नेह नानास्ति किञ्चन, नात्र काचन भिदा सती, तत्वमसीत्यादयो निश्चिततात्पर्यका उपनिषद एव।

End :

वस्तुतस्तु स्वाप्ननिषेधस्य जगत्यबाध्यत्वानिश्चयेन न तस्य बाध्यत्वम्। न च स्वप्नदृष्टत्वमात्रेण निषेधस्य बाध्यत्वं युक्तम्। स्वप्नदृष्टस्यात्मादेरपि बाध्यत्वापत्तेः। न चादृष्टं द्रष्टृ इति श्रुत्या स्वप्ने दृष्टत्वमेवात्मनो नास्तीति न बाध्यत्वापत्तिरिति वाच्यम्। अदृष्ट इत्यस्य वृत्तिभिन्नानु-भवविषयत्वस्यैव व्याख्यातत्वात्। अन्त्यवृत्तेरप्यविषयत्वे यथा हि।

---

(R. Nos. 7383 and 7384 one bundle.)

Palm-leaf. 15¼—15½ × 1⅜—1⅝ inches. Foll. 24. Lines, 8—10 on a page. Grantha. Slightly injured.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7383.

मुण्डकोपनिषद्दीपिका।

MUṆḌAKOPANIṢADDĪPIKĀ.

Foll. 1 (*a*) to 20 (*b*). Extent, 500 granthas.

The other work herein is Māṇḍūkyopaniṣaddīpikā, fol. 21 (*a*).

A commentary on Muṇḍakopaniṣat which belongs to Atharvaveda. This commentary is a different one from that of Nārāyaṇa.

Contains the first two muṇḍakas complete and the third muṇḍaka incomplete.

**Beginning :**

मुण्डकं मुण्डमार्गस्थब्रह्मात्मैक्यावबोधकम्।
वक्ष्येऽहं शङ्कराचार्यमार्गेणैव पदे पदे॥

ब्रह्मविद्याया अतिदुर्लभत्वं दर्शयितुमितिहासरूपेण श्रुतिः । प्रथमतो गुरुपरंपरामाह—ब्रह्मा ब्रह्माण्डजः विधाता चतुराननः देवानामग्न्यादीनां मध्ये प्रथमः पूर्वः संबभूव सम्यगहंममाभिमानपुरस्सरं देहग्रहणमकरोत् । ब्रह्मणो विशेषणमाह विश्वस्य कर्ता । विश्वस्योत्पादकः ।

**End :**

इदानीं ब्रह्मचर्यादिसाधनेऽत्यादरं सुकरत्वेन सिद्धमुररीकृत्य सत्य-वचनस्यासुकरत्वेनानादरे प्राप्ते तन्निवारयितुं सत्यं स्तौति । सत्यमेव न त्वनृतं जयति सर्वोत्कर्षेण वर्तते । एवकारार्थं स्वयमाह—नानृतं असत्य-वचनं न, जयतीत्यनुषङ्गः । न केवलमस्मिन्नेवलोके जयति । किंतु अमुष्मिन्नपीत्याह—सत्येनोक्तेन पथा मार्गेण विस्तृतः विधृतः प्राप्य इत्यर्थः । देवयानः अर्चिरादिर्देवैराधिष्ठितः येन देवयानेन मार्गेण आक्रमन्ति सर्वतः क्रमणं ।

---

R. No. 7384.

माण्डूक्योपनिषद्दीपिका ।

MĀṆḌŪKYOPANIṢADDĪPIKĀ.

Foll. 21 to 24. Extent, 100 granthas.

Begins on fol. 21 (*a*) of the manuscript described under the previous number.

Same work as that described under D. No. 707 wherein see for both beginning and end.

Complete.

The additional stanza found in this manuscript—

कथयत शिवकीर्तिं संसृतेर्मुक्तिहेतुं
प्रणमत शिवयोगिध्येयमीशाङ्घ्रिपद्मम् ।
रचयत सितभस्मोद्भासि फाले त्रिपुण्ड्रं
न पुनरिह जनन्या गर्भवासं भजध्वम् ॥

**Colophon :**

इति माण्डूक्योपनिषद्दीपिका समाप्ता ।

R. No. 7385.

Palm-leaf. 17¼—18⅛ × 1½ inches. Foll. 20. Lines, 7 and 8 on a page. Grantha. Slightly injured. Extent, 500 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

तत्वचिन्तामणिः by गङ्गेशोपाध्याय ।

TATTVACINTĀMAṆIḤ by Gaṅgeśopādhyāya.

Same work as that described under D. No. 3981.

**Beginning :**

अथ शब्दो निरूप्यते । प्रयोगहेतुभूतार्थतत्वज्ञानजन्यः शब्दः प्रमाणम् । ननु शब्दो न प्रमाणम् । तथा हि—करणविशेषः प्रमाणम् । करणं च तत् यस्मिन् सति क्रिया भवत्येव । न च शब्दे सति प्रमा भवत्येवेति नायं शब्दः प्रमाणम् । न च शब्दो न प्रमाणमिति वाक्यस्य प्रामाण्याप्रामाण्ययोर्व्याघातः । अस्याप्रामाण्येऽप्येतदुपस्थाप्यानुमानाविसंवादादिति चेन्न । आकाङ्क्षादिमतः पदार्थस्मरणादिव्यापारवतः प्रमाणत्वात् ।

**End :**

ननु वेदो न पौरुषेयः अस्मर्यमाणकर्तृकत्वादिति बाधकमस्त्विति चेन्न कपिलकणादगौतमैस्तच्छिष्यैश्चाद्यपर्यन्तं वेदस्य सकर्तृकत्वस्मरणस्य प्रतीयमानत्वात् । न (च) मूलभूतानुभवाभावात् स्मरणानुपपत्तिः । पौरुषेयत्वानुमानादे(रे)वानुभवा(त्वा)त् । अस्मरणमेव तत्र बाधकमिति चेन्न एवं सत्यस्मरणाननुभवयोरन्योन्याश्रयात् । अग्र तदर्थस्मरणाभावेऽपि प्रमाणस्यानुभावकत्वात् । न हि भाविस्मरणमपेक्ष्य प्रमाणमनुभावकम् । तस्मात्तपस्तेपानाच्चत्वारो वेदा अजायन्त । ऋचस्सामानि जज्ञिरे इति कर्तृश्रवणाच्च ।

---

R. No. 7386.

Palm-leaf. 17⅜—17⅝ × 1¼—1⅜ inches. Foll. 53. Lines, 7 to 9 on a page. Grantha. Injured. Extent, 2,000 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

तत्वचिन्तामणिव्याख्या फक्किका by मथुरानाथ ।

TATTVACINTĀMAṆIVYĀKHYĀ-PHAKKIKĀ by Mathurānātha.

Same work as that described under D. No. 4027.

Contains from the yogyatāvāda to the pūrvapakṣa of the Vidhivāda complete and the siddhānta of the Vidhivāda incomplete.

**Beginning :**

ननु का योग्यता । न तावत् सजातीयेऽन्वयदर्शनम् । यथाकथञ्चित् साजात्यस्याव्यावर्तकत्वात् । पदार्थतावच्छेदकेन साजात्यस्याद्य जातः पयः पिबतीत्यादौ अभावात् । वाक्यार्थस्यापूर्वत्वाच्च । नापि समभिव्याहृतपदसंसर्गव्याप्यधर्मवत्वम् । वाक्यार्थस्यानुमेयतापत्तेः ।

* * * * *

व्या—आकाङ्क्षां निरूप्य योग्यतां निरूपयितुं पृच्छति—नन्विति । आकाङ्क्षादिकं सहकारीति यदुक्तं तत्र आदिपदग्राह्या योग्यता केत्यर्थः । अत्र शाब्दबोधलक्षणैककार्यानुकूलत्वमेव सङ्गतिरिति . . . . . . । सजातीयेति । तत्सजातीये तत्सजातीयस्यान्वयदर्शनं संसर्गनिश्चयः तत्र तत् शाब्दबुद्धौ योग्यतेत्यर्थः ।

**End :**

अत एव भ्रमत्वप्रकारकइच्छाविरहादेवेत्यर्थः । नियमत इति शेषः । अन्येच्छा अन्यप्रकारकेच्छा । स्वचिकीर्षाधीनत्वं त्विति । स्वप्रकारकचिकीर्षाधीनत्वमित्यर्थः । गौरवादिति । चिकीर्षात्वस्य कृतिसाध्यत्वप्रकारकेच्छात्वरूपस्य कारणतावच्छेदककोशप्रवेशे गौरवादित्यर्थः ।

---

(R. Nos. 7387—7389 one bundle.)

Palm-leaf. 18 × 1⅜—1½ inches. Foll. 47. Lines, 7 and 8 on a page. Grantha. Slightly injured.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7387.

मोक्षकारणतावादः ।

MOKṢAKĀRAṆATĀVĀDAḤ.

Foll. 1 to 12 (*a*). Extent, 300 granthas.

The other works herein are :—Pratijñāvādārtha, fol. 12 (*a*). Jñānayāthārthyavāda, fol. 25 (*a*).

Same work as that described under D. No. 4983 wherein see for both beginning and end.

Complete.

R. No. 7388.

प्रतिज्ञावादार्थः by अनन्ताचार्य ।

PRATIJÑĀVĀDĀRTHAḤ by Anantācārya.

Foll. 12 (*a*) to 25 (*a*) . Extent, 375 granthas.

Begins on fol. 12 (*a*) of the manuscript described under the previous number.

Same work as that described under D. No. 4934, wherein see for both beginning and end.

Complete.

---

R. No. 7389.

ज्ञानयाथार्थ्यवादः ।

JÑĀNAYĀTHĀRTHYAVĀDAH.

Foll. 25 (*a*) to 47 (*a*). Extent, 500 granthas.

Begins on fol. 25 (*a*) of the manuscript described under R. No. 7387.

Same work as that described under D. No. 4884, wherein see for beginning and end.

Complete.

---

(R. Nos. 7390 and 7391 one bundle.)

Palm leaf. $15\frac{3}{4}$—$16\frac{1}{4} \times 1\frac{1}{8} \times 1\frac{1}{4}$ inches. Foll. 76. Lines, 5 to 8 on a page. Grantha. Injured.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7390.

द्राह्यायणश्रौतसूत्रम् ।

DRĀHYĀYAṆAŚRAUTASŪTRAM.

Foll. 1 (*a*) to 55 (*b*). Extent, 1,700 granthas.

The other work herein is Narapatijayacaryā.

Same work as that described under D. No. 1037.

Contains five paṭalas.

**Beginning :**

वक्ष्यमाणो ब्राह्मणानार्षेयानृत्विजो वृणीते । यूनः स्थविरान् वानूध्र्व-वाचोनङ्गमहीनास्तेभ्यस्सोमं प्राहृतं प्रयच्छति । के ऋत्विजः । के या . . . . . . . . . . . . यन्ति । कश्चिन्नाहीनः कश्चिन्नन्यस्तमृत्विजं कश्चित कल्याण्यो दक्षिणा इति छन्दोगब्राह्मणं भवति ।

**End :**

आग्नेयं पञ्चकपालमुद्वसानीयं निर्वपत्यष्टाकपालं वा यदि पञ्च-कपालो गायत्र्यौ संयाज्ये । यद्यष्टाकपालः पङ्क्त्या · · · · नड्वान् दक्षिणानड्‌दुहं वा हिरण्यं सिद्धमिष्टः सन्तिष्ठते । वैष्णवीं पूर्णाहुति-मुद्वसानीयायाः स्थाने वाजसनेयेन समामनन्ति । द्वादशगृहीतेन स्रुचं पूरयित्वा अन्तर्वेद्यूर्ध्वस्तिष्ठन् जुहोति । सा यावद्रात्रेष्टि सन्तिष्ठते । अथ सामग्निहोत्रं जुहोति । काले प्रातर्होमं सन्तिष्ठतेऽग्निष्टोमोऽग्निष्टोमः ।

जैमिनेर्विमलसूक्तिषु मग्नं शुद्धिमाप विमलं मम चेतः ।
प्रीतिमेतु नृहरेः पदपद्मे येन जन्मनिवहो न पुनःस्यात् ॥

---

R. No. 7391.

नरपतिजयचर्या ।

NARAPATIJAYACARYĀ.

Foll. 56 (*a*) to 76 (*b*). Extent, 500 granthas.

Begins on fol. 56 (*a*) of the manuscript described under the previous number.

Same work as that described under D. No. 40 of M. Seshagiri Sastry's report. For the beginning and extracts vide pages 87, 88 and 244—246 of the 2nd volume of the abovesaid report.

Incomplete.

**End :**

उत्तरग्रहसमायोगे छत्रभङ्गं विनिर्दिशेत् । अन्येष्ट · · · · · . नक्षत्रं यत्र छत्रे स्थितं तत्र छत्रे एव · · · · · राज्ञां मरणं विनिर्दि-शेत् । यथा दुष्टफलस्सौ · · · · · स्तथा सौम्यफलो गुरुः । यथा शनैश्चरश्चामराधिसहितस्सन् अशुभं करोति । तथा चामराधिस्थितो ।

---

R. No. 7392.

Palm leaf. 18¼ × 1¾ inches. Foll. 125. Lines, 9 to 12 on a page. Grantha. Much injured. Extent, 6,250 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

शास्त्रदीपिका by पार्थसारथिमिश्र ।

SĀSTRADĪPIKĀ by Pārthsārathimiśra.

Same work as that described under D. No. 4478.

Contains adhyāyas 1—5 complete and 6th incomplete.

## R. No. 7393.

**Palm-leaf. 15¾—15⅞ × 1—1¼ inches. Foll. 144. Lines, 5 to 8 on a page. Grantha. Slightly injured. Extent, 3,250 granthas.**

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

ब्रह्मसूत्रभाष्यम् by शङ्करभगवत्पाद ।

BRAHMASŪTRABHĀṢYAM by Śaṅkara Bhagavatpāda.

Same work as that described under D. No. 4659 wherein see for the beginning.

Contains the first adhyāya complete.

**End :**

तेऽपि तु ब्रह्मकारणवादस्य पक्षस्य प्रतिपक्षत्वात् प्रतिषेद्धव्याः । तेषामप्युपोद्बलकं वैदिकं किञ्चिल्लिङ्गमापातेन मन्दमतीन् प्रतिभायात् । इत्यतः प्रधानमल्लनिबर्हणन्यायेनातिदिशति । एतेन प्रधानकारणवादप्रतिषेधन्यायकलापेन सर्वे ह्यण्वादिकारणवादा अपि प्रतिषिद्धतया व्याख्याता वेदितव्याः । तेषामपि प्रधानवदशब्दत्वात् शब्दविरोधित्वाच्चेति । व्याख्याता व्याख्याता इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति ।

**Colophon :**

इति शारीरकमीमांसाभाष्ये गोविन्दभगवत्पादज्य(पादशिष्य)शङ्करभगवत्पादकृतौ प्रथमाध्यायस्य चतुर्थः पादः ।

प्रथमाध्यायः समाप्तः ।

---

## R. No. 7394.

**Palm leaf. 16—16¼ × 1½—1⅝ inches. Foll. 53. Lines, 10 to 13 on a page. Grantha. Injured. Extent, 3,000 granthas.**

Purhased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

भाट्टदीपिका by खण्डदेव ।

BHĀṬṬADĪPIKĀ by Khaṇḍadeva.

Same work as that described under D. No. 4423.

Contains the first adhyāya incomplete and the third adhyāya complete.

**Beginning :**

विश्वेश्वरं गुरुं नत्वा खण्डदेवः सतां मुदे ।
तनुते तत्प्रसादेन संक्षिप्तां भाट्टदीपिकाम् ॥

आम्नायस्य वायुर्वै क्षेपिष्ठा देवता । वायुमेव स्वेन भागधेयेनोपधावति । एवमेवैनं · · · · गमयतीत्याद्यर्थवादानां विधिप्रतिषेधवदेव कर्तृस्मरणाभावात् ।

**End :**

पुरोडाशपदं तु एक · · · · न्धि हविः पर इति तस्य सवनीययागलक्षकत्वं सुकरमेव । तदेवं श्रुत्यादिषट्प्रमाणक्रमङ्गत्वं निरूपितम् । अतः प्रयोज्यत्वं निरूपयिष्यते ।

**Colophon :**

इति रुद्र · · · · · पिकाया तृतीयस्याध्यायस्यान्तिमः पादः ।
। अध्यायः समाप्तः ।

---

R. No. 7395.

Palm-leaf. 14¾—14⅞ × 1⅛—1⅜ inches. Foll. 174. Lines, 6 to 8 on a page. Grantha. Injured. Extent, 4,500 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

वृहज्जातकविवृतिः—जगच्चन्द्रिका by भट्टोत्पल ।

BRAHJJĀTAKAVIVṚTIḤ—JAGACCANDRIKĀ by Bhaṭṭotpala.

Same work as that described under R. No. 407, wherein see for the beginning.

Contains the first twenty-two adhayāyas complete and the twenty-third adhyāya incomplete.

**End :**

तद्यथा । गुरुः जीवः तदीयद्रेक्काणो यदि भवति तथा विबुधलोकादागत इति वक्तव्यम् । उडुपश्चन्द्रः । शुक्रः प्रसिद्धः । चन्द्रशुक्रयोरन्यतरसंवन्धिद्रेक्काणश्चेत्तदा पितृलोकादागत इति वक्तव्यम् । सूर्यभौमयो स्संवन्धि यदि भवति तदा तर · · · · · श्चेदागत इति वक्तव्यम । यम. सौराज्ञो बुधः । तयोरन्यतरसंवन्धिद्रेक्काणश्चेत् तदा नरकलोकादागत इति वक्तव्यम् । यस्माल्लोकादागतस्तत्रापि श्रेष्ठमध्यमहीनत्रय ।

R. No. 7396.

**Palm leaf. 15—15⅝ × 1⅛—1⅜ inches. Fol. 94. Lines, 6 to 9 on a page. Grantha. Much injured. Extent, 3,000 granthas.**

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

तत्वचिन्तामणिदीधितिव्याख्या by भवानन्दवागीश ।

TATVACINTĀMAṆIDĪDHITIVYĀKHYĀ by Bhavānandavāgīśa.

Same work as that described under D. No. 4092, wherein see for the beginning.

Contains the Anumānakhaṇḍa incomplete. Breaks off in the course of Avacchedakatānirukti.

**End :**

ननु पर्याप्तिः समवाय एव । स च प्रत्येकवह्नावपीति अत आह— पर्याप्तिश्चेति । एको घट इति । एकमात्रवृत्तिधर्मावच्छेदेन घटत्वस्य पर्याप्तिं दर्शयि . . . . . द्वावपीति उभयवृत्तिधर्मावच्छेदेनैव द्वित्वस्य पर्याप्तिरिति दर्शयितुम् । ननु प्रत्येकवृत्तित्वव्यासज्यवृत्तित्वाभ्यामेव समानता । तथा च वह्निधूमोभयवान् धूमादित्यादावव्याप्तिः । तदुभयत्वस्य स्वसमानप . . . . . . कवह्निधूमाकाशत्वानतिरिक्तवृत्तित्वादत आह— . . . तृत्वादिमपीति । ननु द्वौ स्त इति प्रतीतौ प्रतियोगितावच्छेदकतयापि (पर्या)प्त्यामेव संबन्धो भासते न समवायः । तथा सति प्रत्येकं . . . . . . . त्वेऽपि प्रति . . . . तावच्छेदकावच्छिन्नप्रतियोगिसत्वात् ।

---

(R. Nos. 7397—7399 one bundle.)

**Palm leaf. 14¾—15⅝ × 1⅜—1½ inches. Foll. 67. Lines, 6 to 11 on a page. Grantha. Slightly injured.**

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7397.

कविदर्पणः ।

KAVIDARPAṆAḤ.

Foll. 1 to 22 (*b*). Extent, 400 granthas.

The other works herein are :—Dvirūpakośaḥ, fol. 23 (*a*). Nāmaliṅgānuśāsana vyākhyā—Ṭīkāsarvasvam, fol. 34 (*a*).

This is a lexicon by one Rāma.

Breaks off in the course of त् (t) ending.

Beginning :

कल्याणैकनिवासाय जानकीजानये नमः ।
आसीदनुचरो यस्य शब्दब्रह्ममयोऽनुजः ॥

प्रायः सन्दर्भयोग्यानि पदान्याहृत्य कोशतः ।
ततस्ततः समालोक्य क्रियते कविदर्पणः ॥

कोशान्तरेषु दृष्टानि संगृहीतानि कोशतः ।
उचितानि पदान्यत्र पश्यन्तु कविपुङ्गवाः ॥

नानार्थास्तत्र चिन्त्यन्तां शब्दलिङ्गार्थरूपतः ।
प्रायो विशेष्यनिघ्नानां भेदं संप्रतिपद्यताम् ॥

विस्मृतश्लोकसन्दर्भव्याजाच्चेल्लिङ्गनिर्णयः ।
ऊह्यतां कस्य वा न स्यात् व्यासङ्गेन तु विस्मृतिः ॥

End :

क्षत्ता स्यात् सारथौ द्वास्थे क्षत्रियेे शूद्रजेऽपि च ।
आर्तिः पीडा धनुष्कोट्योरा . . . . न्धलाभयोः ॥

ईतिः प्रवसनेऽपि स्यात् अतिवृष्ट्याद्युपद्रवे ।
ऊतिस्तु रक्षणे स्यूतौ कान्तिः शोभा वरेण्यपि ॥

कान्ता प्रियङ्गौ रूपिसामङ्गनायाश्च कथ्यते (?) ।
कीर्तिः प्रसादयशसोः विस्तारे कर्दमेऽपि च ॥

---

R. No. 7398.

द्विरूपकोशः ।

DVIRŪPAKOŚAḤ.

Foll. 23 (*a*) to 33 (*c*). Extent, 200 granthas.

Begins on fol. 23 (*a*) of the manuscript described under the previous number.

Same work as that described under D. No. 1607, wherein see for the beginning.

Incomplete.

शितद्रुश्च शतद्रुश्च शुतुद्रुश्च निगद्यते ।
चिलीचिमः चिचिलिमः तथा चिलिचिमोऽपि च ॥

भवेन्नाला च नालश्च नालं च परिकीर्तितम् ।
प्लवगश्च प्लवङ्गश्च प्लवङ्गम इति त्रयः ॥

तुरगभुजगविहङ्गादयः ।

---

R. No. 7399.

नामलिङ्गानुशासनव्याख्या—टीकासर्वस्वम् by सर्वानन्द ।
NĀMALIṄGĀNUŚĀSANAVYĀKHYĀ—ṬĪKĀSARVASVAM by Sarvānanda.

Foll. 34 (*a*) to 67 (*b*). Extent, 1,500 granthas.

Begins on fol. 34 (*a*) of the manuscript described under R. No. 7397.

Same work as that described under the D. No. 1689 and the No. 11 of the Vol. II of the Seshagirisastry's report.

Breaks off in the course of Niṣādavarga.

**End :**

कृपेः संप्रसारणं च । भिदाद्यंक्षणिकत्वात् कृपेरकृपो रोल इति न लत्वमिति वृत्तिः । दय . . . . . . . नेभिदव्य दया अनुकम्पेति गुरोश्च हल इत्यः । क्रुशेः घञ् । अनुक्रोशः । हसत्रयं हास्ये हसहासयोः । स्वनहसोर्वे . . . . . . . । ऋहलोर्ण्यत् हास्यम् । बीभत्सद्वयं बीभत्से ।

---

R. No. 7400.

Palm leaf. 17¾—18¼ × 1⅜—1½ inches. Foll. 80. Lines, 8 to 12 on a page. Grantha. Injured. Extent, 4,000 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

तत्वचिन्तामणिदीधितिप्रकाशिका ।
TATVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

Same work as that described under D. No. 4041.

Contains the Kevalānvayiprakaraṇa.

Foll. 74 to 80 contain a duplicate copy of the same.

**Beginning :**

पक्षतां निरूप्य विशिष्टपरामर्शत्वेनानुमितिहेतुताजानद्वयकारणतावादिमीमांसकविप्रतिपत्तिं निरस्य मणिकारेण व्यवस्थापिता । तत्र सङ्गतिं दर्शयति । लक्षणोपोद्धातेनेति । विशिष्टपरामर्शत्वावच्छिन्नकारणताघटितानुमितिलक्षणोपपादकतयेत्यर्थः ।

**End :**

आकाशाभावादेरात्मादौ आकाशाभावत्वादिनैव दैशिकविशेषणतयावृत्तिः । न तु कालिकसंबन्धावच्छिन्नस्वाभावाभाववत्वेन काल एवाकाशाभावस्य कालिकसंबन्धावच्छिन्नाभावो नास्तीति प्रत्ययात् कालिकसंबन्धावच्छिन्नस्वाभावस्याभावरूप आकाशाभाव आत्मनीत्याधाराधेयभावप्रत्यये तादृशाभावत्वस्योपलक्षणतयैव भानोपगमादित्याकाशाभावादेः कालिकसंबन्धावच्छिन्नाभावे साध्ये आत्मत्वादिहेतौ नाव्याप्तिरिति तत्तद्विशिष्टहेतुकस्थले स्वाधिकरणेत्यादिव्याप्तिरेव निर्वहतीत्याहुः ।

---

R. No. 7401.

Palm leaf. 15—15½ × 1½ inches. Foll. 11. Lines, 8—9 on a page. Grantha. Slightly injured. Extent, 350 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

दक्षिणामूर्तिस्तोत्रम्—तत्वसुधासहितम् ।

DAKṢIṆĀMŪRTISTOTRAM with Tatvasudhā.

Same work as that described under R. No. 220 (*d*), wherein neither the beginning nor the end has been given.

Complete.

**Beginning :**

दक्षिणामूर्तिव्याख्यानं लिख्यते ।

श्लो.—मौनव्याख्याप्रकटितपरब्रह्मतत्वं युवानम्
वर्षिष्ठान्तेवसदृषिगणैरावृतं ब्रह्मनिष्ठैः ।
आचार्येन्द्रं करकलितचिन्मुद्रमानन्दमूर्तिम्
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥

कैवल्यानन्दयोगीन्द्रशुद्धानन्दयतीश्वरौ ।
नत्वारभे लघुव्याख्यां दक्षिणाशामुखस्तुतेः ॥

इह खलु सर्वज्ञो भगवान् भाष्यकारो लोकानुग्रहैकप्रयोजनकृत-शरीरपरिग्रहः सन् सकलवेदान्तदुग्धोदधौ न्यायमन्दरेण विचारनिर्मन्थनादाविर्भूताद्वैतामृतस्य विन्यासकलशभूतं दक्षिणामूर्तिस्तोत्रं ।

**End :**

पुनः भूयः । अष्टधा अष्टप्रकारेण परिणतं मायापरिणामरूपमैश्वर्यं चाणिमादि सकलविद्वज्जनप्रसिद्धम् । अव्याहतं किञ्चिदप्यप्रतिहतं सिध्येत् । स एकधा भवति त्रिधा भवति । स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्तीत्यादिश्रुत्युक्तं सर्वं भवेदित्यर्थः ।

एवमेषा कृता व्याख्या दक्षिणाशामुखस्तुतेः ।
यथामति तया तुष्टो दक्षिणामूर्तिरस्तु नः ।

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकैवल्यानन्दयोगीन्द्रपादकमल-भृङ्गायमाणस्वयंप्रकाशयतिना विरचिता दक्षिणामूर्तिस्तोत्रव्याख्या तत्वसुधा संपूर्णा ।

---

(R. Nos. 7402 to 7413 one bundle.)

**Palm leaf.** 13—13⅛ × 1—1¼ inches. Foll. 70. Lines, 5—7 on a page, Grantha Slightly injured.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate Triplicane, Madras.

R. No. 7402.

महान्यासः ।

MAHĀNYĀSAḤ.

Foll. 1 (*a*) to 11 (*b*). Extent, 225 granthas.

The other works herein are :—Tāntrikasandhyāvidhi, fol. 12 (*a*). Kāmeśvarīmantraḥ, fol. 15 (*a*). Śivapūjāvidhiḥ, fol. 18 (*a*). Viṣṇupūjāvidhiḥ, fol. 27 (*a*). Campakanyāsaḥ, fol. 32 (*a*). Bṛhaspatismṛtiḥ, fol. 41 (*a*). Naṭeśastutiḥ, fol. 57 (*a*). Kalānāmāni, fol. 59 (*a*). Subrahmaṇyāṣṭottaraśatanāmastotram, fol. 60 (*a*). Rāmabāṇastavaḥ, fol. 62 (*a*). Gāyatrīśāpavimocanamantraḥ, fol. 67 (*a*).

Same work as that described under R. No. 3751.

Complete.

R. No. 7403.

तान्त्रिकसन्ध्याविधिः ।

TĀNTRIKASANDHYĀVIDHIḤ.

Foll. 12 to 14. Extent, 60 granthas.

Begins on fol. 12 (*a*) of the manuscript described under R. No. 7402.

Similar to the work described under D. No. 5639.

Complete.

**Beginning :**

परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे ।
विवेकिनां विवेकाय विमर्शाय विमार्शिनाम् ॥
प्रकाशिनां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ।
पुरस्तात् पार्श्वयोः पृष्ठे नमस्कुर्यादुपर्यधः ॥
सदा मच्चित्तरूपेण विधेहि भवदासनम् ।
इत्येवं पञ्चभिःश्लोकैः स्तुवीत यतमानसः ॥
प्रातः प्रबोधसमये जपात् सुदिवसं भवेत् ।

अथ तच्चरणकमलयुगलविगलदमृतपरिप्लुताङ्गं भावयन्नात्मानं शिवादि-श्रीगुरुभ्यो नम इति मूर्ध्नि बद्धाञ्जलिः त्रिः प्राणानायच्छेत् ।

**End :**

वामपादाग्रपर्यन्तं हृदयात् प्रभृतिस्थलात् ।
हृदयात् गुह्यपर्यन्तं हृदयाच्छीर्षकान्तकम् ॥
शिरो मूलाधारे हृदयकमले नेत्रयुगले
भ्रुवोर्मध्ये कर्णे मुखकमलकेंऽसयुगले । ?
पृष्ठभागे जानुदेशे नाभिदेशे च कीर्तितः ॥

**Colophon :**

इति कादिविद्यावर्णन्यासः ।

---

R. No. 7404.

कामेश्वरीमन्त्रः ।

KĀMESVARĪMANTAḤ

Foll. 15 (*a*) to 17 (*a*). Extent, 40 granthas.

Begins on fol. 15 (*a*) of the manuscript described under R. No. 7402.

Similar to the work described under D. No. 6054.

Complete.

**Beginning :**

अस्य श्री शुद्धशक्तिमहामालामन्त्रस्य । उपस्थेन्द्रियाधिष्ठायिने वरुणादित्याय ऋषये नमः । गायत्रीछन्दसे नमः । सात्विकाकारभट्टारिकपीठस्थितकामेश्वरीवाङ्कनिलयायै । कामेश्वरीललितामहाभट्टारिकायै देवतायै ।

**End :**

परापररहस्ययोगिनि त्रिपुरे त्रिपुरेशि त्रिपुरसुन्दरि त्रिपुरवासिनि त्रिपुरमालिनि त्रिपुरसिद्धे त्रिपुराम्ब महात्रिपुरसुन्दरि महामहेश्वरि महामहाराज्ञि महामहाशक्ते महामहागुप्ते महामहाज्ञप्ते महामहानन्दे महामहास्कंदे महामहाशये महाश्रीचक्रनगरसंराज्ञि नमस्ते । त्रिः स्वाहा श्रीं ह्रां ऐं ओम् । महाराज्ञ्यै नमः ।

---

R. No. 7405.

शिवपूजाविधिः ।

ŚIVAPŪJĀVIDHIḤ.

Foll. 18 (*a*) to 26 (*b*). Extent, 160 granthas.

Begins on fol. 18 (*a*) of the manuscript described under R. No. 7402. Similar to the work described under D. No. 5510.

Complete.

**Beginning :**

अथातो रुद्रस्नानार्चनाभिषेकविधिं व्याख्यास्यामः । स्नात्वा शुचिः प्रयतो ब्रह्मचारी शुक्लवासाः कृतनित्यक्रियः पूजागृहं प्रविश्य भूशुद्धिं कुर्यात् ।

अपसर्पन्तु ये भूता ये [भूता] भुवि संस्थिताः ।
ये भूता विघ्नकर्तारः ते गच्छन्तु शिवाज्ञया ॥

**End :**

इति पूजां समाप्य देवस्य शिरसि स्थितमेकं पुष्पं गृहीत्वा नासारन्ध्रेण देवमात्मनं प्रविष्टं ध्यायेत् ।

हृत्पद्मकर्णिकामध्ये ह्युमया सह शङ्कर ।
प्रविश त्वं महादेव सर्वैरावरणैः सह ॥

अनेन पूजनेन श्रीमहादेवः प्रीयताम् ।

अकालमृत्युहरणं सर्वव्याधिनिवारणम् ।
समस्तपापक्षयकरं श्रीसाम्बशिवपादोदकं शुभम् ॥

इति तीर्थं प्राश्याचामेत् ।

**Colophon :**

। इति श्रीबोधायनसूत्रोक्तलघुन्यासपूर्वकशिवपूजाविधिः संपूर्णः ।

R. No. 7406.

विष्णुपूजाविधिः ।

VIṢṆUPŪJĀVIDHIḤ.

Foll. 27 (*a*) to 30 (*b*). Extent, 40 granthas.

Begins on fol. 27 (*a*) of the manuscript described under R. No. 7402.

Similar to the work described under D. No. 8696.

Complete.

**Beginning :**

भरद्वाजः—

शृणुध्वं मुनयः सर्वे विष्णोराराधनं परम् ।
वैदिकानामनुष्ठेयं पुंसूक्तविधिनान्वहम् ॥
स्नात्वाचम्य विधानेन कृत्वा माध्याह्निकीं क्रियाम् ।
वस्त्रनिष्पीडनं कृत्वा गच्छेदात्मनिवेशनम् ॥

* * * * * *

विष्णोराराधनं शक्त्या तद्भक्त्यर्थं करोम्यहम् ।
इति संकल्प्य विधिवत् मूलमन्त्रं जपेत् सुधीः ॥

**End :**

नाभ्या आसीच्च ताम्बूलं वेदाहश्च प्रदक्षिणम् ।
धाता चैव नमस्कारं यज्ञेनोद्वासनं क्रमात् ॥
एवं पुरुषसूक्तेन पूजनं यस्समाचरेत् ।
सर्वपापविशुद्धात्मा स याति हरिमन्दिरम् ॥

**Colophon :**

भरद्वाजोक्तविष्णुपूजाविधानं समाप्तम् ।

Fol. 31 (*a*) contains Puruṣasūktamantras.

---

R. No. 7407.

चम्पकन्यासः ।

CAMPAKANYĀSAḤ.

Foll. 32 (*a*) to 40 (*a*). Extent, 100 granthas.

Begins on fol. 32 (*a*) of the manuscript described under R. No. 7402.

On the ceremonial touching of certain parts of the body while uttering the syllables of Gāyatrī.

Complete.

**Beginning :**

ऋषिश्छन्दो देवता च बीजं शक्तिश्च कीलकम् ।
तत्वं वर्णं स्वरं मुद्रा स्थानं फलमिति क्रमात् ॥

एताश्च द्वादशावस्था जपकाले विचिन्तयेत् ।
अवस्थाद्वादशभिर्हीनो जपो निष्फलतामियात् ॥

तत्कारस्य केशवनामधेयम् । प्रह्लाद ऋषिः । गायत्री छन्दः । अग्निर्देवता । आं बीजम् ।

**End :**

महापातकसङ्घाश्च ज्ञानाज्ञानकृतास्तथा ।
नश्यन्ति चम्पकन्यासात् किं पुनश्चोपपातकम् ।
सकृद्वा चम्पकन्यासं यः करोति स बुद्धिमान् ।
स एव साक्षात् भगवान् ब्रह्मा विष्णुस्त्रिलोचनः ।
परं ब्रह्मपदं विप्रं वदन्ति ब्रह्मवादिनः ।
परमात्मेति तं प्राहुः ब्रह्मविष्ण्वादयस्तथा ।
एवं न्यासं प्रकुर्वाणो यत्र देशे स तिष्ठति ।
तत्क्षेत्रं परमं ब्रह्मस्थलं योजनमायतम् ।

**Colophon :**

चम्पकन्यासः संपूर्णः ।

---

R. No. 7408.

बृहस्पतिस्मृतिः ।

BṚHASPATISMṚTIḤ.

Foll. 41 (*a*) to 56 (*b*). Extent, 350 granthas.

Begins on fol. 41 (*a*) of the manuscript described under R. No. 7402.

Same work as that described under D. No. 2658 wherein see for the beginning.

Contains 2 adhyāyas complete.

**End :**

प्रक्षाल्य पाणिपादौ च द्विराचम्य विशुध्यति ।
पुनस्तुत्वा जगन्नाथं माधवं गरुडध्वजम् ।
तस्मिन् मनस्समाधाय स्वपेन्नियतमानसः ।
इत्येवं देवदेवेश तव प्रोक्तं मयाधुना ॥

धर्मशास्त्रमिदं पुण्यमधीत्य द्विजसत्तमः ।
स याति परमं स्थानं पुनरावृत्तिवार्जितम् ॥

Colophon :

इति बृहस्पतिस्मृतौ द्वितीयोऽध्यायः ।

---

R. No. 7409.

नटेशस्तुतिः ।

NAṬEŚASTUTIḤ.

Foll. 57 (*a*) to 58 (*b*). Extent, 25 granthas.

Begins on fol. 57 (*a*) of the manuscript described under R. No. 7402.

Eight stanzas in praise of the Lord Nateśa, situated at Cidambaram.

Complete.

**Beginning :**

सदञ्चितमुदञ्चितनिकुञ्चितपदं झलझलं झलितमञ्जुकटकं
पतञ्जलिदृगञ्जनमनञ्जनमचञ्चलपदं जननभञ्जनकरम् ।
कदम्बरुचिमंबरवसं परममम्बुदकदम्बकविडम्बकगलं
चिदम्बुधिमणिं बुधहृदम्बुजरविं वरचिदम्बरनटं हृदि भजे ॥

**End :**

परं सुरवरं गजहरं पशुपतिं जनितदन्तिमुखषण्मुखममुं
विभुं कनकपिङ्गल · · · · सुमनं हिमरुचिं हसित-
कुङ्कुमरुचिम् ।
असङ्गमनसं गलकलङ्कमतुलं करटिचर्मवसनं गुणनिधिं
सनन्दवरदं शमदमिन्दुवदनं वरचिदम्बरनटं हृदि भजे
॥ ८ ॥

---

R. No. 7410.

कलानामानि ।

KALĀNĀMĀNI.

Fol. 59 (*a*) and (*b*). Extent, 10 granthas.

Begins on fol. 59 (*a*) of the manuscript described under R. No. 7402.

This work gives the names of the Kalās, attributed to the different dieties.

Incomplete.

**Beginning :**

सृष्टिः ऋद्धिस्स्मृतिर्मेधा कान्तिर्लक्ष्मीश्च द्युतिका ।
स्थिरा स्थितिश्च सिद्धिश्च इत्येता ब्रह्मणः कलाः ॥
जरा च पालिनी चैव शान्तिश्चैवेश्वरी गतिः ।
कामिका वरदा चैव ह्लादिनी प्रीतिर्दीर्घिके ॥

**End :**

आप्यायिनी व्यापिनी च व्योमरूपा प्रकीर्तिता ।
सदाशिवस्यैव कला कलाविद्भिः सुशोभनाः ॥

---

R. No. 7411.

सुब्रह्मण्याष्टोत्तरशतनामस्तोत्रम् ।
SUBRAHMAṆYĀṢṬOTTARAŚATANĀMASTOTRAM.

Foll. 60 and 61. Extent, 15 granthas.

Begins on fol. 60 (*a*) of the manuscript described under R. No. 7402.

Same work as that described under D. No. 9336 with a difference of the last stanza.

**End :**

सुब्रह्मण्यो गुहः प्रीतो ब्रह्मण्यो लोकरक्षकः ।
इति श्रीकार्तिकेयस्य नाम्नामष्टोत्तरं शतम् ॥
यः पठेत् शृणुयाद्वापि सर्वपापैः प्रमुच्यते ॥

---

R. No. 7412.

रामबाणस्तवः by रामभद्रदीक्षित व्याख्यासहितः ।
RĀMABĀṆASTAVAḤ by RĀMABHADRADĪKṢITA with commentary.

Foll. 62 (*a*) to 66 (*b*). Extent, 50 granthas.

Begins on fol. 62 (*a*) of the manuscript described under R. No. 7402.

In praise of Rāmabāṇa.

This manuscript contains also a commentary on it. Both the text and commentary have been printed in Kavyamala series. But last stanzas in this manuscript are not found in the printed edition.

Contains only a small portion.

**Beginning :**

तं वन्दे रामबाणं रजनिचरचमूरस्त्रां पुरीं यत्प्रभाभिः
सा लङ्कारामवाटीकत, मदविधुरा बन्धुरागा विनेत्रा ।
वर्षित्रा येन चाथ ज्वलनमजनि न प्रापिता दौरवस्थ्यं
सालङ्कारामवाटी कतमदविधुरा बन्धुरागा विनेत्रा ॥

व्या—सालङ्काराम्, अवाटीकत, मदविधुरा, बन्धुरागा, विनेत्रा इति पदच्छेदः प्रथमार्धे । सा, लङ्कारामवाटी, कतमत्, अविधुरा, बन्धुरागा, विनेत्रा, इति द्वितीयार्धे पदच्छेदः । अर्थस्तु यत्प्रभाभिः यस्य बाणस्य तेजसा हेतुना ।

**End :**

उमाधिगम्योऽप्यनुमाधिगम्यः
समावलोकोऽप्यसमावलोकः ।
भवोऽपि योऽभूदभवस्स नित्यं
पायादपायात् परमेश्वरो वः ॥

आदिमध्यरहितोपमावतात्
सादिमध्यरहितोपमावतात् ।
तत्प्रियोऽप्युरगशायनोऽवतात्
तत्प्रियोऽप्युरगशायनोऽवतात् ॥

---

R. No. 7413.

गायत्रीशापविमोचनादिमन्त्राः ।

GĀYATRIŚĀPAVIMOCANĀDI MANTRĀH.

Foll. 67 (*a*) to 70 (*b*). Extent, 50 granthas.

Begins on fol. 67 (*a*) of the manuscript described under R. No. 7402.

This mantra is intended to liberate one from all kinds of curses and is addressed to Gāyatri.

Complete. (Gāyatriśapavimocana, Brahmaśapamocana, Vasiṣṭha-śāpamocana, Viśvāmitraśāpamocana, Gautamaśapamocana, Sukraśāpa-mocana, Sarvaśāpamocana and Gāyatrinigalamocana mantras.)

**Beginning :**

जाते सूतिः समुत्पन्ना मन्त्रान्ते मृतसूतकम् ।
मन्त्रमध्ये तु शापःस्यात् कथं मन्त्रस्तु जप्यते ॥

अस्य श्रीगायत्रीशापविमोचनमहामन्त्रस्य । परब्रह्मऋषिः । अनुष्टुप् छन्दः । गायत्री देवता । सां बीजम् । सीं शक्तिः । सूं कीलकम् । गायत्रीशापविमोचनार्थे जपे विनियोगः ।

**End :**

सायाह्ने—

ध्येया साधु सरस्वती भगवती पीताम्बरालङ्कृता
श्यामा सामतनुर्जरापरिलसद्गात्रेश्चिता वैष्णवी ।
तार्क्ष्यस्था मणिनूपुराङ्घ्रिवलयग्रैवेयभूषोज्वला
हस्तालङ्कृतशङ्खचक्रसुगदाभीतीर्दधाना सदा ॥

मुक्ता . . . . . . . . . . ।
. . . . . . . . . . . . . भजे ॥

---

R. No. 7414.

Palm leaf. 18½—18⅝ × 1½—1⅝ inches. Foll. 138. Lines, 7 and 8 on a page. Grantha. Slightly injured. Extent, 4,000 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

वेदान्तपरिभाषाव्याख्या—वेदान्तशिखामणिः by रामकृष्णदीक्षित ।

VEDĀNTAPARIBHĀṢĀ VYĀKHYĀ—VEDĀNTA ŚIKHĀMAṆIḤ by Rāmakṛṣṇa Dīkṣita.

Same work as that described under D. No. 4739 wherein see for the beginning and end.

Complete.

The following stanzas are additional in this manuscript—

यत्र चोल्लिखितं त्यक्त प्रमादालस्यदोषतः ।
तत् क्षन्तव्यं बुधैः सद्भिः क्षमा हि विदुषां धनम् ॥
सुवर्णखचिताकारा कृतिरेका मया कृता ।
विदुषामस्तु वेदान्तशिखामणिरलङ्क्रिया ॥

अनेन मत्प्रबन्धेन वेदान्तार्थावलम्बिना ।
गुरुकारुण्यलब्धेन तारकं ब्रह्म तुष्यतु ॥

---

R. No. 7415.

Palm leaf. 16⅝—17⅛ × 1⅓—1¼ inches. Foll, 57. Lines, 5 and 6 on a page. Grantha. Slightly injured. Extent, 800 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

रामानुजासिद्धान्तसङ्ग्रहः ।

RĀMĀNUJASIDDHĀNTASAṄGRAHAḤ.

Same work as that described under D. No. 4988 wherein see for the end.

This work is by one Vātsya Śrīnivāsācārya.

Wants the beginning.

**Beginning :**

. . . . . . . . . सम्भवश्चेति । लक्ष्यैकदेशमात्रवर्तनमव्याप्तिः । अलक्ष्येऽपि वर्तनमतिव्याप्तिः । लक्ष्य . . . . . दूषणत्रयगन्धास्पृष्टमेव समीचीनलक्षणत्वम् ।

---

(R. Nos. 7416 and 7417 one bundle.)

Palm leaf. 17⅝—17⅞ × 1¼—1½ inches. Foll. 186. Lines, 6 to 8 on a page. Grantha. Slightly injured.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7416.

ब्रह्मसूत्रम् ।

BRAHMASŪTRAM.

Foll. 1 to 7 (*a*). Lines, 8 and 9 on a page. Extent, 200 granthas.

The other work herein is Brahmasūtrabhāṣyam, fol. 8 (*a*).

Same work as that described under D. No. 4649.

Complete.

R. No. 7417.

ब्रह्मसूत्रभाष्यम् by रामानुज ।

BRAHMASŪTRABHĀṢYAM by Rāmānuja.

Foll. 8 (*a*) to 186 (*a*). Lines, 6 to 8 on a page. Extent, 6,000 granthas.

Begins on fol. 8 (*a*) of the manuscript described under the previous number.

Same work as that described under D. No. 4943 wherein see for the beginning.

Contains the first Adhyāya complete.

**End :**

योनिश्च हि गीयते । इतश्च जगतो निमित्तमुपादानञ्च ब्रह्म यस्माद्योनित्वेनापि गीयते । कर्तारमीशं पुरुषं ब्रह्मयोनिमिति यद्भूतयोनिं परिपश्यन्ति धीरा इति च योनिशब्दश्चोपादानवचन इति । यथोर्णनाभिः सृजते गृह्णते चेति वाक्यशेषादवगम्यते ।

एतेन सर्वे व्याख्याता व्याख्याताः—एतेन पादचतुष्टयोक्तन्यायकलापेन सर्ववेदान्तेषु जगत्कारणत्वप्रतिपादनपराः सर्वे वाक्यशेषाश्चेतनाचेतनविलक्षणसर्वज्ञसवशक्तिब्रह्मप्रतिपादनपराः । व्याख्याता व्याख्याता इति पदाभ्यासोऽध्यायपरिसमाप्ति (द्योतकः) ।

**Colophon :**

इति भगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये प्रथमस्याध्यायस्य चतुर्थः पादः ।

---

R. No. 7418.

Palm leaf. 16½ to 17¾ × 1½ inches. Foll. 75. Lines, 9 to 11 on a page, Grantha. Injured. Extent, 4,000 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

कल्पतरुव्याख्या—आभोगः by लक्ष्मीनृसिंह ।

KALPATARUVYĀKHYĀ—ĀBHOGAḤ by Lakṣmīnṛsiṁha.

This is a commentary on Amalānanda's Kalpataru, a super-commentary on the famous Sūtrabhāṣya of Sri Śaṅkarabhagavatpāda.

Contains the first pāda of the first adhyāya incomplete.

**Beginning :**

दैत्येन्द्रं वरदर्पितं सरभसं भित्वाट्टहासे कृते
दृष्ट्वा यं कमलालया कुशलिनं जैत्रश्रियालङ्कृतम् ।
संहृष्टा परिषस्वजे सुरगणैस्संस्तूयमानं विभुं
तं लक्ष्मीकुचकुङ्कुमाङ्कितततनुं लक्ष्मीनृसिंहं भजे ॥

महीधरकुलोत्तंसो रामाम्बागर्भसंभवः ।
लक्ष्मीनृसिंहस्तनुते कल्पवृक्षप्रदीपिकाम् ॥

क कल्पकतरुर्दिव्यो दुरालोको दुरासदः ।
मादृशैश्चर्मचक्षुर्भिः मन्दप्रज्ञैस्तथापि तु ॥

आसाद्य कल्पकतरुं दिशा परिमलोत्थया ।
आलोकच भक्तिचक्षुर्भ्यामाभोगोऽयं प्रकाश्यते ॥

आचार्यश्चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तये शिष्टाचारपरिपालनाय च कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नन् अस्य शास्त्रस्य विषयादिकं दर्शयति—यदज्ञातमिति ।

**End :**

प्रकाशमाने ब्रह्मणि कथं जगदारोप इत्यत उक्तमज्ञातमिति । एवमपि नीरूपे ब्रह्मणि कथं जगदारोप इत्यत उक्तं वियदिति । यद्वत् यथा वियत् अज्ञातं सत् बालैः . . . . . स्वरूपमजानानैस्तलमलिनतायोगि कलितमवाङ्मुखश्याममहाकटाहत्वेन ज्ञातं तद्वत् ब्रह्माप्यज्ञातं जीवनिष्ठाज्ञानविषयीकृतं सत् जगदधिष्ठानत्वेन ज्ञातमित्यर्थः । प्रत्यग्रूपस्य ब्रह्मणः सदा ।

---

**R. No. 7419.**

Palm leaf. 15⅝—15¾ × 1⅝—1¾ inches. Foll. 80. Lines, 7 to 10 on a page. Grantha. Slightly injured. Extent, 2,700 granthas.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

तत्वमालिका — णत्वबाधाविधूनना ।

TATVAMĀLIKĀ with Ṇatvabādhāvidhūnanā.

A treatise maintaining that the word Nārāyaṇa can be interpreted to denote God Śiva without any difficulty in explaining grammatically the letter ण in it. This work is accompanied with the commentary Ṇatvabādhāvidhūnana composed by Seshadri of Ātreya family. The author of this commentary is the son of Veṅkaṭeśvarasūri. It is not known whether this commentary is identical with the work described under R. No. 3942 (*b*).

Complete.

**Beginning :**

श्रीमन्तं चन्द्रचूडं गिरिपतितनयाप्राणनाथं दयाब्धिं
नत्वा वागीश्वरांश्च प्रणतजनलसद्वाग्विलासप्रदात्रीम् ।
स्वीयां बुद्धिं कुजन्तुस्तुतिमलिनतमां क्षालये तत्वमाला-
व्याख्यानाम्भोभिरेतामपि च विरचये णत्वबाधाविधूतिम् ॥

रचयामि णत्वबाधाविधूननाख्यां कृतशिवौन्मुख्याम् ।
नारायणपदभूषणभावलसत्तत्वमालिकाव्याख्याम् ॥

मात्सर्यमुत्सार्य कृतौ ममास्यां मम प्रयासं विमृशन्तु सन्तः ।
गवेषणीयो यदि दोष एष सर्वत्र भाष्यादिषु सूपपादः ॥

सप्रौढिवादो यदि भाष्यमुख्य-
ग्रन्थे महद्भी रचितेऽर्हणीयः ।
ग्रन्थो ममासावपि बालवादः
इत्येव सम्यक् दयनीय एव ॥

इह खलु प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं विरचितं "यस्य देवे परा भक्तिः यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ।" "आचार्यवान् पुरुषो वेदेत्या"दि श्रुतिनिकुरुम्बेन ।

* * * * *

शिष्टाचारपरिपालनाय ग्रन्थतो निबध्नन् चिकीर्षितं प्रतिजानीते—

मू० –

नत्वा गुरुचरणाब्जं देवीमपि सदाशिवप्राप्त्यै ।
नारायणपदभूषणभावलसत्तत्वमालिकां कुर्वे ॥

**End :**

एवं शैवानां तत्वानां षट्त्रिंशत्सङ्ख्यात्वेन शिवतत्वप्रतिपादका अप्ययमदीयश्लोकाः षट्त्रिंशत्सङ्ख्या उपनिबद्धाः । अत एव तत्वमालेत्यस्य ग्रन्थस्य नामाप्युचितमिति भावः ।

**Colophon :**

इति श्रीमदात्रेयकुलतिलकश्रीवेङ्कटेश्वरसूरिमणिसूनोः शेषाद्रिसूरिणः कृतिषु श्रीमन्नारायणपद्भूषणतत्वमालाव्याख्या णत्वबाधाविधूननाख्या समाप्ता ।

The following stanzas are found after the Colophon :—

एतां वसन्ततिलकाकृततत्वमालां
नारायणीयपद्भूषणमर्पयामि ।
शम्भो तवाङ्घ्रियुगले शिशुनिर्मिता स्रक्
व्यत्यस्तविन्यसनवत्यपि तोषिका हि [तुष्टिदा हि] ॥
नारायणपद(भूष)णरूपासौ तत्वमालिका शम्भोः ।
शेषाद्रिणा विरचिता जीयादाचन्द्रतारकादित्यम् ॥

---

R. No. 7420.

Sritala. 14½ × 2 inches. Foll. 79. Lines, 10 on a page. Grantha. Slightly injured. Extent, 2,250 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyar, Advocate, Triplicane, Madras.

दृश्यत्वादिनिरुक्तिखण्डनम् ।

DṚŚYATVĀDINIRUKTIKHAṆḌANAM.

An unfavourable criticism of the view of Advaita Vedānta that the phenomenal nature of the world establishes its unreality, advocated by Brahmānandasarasvati and Madhusūdanasarasvati.

Contains the Dṛśyatva, Jaḍatva and paricchinnatva niruktis.

**Beginning :**

किञ्चाभेदे भेदनान्तरीयकस्य संबन्धस्याभावादित्यनेन शुद्धं ब्रह्म न चिद्विषयं तदभिन्नत्वादित्यनुमानमुक्तं भवति । तच्च न संभवति । तदविषयकत्वे तद्विषयकव्यवहाराजनकत्वस्यैव प्रयोजकत्वेन तदभिन्नस्याप्रयोजकत्वात् ।

**End :**

किंच प्रमाविषयत्वं नाम स्वातन्त्र्येण स्वाभावाविषयकप्रमाविषयत्वं वा यथाकथंचित् प्रमाविषयत्वं वा, यथाकथंचित् साक्षात् प्रमाविषयत्वं वा, सत्वप्रकारकप्रमाविषयत्वं वा । असत्वाप्रकारकप्रमाविषयत्वं वा, नाद्यः । असता सह संयोगादीन्द्रियसन्निकर्षव्याप्त्याद्यभावेनासति स्वातन्त्र्येण प्रमाणप्रवृत्तेः प्रमाणप्रत्यक्ष ।

---

(R. Nos. **7421** and **7421** (*a*) one bundle.)

Sritala. 15⅓—15¼ × 2¼—2⅜ inches. Foll. 173. Lines, 12 to 17 on a page. Grantha. Slightly injured

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. **7421.**

छान्दोग्योपनिषद्भाष्यटीका by आनन्दगिरि ।

CHĀNDOGYOPANIṢADBHĀṢYAṬĪKĀ by Ānandagiri.

Foll. 1 (*a*) to 106 (*b*). Extent, 6,500 granthas.

The other work herein is Chāndogyopaniṣadbhāṣyaṭika, fol. 107 (*a*).

A commentary on the famous Chāndogyopaniṣadbhāṣya of Saṅkarabhagavatpāda.

Adhyāyas 1 to 7 complete. 8th incomplete.

**Beginning :**

नमो जन्मादिसंबन्धबन्धविध्वंसहेतवे ।
हरये परमानन्दवपुषे परमात्मने ॥

नमस्त्रय्यन्तसंदोहसरसीरुहभानवे ।
गुरवे परमक्षौघध्वांतध्वंसपटीयसे ॥

छन्दोगानामुपनिषद्धेदं व्याचिख्यासुर्भगवान् भाष्यकारः चिकीर्षितग्रन्थसमाप्तिप्रचयपरिपन्थिदुरितनिबर्हणसिद्ध्यर्थमोङ्कारोच्चारणलक्षणं मङ्गलाचरणं संपादयन् व्याख्येयस्वरूपं दर्शयति—ओमित्येतादिति । व्याख्यानं सप्रयोजनं प्रतिजानीते—तस्या इति ।

**End :**

अमुष्मादितीति—यथोक्तान्यशरीराणि वाय्वादीनि तेषामाकाशत्वापत्तौ दृष्टान्तमाह—यथेति । तथा वाय्वादीनि स्वेन स्वेन रूपेण गृह्यमाणदशायामाकाशाख्यतां गतानीति संबन्धः । तानि च वाय्वादीनि तथाभूताकाशात्मत्वं प्राप्तानीत्येतत् वर्षादिफलनिष्पत्त्यर्थं वाय्वादीनामाकाशदेशात् समुत्थानम् । उक्तमाकाङ्क्षाद्वारेण स्फुटयति—कथमित्यादिना । स्वेन स्वेन रूपेणाभिनिष्पद्यन्त इति संबन्धः । तत्र वायोरभ्रस्य विद्युतः स्तनयित्नोः च स्वेन रूपेणाभिनिष्पत्तिप्रकारं विवृणोति—पुरोवातादिनेति ।

---

R. No. 7421 (*a*).

छान्दोग्योपनिषद्भाष्यटीका by अभिनवनारायणेन्द्र ।
CHĀNDOGYOPANIṢADBHĀṢYAṬĪKĀ by Abhinavanārāyaṇendra.

Fol. 107 (*a*) to 173 (*a*). Extent, 4,000 granthas.

Begins on fol. 107 (*a*) of the manuscript described under R. No. 7421.

Same work as that described under R. No. 1662.

Contains the adhyāyas 5th to 8th complete.

---

(R. Nos. 7422 and 7423 one bundle.)

Palam leaf. 14⅞ to 15 × 1½—1⅝ inches. Foll. 104. Lines, 9 to 11 on a page. Grantha. Slightly injured.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7422.

तत्वचिन्तामणिदीधितिप्रकाशिका by गदाधर ।
TATVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ by Gadādhara.

Foll. 1 to 73 (*a*). Lines, 9 and 10 on a page. Extent, 2,000 granthas.

The other work herein is Brahmasūtrābhāṣya, fol, 74 (*a*).

Same work as that described under D. No. 4041.

Contains the Tarakaprakaraṇa and Vyāptyanugamaprakaraṇa complete.

**Beginning :**

तर्कोद्यत्रानुमित्यौपयिकव्याप्तिनिश्चयविरोधिशङ्कानिवृत्तिरुपेयते तत्र तत्कारणीभूतस्यापादकनिष्ठापाद्यव्याप्त्याप . . . . . . . . . रहपक्ष-तावच्छेदकादीनां निश्चयस्य विरोधिनी या शङ्का तन्निवृत्त्यर्थमपि तर्कात् पूर्वं तर्कान्तरमुपेयम् ।

**End :**

तथा सति धर्मिणि तत्समानाधिकरणभेदप्रतियोगितानवच्छेदकत्वरूप-व्यापकत्वनिवेशेनैव सामञ्जस्ये धर्मव्यापकतावच्छेदकत्वपर्यन्तनिवेशविरोधा-दिति दिक् ।

साध्यतावच्छेदकसंबन्धेनेति ज्ञानवान् मेयत्वादित्यादौ विषयता संबन्धेन वस्तुमात्रस्यैव साध्याधिकरणत्वात् । अवृत्तावेव साध्यसामा-नाधिकरण्याभावसत्वादिति भावः । हेतुतेति तेनान्यसंबन्धेन यत् हेत्वधिकरणं तद्वृत्तिकस्य साध्यसामानाधिकरण्यवृत्तित्वेऽपि नाव्याप्तिरिति भावः । साध्यवति काले कालिकसंबन्धेन वृत्तिमात्रस्यैव वृत्तेः । द्रव्यं सत्वादित्यत्रातिव्याप्तिवारणायाह वृत्तिद्वयश्चेति । एकत्वस्य दुर्वचत्वादाह विशेषणत्वेति । हेतुतावच्छेदकसंबन्धनिवेशे तु एतद्रूपभिन्नं गुणत्वात् महाकालान्यघटादिसाध्यवति व्याप्त्यापत्तेरिति ध्येयम् ।

**Colophon :**

इति व्याप्त्यनुगमटिप्पणी समाप्ता ।

---

R. No. 7423.

ब्रह्मसूत्रभाष्यम् by शङ्करभगवत्पाद ।

BRAHMASŪTRABHĀṢYAM by Śaṅkara Bhagavatpāda.

Foll. 74 (*a*) to 104 (*b*). Lines, 10 and 11 on a page. Extent, 1,000 granthas.

Begins on fol. 74 (*a*) of the manuscript described under the previous number.

Same work as that described under D. No. 4659.

Contains the first and the second pāda of the third adhyāya complete and third pāda of the same incomplete.

R. No. 7424.

Palm leaf. 11¾ × 1⅝—1⅞ inches. Fol. 46. Lines, 8 to 11 on a page. Grantha. injured. Extent, 1,035 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

आपस्तम्बश्रौतप्रयोगः ।

ĀPASTAMBAŚRAUTAPRAYOGAḤ.

Same work as that described under D. No. 1084.

Contains the Agnyādheya and Paśubandha prayogas only complete.

**Beginning :**

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

अग्न्याधेयं व्याख्यास्यामो विदुषा ब्राह्मणेनाधस्त्वयजस्त्वेत्युक्तः सर्वजनं मैत्रीकृत्वातीर्थस्नानजपहोमार्चनादिभिः संशोध्यात्मानं प्रातरौपासनं हुत्वा दर्भेष्वासीनः दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य सङ्कल्पं करोति ।

**End :**

निवृत्तमानमभीमन्त्रयते यजमानः । पुनस्त्वादित्या रुद्रा वसवः समिन्धतामित्युपमिध्य । सन्तिष्ठते निरूढपशुबन्धो निरूढपशुबन्धः ।

---

(R. Nos. 7425 and 7426 one bundle.)

Palm leaf. 11⅛—11⅜ and 12¾—12⅞ × 1¾—1⅞ inches. Foll. 69. Lines, 10—15 on a page. Grantha. Slightly injured.

Purhased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7425.

तत्वचिन्तामणिदीधितिटिप्पणी by जगदीश ।

TATVACINTĀMAṆIDĪDHITIṬIPPAṆĪ by Jagadīśa.

Foll. 1 (*a*) to 55 (*a*). 11⅛—11⅜ × 1¾—1⅞ inches. Extent, 1,350 granthas.

The other work herein is Sāmagrīvādah, fol. 56 (*a*).

Same work as that described under D. No. 4090.

Pakṣatā complete.

**Beginning :**

अनुमितिलक्षणेति—अनुमितिस्वरूपैककार्येत्यर्थः । व्याप्तिज्ञान-जन्याया अनुमितेः किमन्यत् कारणमिति जिज्ञासयैव पक्षतानिरूपणादिति भावः । अत्रानुकूलत्वं जनकतावच्छेदकसाधारणं प्रयोजकत्वमात्रम् । तेन व्याप्तेरनुमित्यहेतुत्वेऽपि न क्षतिः ।

**End :**

यदपि सिद्धेरनुमित्यविरोधित्वे पर्वतो वह्निव्याप्यवानित्यनुमिति-साक्षात्कारो न स्यात् । तस्या एव भिन्नविषयकानुमितिसामग्रीत्वेन प्रत्यक्षविरोधित्वादिति तदपि तुच्छम् । पर्वतो वह्निमान् वह्निव्याप्यवां-श्चेत्याद्यनुमितेरप्यसाक्षात्कारेऽपीष्टापत्तेः क्षतिविरहादित्यास्तां विस्तरः ।

**Colophon :**

इति जगदीशतर्कालङ्कारविरचिता पक्षतादीधितिटिप्पणी समाप्ता ।

---

R. No. 7426.

सामग्रीवादः by रघुदेव ।

SĀMAGRIVĀDAḤ by Raghudeva.

Foll. 56 (*a*) to 69 (*b*). Extent, 350 granthas.

Begins on fol. 56 (*a*) of the manuscript under the previous number.

Same work as that described under R. No. 214 but with slight different readings wherein see for the beginning.

Complete.

**End :**

तथा च चाक्षुषसामग्रीदशायां स्पार्शनसामग्रीकाले चाक्षुषोत्पत्त्यर्थ-मवश्यं त्वङ्मनोयोगः स्वीकरणीयः । जन्यज्ञानत्वावच्छिन्नं प्रति त्वङ्मनो योगस्य हेतुतायाः क्लृप्तत्वादिति । तदा क्लृप्तकारणाभावेन स्पार्शना-नुत्पत्तेरनिर्वाहे स्पार्शनं प्रति चाक्षुषसामग्रीप्रतिबन्धकत्वकल्पनमावश्यक-मेवेति दिक् ।

**Colophon :**

रघुदेवभट्टाचार्यविरचितस्सामग्रीवादः समाप्तः ।

(R. Nos. 7427 and 7428 one bundle.)

Palm leaf. 8, 11, 15¼—15⅜ × ⅜, 1¼—1⅜ inches. Foll. 32. Lines, 5 and 8—10 on a page. Grantha. Slightly injured.

Purchased in 1939-40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7427.

चण्डिकापाठक्रमविधिः ।

CAṆḌIKĀPĀṬHAKRAMAVIDHIḤ.

Foll. 1 and 2. Lines, 8 on a page. Extent, 15 granthas.

The other work herein is Gadādharīya-Kroḍapatram, fol. 3 (*a*).

Deals with certain religious formalities to be observed while reciting the eulogy of Caṇḍika, Nārāyaṇa or Lakṣmi.

Complete.

**Beginning :**

अथ चण्डिकापाठप्रकारः । यजमानेन वृतोऽहं चण्डीसप्तशतीपाठं नारायणहृदयचण्डीहृदयपाठं वा करिष्ये इत्यादि संकल्प्य, आसनादि विधाय, आधारे अन्यलिखितपुस्तकं स्थापयित्वा ।

**End :**

सर्वत्र काम्यपाठे संकल्पपूर्वकपूजनम् अन्ते बलिदानं च कार्यम् ।

**Colophon :**

इति चण्डिकापाठक्रमविधिः ।

---

R. No. 7428.

गदाधरीयक्रोडपत्रम् ।

GADĀDHARĪYAKROḌAPATRAM.

Foll. 3 to 32. Extent, 1,000 granthas.

Begins on fol. 3 (*a*) of the manuscript described under the previous number.

A pamphlet on Gadādhara's Satpratipakṣa and Hetvābhāsasāmānya-nirukti.

Incomplete.

**Beginning :**

पक्षतावच्छेदकेत्यादिसत्प्रतिपक्षलक्षणे सत्यन्तदले स्वरूपसंबन्धरूपावच्छेदकत्वनिवेशे सत्प्रतिपक्षोन्नायके वह्न्यभावव्याप्यव्याप्यव्यापको वह्न्यभावः वह्न्यभावव्याप्यव्याप्यवान् च ह्रदः इति ज्ञानयोरेकविशिष्टापरत्वेन

प्रतिबन्धकतया वह्न्यभावव्याप्यवान् इति ज्ञानीयविषयतासामान्यस्यैव प्रतिबन्धकतावच्छेदकतया अतिव्याप्तिः स्यात् अतः अनतिरिक्तवृत्तित्व-रूपावच्छेदकत्वनिवेशः ।

**End :**

इच्छाप्रतिबन्धकतायामभावांशे एकत्र द्वयमिति रीत्या वह्न्यभावत्व उभयावगाहिज्ञानव्यावृत्ताया अवच्छेदकत्वस्य हृदो वह्न्यभाववानिति ज्ञानीयविषयतायां सत्वेऽपि नासंभवावकाशः । एवमुक्तप्रतिबन्धकता-विशेष्यतात्वनिरूपितत्वाद्यतिरिक्तधर्मावच्छिन्नविशेष्यतादिवृत्त्यवच्छेदकत्वान्य-त्वेनापि विशेषणीया । तेन च ।

---

(R. Nos. 7429 to 7433 one bundle.)

Palm leaf. 15¼ to 16¾ × 1—1½ inches. Foll. 48. Lines, 6 to 9 on a page. Grantha. Much injured.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7429.

तलवकारोपनिषद्भाष्यटिप्पणम् by शिवानन्दयति ।

TALAVAKĀROPANIṢADBHĀṢYAṬIPPAṆAM by Sivānandayati.

Foll. 1 (*a*) to 9 (*b*). Lines, 8 and 9 on a page. Extent, 400 granthas.

The other works herein are :—Īśāvāsyopaniṣadbhāṣyaṭippaṇam, fol. 11 (*a*). Ātharvaṇikopaniṣadbhāṣyaṭippaṇam, fol. 17 (*a*). Muṇḍakopaniṣadbhāṣyaṭippaṇam, fol. 31 (*a*). Maniṣāpañcakam with commentary, fol. 43 (*a*).

Same work as that described under D. No. 389 wherein see for the end.

Wants the beginning otherwise complete.

**Beginning :**

व्याख्येय इत्याह द्व्यामुष्यायणो वेति । अमुष्य प्रख्यातस्यापत्यमा-मुष्यायणः । द्वयोः पित्रोः पूर्वं भाषादिना सबन्धी वा । द्व्यामुष्या-यणश्च न जारज इत्यर्थः । स्वर्गसाधनमभिज्ञान पृष्टं स्वरूप . . . . इति । इयं च वक्ष्यमाणा मृत्योः प्रतिज्ञावगन्तव्या ।

स त्रेधात्मानं व्याकुरुतेति श्रुतेरग्निवाय्वादित्यरूपेण समष्टितया विराडेव व्यवस्थित इति तेन विराड्रूपो व्यवस्थित इति तेन विराड्रूपेणाग्निः जगतः प्रतिष्ठेत्युच्यते ।

Fol. 10 (a) and (b) contains a small portion of Kāṭhakopaniṣadbhāṣya-ṭippaṇam.

---

R. No. 7430.

ईशावास्योपनिषद्भाष्यटिप्पणम् by शिवानन्दयति ।

IŚĀVĀSYOPANIṢADBHĀṢYAṬIPPAṆAM by Śivānandayati.

Fol. 11 (a) to 16 (b). Lines, 8 and 9 on a page. Extent, 250 granthas.

Begins on fol. 11 (a) of the manuscripts described under the previous number.

Same work as that described under D. No. 312.

Wants the beginning ; otherwise complete.

**Beginning :**

. . . शब्दवाच्यता न विरुध्यते । निरुपाधिकस्य लक्ष्यत्वं भविष्यतीत्यर्थः । ईशित्रीशितव्यभावेन भेदस्तर्हि प्राप्त इत्याह सर्वजन्तूनामात्मा सन्निति । यथा आदर्शादिषु प्रतिबिम्बानामात्मा सन् बिम्बभूतो देवदत्त ईशिता भवति तथा क . . . . . . . . भेदेन ईशित्रीशितव्यसंभवात् न वास्तवभेदानुमानं संभवतीत्यर्थः ।

---

R. No. 7431.

आथर्वणिकोपनिषद्भाष्यटिप्पणम् by शिवानन्दयति ।

ĀTHARVAṆIKOPANIṢADBHĀṢYAṬIPPAṆAM by Śivānandayati.

Foll. 17 (a) to 31 (a). Extent, 450 granthas.

Begins on fol. 17 (a) of the manuscript described under R. No. 7429.

Same work as that described under D. No. 620. For remarks and the end please see the pages 2 and 69 of Vol. I of the 'Report on a search for Sanskrit and Tamil manuscripts for the year 1896–97' by M. Seshagiri Sastri.

Wants the beginning ; otherwise complete.

**Beginning :**

· · · कास्तित्वेऽपि सन्देह आसीत् । विशेषतस्तन्निवृत्त्यर्थमुच्यत इत्याह हन्तेदानीमिति । जननमरणकारणात्मप्रतिनियमात् अयुगपत्—प्रवृत्तेश्च पुरुषबहुत्वं त्रैगुण्यविपर्ययाच्चेति नानात्मानो व्यवस्थात इत्य · · · · · · · · · · किकबुद्धिविरोधात् सर्वपुरवर्ति एक एवात्मेत्यत्र न चित्तस्थैर्यं संभवतीत्याशङ्क्य औपाधिकभेदसाधने सिद्धसाधनत्वं स्वभावभेदसाधने चानैकान्तिकत्वं दर्शयितुं ।

---

R. No. 7432.

मुण्डकोपनिषद्भाष्यटिप्पणम् by शिवानन्दयति ।

MUṆḌAKOPANIṢADBHĀṢYAṬIPPAṆAM by Śivānandayati.

Foll. 31 (*a*) to 42 (*a*). Extent, 300 granthas.

Begins on fol. 31 (*a*) of the manuscript described under R. No. 7429.

Same work as that described under D. No. 722 wherein see for the beginning and end.

Complete.

---

R. No. 7433.

मनीषापञ्चकम्—सव्याख्यानम् ।

MANĪṢĀPAÑCAKAM with commentary.

Foll. 43 (*a*) to 48 (*a*). Extent, 125 granthas.

Begins on fol. 43 (*a*) of the manuscript described under R. No. 7429.

Similar to the work described under D. No. 4707.

Incomplete.

**Beginning :**

श्रितात्ध्यात्मशास्त्रान् निरन्तरनिरतिशयनिजानन्दानुसन्धानतया उपशान्तस्वान्तान् अत एव विगलिताभिमानान पुरुषविशेषान् कांश्चित् उपलक्ष्य तेषां विनैव · · · · · ब्राह्मणाद्यभिमानापनुत्तये स्वपदविश्रान्तये च पञ्चभिः श्लोकैः स्वानुभूतिमाविष्करोति ।

**End :**

तदुक्तम्—

मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः ।
यासंप्रज्ञातनामासौ समाधिरभिधीयते ॥ इति ॥

R. No. 7434.

Palm leaf. 14—15 × 1¼—1¾ inches. Foll. 100. Lines, 7 on a page. Grantha. Slightly injured. Extent, 2,500 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

तत्वचिन्तामणिव्याख्या—फक्किका by मथुरानाथ ।

TATVACINTĀMAṆIVYĀKHYĀ–PHAKKIKĀ by Madhurānātha.

Same work as that described under D. No. 4027.

Contains Śabdakhaṇḍarahasya incomplete.

**Beginning :**

जातीयत्वोपादाने तु तद्धटसजातीये व्यक्तयन्तरे तन्नीलव्यक्तिसजातीयस्य नीलव्यक्तयन्तरस्य संसर्गनिश्चयो वर्तत एवेति न काप्यनुपपत्तिरिति भावः । अत्र येन केनापि धर्मेण साजात्यं विवक्षितमन्वयितावच्छेदकधर्मेण वा ।

**End.:**

आद्यान्त्यभिन्नशब्दस्य पक्षत्वात् पक्षतावच्छेदकसामानाधि रण्येन सिद्धेरुद्देश्यत्वाद्वारा[न]भागासिद्धिर्दोषाय सामान्यादौ व्यभिचारवारणाय जातिमत्वादिति । जातिपदं समवेतमात्रपरमिति भावः । लाघवादाह—तस्मादिति । लौकिकप्रत्यक्षविषयगुणत्वादित्यर्थः । आत्मनि जात्यादौ च व्यभिचारवारणाय गुणेति । नित्यगुणे व्यभिचारवारणाय विषयान्तम् । नन्वत्रात्मैकत्वपरिमाणो व्यभिचार इत्यत आह. आत्मैकत्वमिति । तत्परिमाणत्वमपि बोध्यम् ।

---

R. No. 7435.

Palm leaf. 17 to 18¼ × 1¼—1¾ inches. Foll. 217. Lines, 8 to 10 on a page. Grantha. Much injured. Extent, 10,000 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

उपनिषन्मङ्गलाभरणम् ।

UPANIṢANMAṄGALĀBHARAṆAM.

Same work as that described under R. No. 4418.

Contains the following Upaniṣads :—

(1) Chāndogyopaniṣad. (Kalā 2.)
(2) Tāpanīyopaniṣad. (Kalā 3.)
(3) Taittirīyopaniṣad. (Kalā 4.)
(4) Śvetāśvataropaniṣad. (Kalā 5.)
(5) Kāṭhakopaniṣad. (Kalā 6.)
(6) Praśnopaniṣad. Kalā 7.)

**Beginning :**

· · · उद्गीथमुपासांचक्रिरे । प्र · · · पदिष्टोद्गीथम.वानां चक्रुर्यज्ञ औद्गात्रं कुर्वती.ति शेषः । तथा हि—समानप्रकरणे अथ ह प्राणमूचुस्त्वं न उत् · · · निन्नीनां देवतानामुद्गागादिकमस्माकमिवा-विशिष्टम् ।

**End :**

अथ भूतान्तरात्मकवृत्त्यन्तररूपस्यापि तथा · · · · · · मनुगृह्णाना तिष्ठति । सैषा पुरुषस्यापानवायुमवष्टभ्यानुगृह्णाना तिष्ठतीत्यध्यात्ममित्यनुकर्षः । अथ · · · · · · · सा समानो भूत्वाध्यात्मपुरुषमनुगृह्णाति । यो बहिः वायुः तद्रूपः प्राणः सोऽध्यात्मम् । व्यानस्सन पु · · · · · · · · · · · · अध्यात्ममुदानो भूत्वानुगृह्णात । यदेवं तस्मात् उपशान्ततेजाः उप ।

---

R. No. 7436.

Palm leaf. 16⅞—17 × 1⅛—1¼ inches. Foll. 39. Lines, 8 to 10 on a page. Grantha. Slightly injured. Extent, 1,500 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

तर्कचन्द्रिका by कृष्णभट्ट ।

TARKACANDRIKĀ by Kṛṣṇabhaṭṭa.

Same work as that described under D. No. 17848 wherein see for the beginning.

Breaks off in the course of Śabdādhikāra.

Tri. Cat.—18

**End :**

यद्वा प्रयुज्यते अनेनेति प्रयोजनम् । संज्ञाप्रवृत्तिप्रयोजकसर्वार्थ-वाचकत्वमित्युक्तं नवीनैः । तत्र केवलयोः संज्ञायामपि परमकतरेत्यादौ सर्वनाम्नः परत्वमुपजीव्य शीभावसुडादिप्रयोजनसंभवात् । एवं च विहितविशेषणं कुत्रापि नाश्रयणीयमिति लाघवम् ।

---

R. No. 7437.

Palm leaf. $14\frac{1}{2}$—$15\frac{3}{8}$ × $1\frac{1}{8}$ inches. Foll. 36. Lines, 7 on a page. Telugu. Injured. Extent, 1,000 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

अद्वैतसिद्धान्तविद्योतनम् by ब्रह्मानन्दसरस्वती ।

ADVAITASIDDHĀNTAVIDYOTANAM by Brahmānandasarasvatī.

Same work as that described under R. No. 1341.

Contains Anirvacanīyakhyātivāda complete.

---

R. No. 7438.

Palm leaf. $12\frac{1}{2}$—13 × $\frac{7}{8}$—1 inches. Foll. 44. Lines, 5 and 6 on a page. Granthas. Injured. Extent, 500 granthas.

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

सारावली by कल्याणवर्मन् ।

SĀRĀVALĪ by Kalyāṇavarman.

Same work as that described under D. No. 13913.

Contains adhyāyas 21 to 25 incomplete.

**Beginning :**

. . . . . . . . न परस्परम् ।
इतरैरप्रसक्ताश्चेत् विशेषशुभदायकाः ।
केन्द्रत्रिकोण . . . . . . युक्तावपि स्वयम् ।
संबन्धमात्राद्बलिनौ भवेतां योगकारकौ ।
निवसेतां व्यत्ययेन त . . . . . णोः ।
एकत्रान्यतरो वापि वसेच्चेद्योगकारकः ।
त्रिकोणाधिपयोर्मध्ये . . . . केनचित् ।

**End :**

पीनोन्नततनुः पूज्यः सतां समूहस्य ।
धनुषि का • • • • व्ययभव • • • • • • ॥
• • • प्तो दुर्बलदेहो जराङ्गनासक्तः ।
हृद्रोगी धनलुब्धो लोभानृतवचनो निपुणः ॥
क्लीबो वि • • • • • • • • • •
• • • • चेष्टो परार्थचेष्टस्सुदुःखितो मूढः ।
मकरे दानवपूज्यो क्लेशसहो जायते पुरुषः ॥
• • • • गरोगतप्तः कर्मसु विफलेष्टस्सर्वदाभिरतः ।
परयुवतिगो विधर्मा गुरुभिः पुत्रैश्च • • • • • ॥
• • • नोपभोगभूषणवस्त्रादिनिराकृतो मलिनः ।
कुम्भधरे भृगुपुत्रे भवति पुमान् नात्र स • • • • ॥

---

(R. Nos. 7439 to 7444 (*d*) one bundle.)

**Palm leaf. 8⅞, 9½ and 14 × ⅞—1⅛ and 1⅝—1⅞ inches. Foll. 45. Lines, 5 to 9 on a page. Grantha. Slightly injured.**

Purchased in 1939–40 from Sri T. S. Krishna Aiyer, Advocate, Triplicane, Madras.

R. No. 7439.

गुरुपादुकामन्त्रः ।

GURUPĀDUKĀMANTRAḤ.

Foll. 1 (*a*) to 4 (*b*). Lines, 5 on a page. Extent, 35 granthas.

The other works herein are :—Gurumaṇḍalamantrah, fol. 5 (*a*). Uttaragītā, fol. 14 (*a*). Cāṇakyasūtram, fol. 26 (*a*). Śivotkarṣaḥ, fol. 28 (*a*). Tāntrikasnānavidhiḥ, fol. 37 (*a*). Suddhavidyāmanonmaṇī-mantraḥ, fol. 44 (*a*). Rājamātaṅgeśvarīmahāmantraḥ, fol. 44 (*a*). Laghuśyāmalāmbāmahāmantraḥ, fol. 45 (*a*). Gurutrayamantraḥ, fol. 45 (*b*).

Similar to the work described under D. No. 6244.

Incomplete.

**Beginning :**

अस्य श्रीगुरुपादुकामन्त्रस्य परमहंसर्षये नमः । अव्यक्तगायत्री छन्दसे नमः । महागुरुपादुकादेवतायै नमः । हं बीजाय नमः । सः शक्तये नमः । सोऽहं कीलकाय नमः । गुरुपादुकाप्रसादसिद्ध्यर्थे न्यासे विनियोगः ।

**End :**

शिञ्जन्नूपुरपादकङ्कणमहामुद्रासुलाक्षारसा-
लङ्काराङ्कितमङ्घ्रिपङ्कजयुगं श्रीपादुकालङ्कृतम् ।
उद्भासन्नखचन्द्रखण्डरुचिरं राजज्जपासन्निभम्
ब्रह्मादित्रिदशासुरार्चितपदं मूर्ध्नि स्मराम्यम्बिके ॥

---

R. No. 7440.

गुरुमण्डलमन्त्रः ।

GURUMAṆḌALAMANTRAḤ.

Foll. 5 (*a*) to 13 (*b*). Lines, 5 and 6 on a page. Extent, 75 granthas.

Begins on fol. 5 (*a*) of the manuscript described under the previous number.

This mantra is addressed to the assemblage of Śaiva-gurus.

Incomplete.

**Beginning :**

श्रीनाथादि + + + + वन्दे गुरोर्मण्डलम् ।
सहस्र + + + + + + गुरुम् ॥

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिम्
द्वन्द्वातीतं गगनसदृशं तत्वमस्यादिलक्ष्यम् ॥

एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतम् ।
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

कदा योगी कदा भोगी कदानग्नः पिशाचवत् ।
दत्तात्रेयहरिस्साक्षात् भुक्तिमुक्तिप्रदायकः ॥

**End :**

हंसश्शिवोऽहमनिशं स्मृतिनिष्कलोऽह-
मानन्दसंविदनुभूतिचिदुज्वलोऽहम् ।
ईशोऽहमीदृश इति श्रुतिपातितोऽहं
सोऽहं समस्तमिति सर्वमिदं शिवोऽहम् ॥

आर्द्रं ज्वलति + + + + स्वाहा ॥

R. No. 7441.

उत्तरगीता ।

UTTARAGĪTĀ.

Foll. 14 (*a*) to 25 (*a*). Lines, 8 to 10 on a page. Extent, 325 granthas.

Begins on fol. 14 (*a*) of the manuscript described under R. No. 7439.

Same work as that described under D. No. 2371, but with some addition and omission of stanzas.

Complete.

**Beginning :**

अर्जुन :—

यदेकं निष्कलं ब्रह्म व्योमातीतं निरञ्जनम् ।
अप्रतर्क्यमनिर्देश्यं विनाशोत्पत्तिवर्जितम् ॥
कैवल्यं केवलं शान्तं शुद्धमत्यन्तनिर्मलम् ।
कार्यकारणनिर्मुक्तं हेतुसाधनवर्जितम् ॥

**End :**

हंसहंसेति यो मन्त्रं जीवन् जपति सर्वदा ।
अजपा नाम गायत्री योगिनां मोक्षसाधनम् ।
तस्य संकल्पमात्रेण सर्वपापैः प्रमुच्यते ॥

**Colophon :**

ओं तत्सत् । गीतासारं समाप्तम् ।

The following are found after the colophon :—

यत्कटाक्षमिदं सर्वं ब्रह्मेति सुविनिश्चितम् ।
तस्मै नमोऽस्तु गुरवे सूर्यनारायणात्मने ॥
वाचकप्रणवो . . . क्रीडावस्त्वखिलं जगत् ।
श्रुतिराज्ञा वपुर्ज्ञानं तं वन्दे देवकीसुतम् ॥

---

R. No. 7442.

चाणक्यसूत्रम् ।

CĀṆAKYASŪTRAM.

Foll. 26 (*a*) to 27 (*a*). Lines, 6 and 7 on a page. Extent, 20 granthas.

Same work as that described under R. No. 1848 (*a*), wherein see for the beginning.

Incomplete.

**End :**

तेजोऽभिसन्धानहेतुस्तदर्थिनाम् ।
नातप्तलोहो लोहेन सन्धीयते ॥
बलवान् हीनेन न विगृह्णीयात् ।

न ज्यायसा(स)मेन वा । हस्तिना पादयुद्धमिव बलवद्विग्रहः ।
आमपात्रमामेन सह विश्यते ।

---

R. No. 7443.

शिवोत्कर्षः ।

ŚIVOTKARṢAḤ.

Foll. 28 (*a*) to 36 (*a*). Extent, 225 granthas.

Begins on fol. 28 (*a*) of the manuscript described under R. No. 7439.

Similar to the work described under D. No. 5115.

Complete.

**Beginning :**

जन्मस्थेमलयं समस्तजगतां यस्यैव लीलायितं
यस्मिन्नायतते भवस्थिरमहापाशक्षयः प्राणिनाम् ।
तं ब्रह्माच्युतपूजिताङ्घ्रिकमलं विश्वाधिकं शाश्वतं
साम्बं ब्रह्म सदाशिवाख्यमनिशं पश्येयमन्तर्दृशा ॥

सदाशिवः परब्रह्म साम्बमूर्तिः सनातनः ।
विभूतिशेषः तस्यैषः प्रपञ्च इति वैदिकाः ॥

पाञ्चरात्राः परं भावमविज्ञाय स्वभावतः ।
विष्णोः परत्वे वेदानामपि तात्पर्यमूचिरे ॥

ते खल्वेवमाहुः । यतो वा इमानि ब्रह्म, द्यावाभूमी जनयन् देव एकः इति, जन्माद्यस्य यत इति श्रुतिसूत्राभ्यां व्यवस्थितं जगज्जन्मादिकारणत्वमेव परस्य ब्रह्मणोऽसाधारणं लक्षणं श्वेतच्छत्र इव मूर्धाभिषिक्तस्य ।

**End :**

सर्वासूपनिषत्सु जगज्जन्मादिकारणत्वेन सर्वान्तर्यामित्वेन सकल-मुनिध्येयत्वेनाभिधा उक्तानेकप्रमाणव्याकुलीकरणात् । विरोधापत्तेश्च । तस्माज्जन्मादिकारणत्वेन सर्वदेवोत्तरः परमेश्वरः इति सिद्धान्तः ।

**Colophon :**

शिवोत्कर्षः सम्पूर्णः ।

---

R. No. 7444.

तान्त्रिकस्नानविधिः ।

TĀNTRIKASNĀNAVIDHIḤ.

Foll. 37 (*a*) to 43 (*a*). Lines, 6 and 7 on a page. Extent, 75 granthas. Begins on fol. 37 (*a*) of the manuscript described under R. No. 7439. On the bathing of the Sakti worshippers ordained by the Śākta cult. Incomplete.

**Beginning :**

भूमिं प्रार्थ्य, बहिर्निर्गत्य, मलमूत्रोत्सर्जनशौचाचमनादिकं यथाविधि कृत्वा, क्लीं कामदेवाय सर्वजनप्रियाय नम इति दन्तान् परिशोध्य, वक्ष्यमाणचतुर्लक्ष्मीविद्याभिमुखं प्रक्षाल्याचम्य वैदिकस्नानानन्तरं अद्येत्यादि श्रीपरदेवताप्रीत्यर्थं तान्त्रिकस्नानमहं करिष्ये ।

**End :**

नवनाथान् स्मरेन्मूलं पङ्कजे योनिमण्डले । दक्षाधमकरमारभ्य दक्षोर्ध्वकरपर्यन्तमायुधध्यानम् । अथ नित्यापारायणम् ।

---

R. No. 7444 (*a*).

शुद्धविद्यामनोन्मनीमन्त्रः ।

ŚUDDHAVIDYĀMANONMANĪMANTRAḤ.

Fol. 44 (*a*). Extent, 5 granthas.
Begins on fol. 44 (*a*) of the manuscript described under R. No. 7439.
Similar to the work described under D. No. 7408.
Complete.

**Beginning :**

शुद्धविद्यामनोन्मनीमहामन्त्रस्य कर्मविपाक ऋषिः । शुद्धविद्या-मनोन्मनी देवता । ऐं बीजम् । ईं शक्तिः । ओं कीलकम् ।

**End :**

महदमितनिकासे मातृकादिव्यरूपे
सकलजनहृदिस्थे सर्वमन्त्रप्रकाशे ।
मदपितरूपं चिन्तयेद्यः स मुक्तः
भगवति शुभविद्यासुन्दरि त्वां नमामि ॥

ऐं ईं ओम् । बालै ।

---

R. No. 7444 (*b*).

राजमातङ्गेश्वरीमहामन्त्रः ।

RĀJAMĀTAṄGEŚVARĪMAHĀMANTRAḤ.

Foll. 44 (*a*) to 45 (*a*). Extent, 12 granthas.

Begins on fol. 44 (*a*) of the manuscript described under R. No. 7439.

Similar to the work described under D. No. 6924.

Complete.

**Beginning :**

अस्य श्रीमातङ्गेश्वरीमहामन्त्रस्य । मतङ्गानन्दभैरव ऋषिः । बृहती छन्दः । राज + + देवता । ऐं बीजं । क्लीं शक्तिः । सौं कीलकम् । राज + + विनियोगः ।

**End :**

श्यामां कराम्भोरुहकेलिलग्नां
सोमावतंसश्रुतिपालिलग्राम् ।
विद्याप्रवीणां विशदामुपासे
शारीं चतुष्षष्टिकलास्वरूपाम् ॥ ध्यानम् ॥

ओं नमो भगवति शारीरके शारीरके सकलकलाकोविदे देवीं बोधय बोधय स्वहा ।

---

R. No. 7444 (*c*)

लघुश्यामलाम्बामहामन्त्रः ।

LAGHUŚYĀMALĀMBĀMAHĀMANTRAḤ.

Fol. 45 (*a*) and (*b*). Extent, 5 granthas.

Begins on fol. 45 (*a*) of the manuscript described under R. No. 7439.

Similar to the work described under D. No. 7137.

Complete.

**Beginning :**

लघुश्यामलाम्बामहामन्त्रस्य । मतङ्गभगवान् ऋषिः । त्रिष्टुप् छन्दः । लघुश्यामलाम्बा देवता । ऐं बीजम् । स्वाहा शक्तिः । नमः कीलकम् । लघुश्या+गः । मूलेनास्त्रान्तं विन्यस्य ।

**End :**

ध्यानम्—

माणिक्यवीणामुपलालयन्तीं
मदालसां मञ्जुलवाग्विलासाम् ।
माहेन्द्रनीलोत्पलकोमलाङ्गीं
